A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGĀCĀRYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE; CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND REGISTRAR OF BOOKS, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. VIII.—ARTHAŚĀSTRA, KĀMAŚĀSTRA, AND SYSTEMS OF INDIAN PHILOSOPHY—NYĀYA.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1910.



CONTENTS.

CLASS V.

ARTHAŚĀSTRA.

CLASS VI.

KĀMAŚĀSTRA.

CLASS VII.

SYSTEMS OF INDIAN PHILOSOPHY.

I. NYĀYA.

A. Comprehensive Treatises.

I. Nyāya—(continued).

A. Comprehensive Treatises—(continued).

I. NYĀYA—(continued).

A. Comprehensive Treatises—(continued).

I. Nyāya—(continued).

B. Tracts on Nyāya.

I. NYĀYA—(*continued*).

B. Tracts on Nyāya—(continued).

A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

CLASS V.—ARTHA-ŚĀSTRA.

No. 3873. अर्थशास्त्रटीका–प्रतिपदपञ्चिका.

ARTHAŚĀSTRAṬĪKĀ : PRATIPADAPAÑCIKĀ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 209. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Adhyāyas 8 to 36 in the second Adhikaraṇa.

A commentary on the Arthaśāstra of Kauṭilya by Bhaṭṭasvāmin. The original work is an ancient treatise on government and politics. It is in the form of Sūtras and the language is full of difficulties in respect of interpretation. Consequently the commentary is valuable.

Beginning:

सिद्धीनामित्यादि । सिद्धीनां द्रव्याणामसाधनमनुत्पादनम् उत्पन्नानां वानवतारणम् । अर(नु)पहस्तीकरणम् उपहस्तीकृतानां च तेषामप्रवेशनमनुपनयनमित्ययं त्रिविधः प्रतिबन्धः । तत्रेति । प्रतिबन्धे । प्रतिबन्धद्रव्यदशबन्धो दशभागो दण्डः । प्रयोगमाह—कोशद्रव्याणामिति । तत्प्रवेश्यानां वृद्धिप्रयोगः वृद्ध्यर्थं प्रयुज्य तां वृद्धिं स्वयमुपजीव्य कालान्तरेण मूलद्रव्यदानं व्यवहारं व्याचष्टे—पण्यव्यवहार इति ।

End:

युवराजाभिषेचने पुत्रस्य भ्रातुर्वा यौवराज्यप्रतिपादने । पुत्रजन्मनि वा राज्ञः पुत्रजनने । पुत्रग्रहणं पौत्रनप्त्रोरप्युपलक्षणार्थम् । वाशब्दाद-श्वमेधादिमहाक्रतुदीक्षासूल्कापातभूमिकम्पादिमहोत्पातेषु राज्ञो जनपदस्य वा व्याधिदुर्भिक्षादिमहाभयेषु च सर्वेषामपि बन्धनागारस्थानां बन्ध-नस्य मोक्षोऽभिधीयते । विशालाक्षप्रभृतिभिः पूर्वाचार्यैरिति । एतेषु निमि-त्तेषु महादोषानपि मुञ्चेदित्यर्थ इति ॥

Colophon:

इति भट्टस्वामिनः प्रतिपदपञ्चिकायाम् अर्थशास्त्रटीकायामध्यक्षप्र-चारिके द्वितीयेऽधिकरणे षट्त्रिंशोऽध्यायः ॥

नागरिकप्रणिधिः ॥

आदितस्सप्तपञ्चाशोऽध्यायः ॥

कौटिल्यार्थशास्त्रस्याध्यक्षप्रचारिके द्वितीयमधिकरणं समाप्तम् ॥

No. 3874. चाणक्यनीतिसारसङ्ग्रहः.

CĀṆAKYANĪTIŚĀRASAṄGRAHAḤ.

Substance, paper. Size, $8\frac{7}{8} \times 3\frac{3}{4}$ inches. Pages, 15. Lines, 8 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

This professes to give in 108 stanzas the essence of various works on government. It is also called Cāṇakya-kāvya.

Complete.

Beginning:

अथ चाणक्यकाव्यं लिख्यते—

नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ।
सर्वबीजमिदं शास्त्रं चाणक्यं सारसङ्ग्रहम् ॥ १ ॥

येन विज्ञानमात्रेण नृणां प्रज्ञा विवर्धते ।
अष्टोत्तरशतं श्लोकं(काः) चाणक्यं(क्ये) सारसङ्ग्रहम्(हे) ॥ २ ॥

मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम् ।
येन विज्ञानमात्रेण मूर्खो भवति पण्डितः ॥ ३ ॥

लुब्धमर्थेन गृह्णीयात्स्तब्धमञ्जलिकर्मणा ।
मूर्खं सदानुवर्तेन याथातथ्येन पण्डितः(म्) ॥ ४ ॥

रूपयौवनसम्पन्ना विशालकुलसम्भवा(:) ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ५ ॥

End:

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुस्स्त्रीणां सर्वत्राभ्यागतो गुरुः ॥ १०९ ॥

आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
ने(नि)ष्ठा शान्ति(र)तपो दानं नवधा कुललक्षणम् ॥ ११० ॥

Colophon:

इति चाणक्याक्षर(र्थशास्त्र)स्य समुच्चयं स(यस्स)मासम्(:) ॥

No. **3875.** नीतिप्रकाशिका.

NĪTIPRAKĀŚIKĀ.

Substance, paper. Size, $12\frac{3}{4} \times 8\frac{1}{4}$ inches. Pages, 72. Lines, 16 on a page. Character, Dēvanāgarī. Condition, Good. Appearance, new.

Sargas 1 to 8.

Vaiśampāyana details in this work the various duties of kings with special reference to the art of war.

Beginning:

श्रीमद्गजाननं वाणीं नत्वा ब्रह्मादिसद्गुरून् ।
नीतिप्रकाशिका सेयं तन्यते ह्यादरान्मया ॥

श्रीमत्तक्षशिलायां तु सूपविष्टं वरासने ।
जनमेजयभूपालं द्रष्टुकामो महातपाः ॥

वैशम्पायननामा तु महर्षिस्संशितव्रतः ।
अभ्यागात्सहितश्शिष्यैर्व्यासशिष्यो महामुनिः ॥

तमायान्तमृषिं श्रुत्वा जनमेजयभूपतिः ।
प्रत्युज्जगाम सहसा सह मन्त्रिपुरोहितैः ॥

*   *   *   *

धृत्वा यात्रामारभस्व प्राप्तकालमरिन्दम ।
पार्ष्णिमूलं च विज्ञाय व्यवसायं पराजयम् ॥

स्वमूलं तु दृढं कृत्वा परान् याहि विशां पते ।
विक्रमस्व विजेतुं तं जित्वा च परिपालय ॥

दृढमष्टाङ्गसंयुक्ता चतुर्विधबला चमूः ।
बलमुख्यैस्सुनीता ते द्विषतां प्र(प्री)तिवर्धनी ॥

इत्येवमनुशास्यैनं ब्रह्मा लोकगुरुः पुनः ।
धनुर्वेदं ग्राहयितुं वक्तुमेवोपचक्रमे ॥

Colophon:

इति श्रीमन्नीतिशास्त्रे नीतिप्रकाशिकायां सङ्गतिप्रदर्शनपूर्वकराज-धर्मोपदेशो नाम प्रथमस्सर्गः ॥

End:

नीतिशास्त्रमिदं प्रोक्तं मया ते जनमेजय ।
सङ्क्षेपेण गमिष्यामि यत्र व्यासो गुरुर्मम ॥

वैशम्पायन इत्युक्त्वा तत्रैव स जगाम ह ।
पारीक्षितोऽपि मुमुदे सुनीत्या पालयन्प्रजाः ॥

Colophon:

इति श्रीमन्नीतिशास्त्रे नीतिप्रकाशिकायां राजव्यापारकथनं नामाष्टमस्सर्गः ॥

(१) राजधर्मोपदेशः.
(२) धनुर्वेदविवेककथनम्.
(३) खड्गोत्पत्तिकथनम्.
(४) मुक्तायुधनिरूपणम्.
(५) मुक्तायुधनिरूपणम्.
(६) सेनानयनकथनम्.
(७) सैन्ययोगकथनम्.
(८) राजव्यापारकथनम्.

No. 3876. नीतिप्रकाशिका—तत्त्वविवृतिसहिता.

NĪTIPRAKĀŚIKĀ : WITH TATTVAVIVṚTI.

Substance, paper. Size, $7\frac{7}{8} \times 6\frac{1}{8}$ inches. Pages, 105. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Sargas 1 to 8.

This commentary on Nītiprakāśikā is called Tattvavivṛti, and is by Sītārāma, son of Nañjuṇḍa of Kauṇḍinyagōtra.

Complete.

Beginning:

(मू.)

श्रीमद्गजाननं वाणीं नत्वा ब्रह्मादिसद्गुरून् ।
नीतिप्रकाशिका सेयं तन्यते सादरान्मया ॥ १ ॥
श्रीमत्तक्षशिलायां तु सूपविष्टं वरासने ।
जनमेजयराजानं द्रष्टुकामो महातपाः ॥ २ ॥
वैशम्पायननामा तु महर्षिस्संशितव्रतः ।
अभ्यागात्सहितश्शिष्यैर्व्यासशिष्यो महामुनिः ॥ ३ ॥

तमायान्तमृषिं श्रुत्वा जनमेजयभूपतिः ।
प्रत्युज्जगाम सहसा सह मन्त्रिपुरोहितैः ॥ ४ ॥
पाद्यमर्घ्यं तथा गां च मधुपर्कं विधाय च ।
तस्मै प्रोवाच कुशलं प्रहृष्टेनान्तरात्मना ॥ ५ ॥
धन्योऽस्म्यनुगृहीतोऽस्मि यन्मे दर्शनमागतः ।
तारिताः पितरस्सर्वे पालितोऽहं त्वया मुने ॥ ६ ॥

(वि.)

श्रीमज्जगन्नाथपादौ भक्त्या नत्वा यथामति ।
नीतिप्रकाशिकातत्त्वविवृतिं करवाण्यहम् ॥ १ ॥

दुर्वादिद्विरदेन्द्रकुम्भदळनाशक्तिस्ववाग्वैग(ख)री-
हस्ताग्रोदरलब्धमौक्तिकयशस्सिंहस्सुधीन्द्राग्रणीः ।
नञ्जुण्डाख्यबुधस्तदीयतनुजस्सीतापदेनाञ्चितो
था(रा)मः कौण्डिनगोत्रजन्म(स्स) कुरुते ग्रन्थं बुधान्प्रार्थयन् ॥ २ ॥

अथ तावद्भगवतो वेदव्यासस्यान्तेवासी वैशम्पायननामा महर्षिः कल्युत्पन्नराजानुजिघृक्षया सूक्ष्मनीतिं बुभुत्सवे जनमेजयाय चतुर्मुखपृथुसंवादरूपेण धनुर्वेदमुपदेष्टुं ग्रन्थादौ शिष्टनियमितप्रत्यूहापनोदकं मङ्गळमन्तेवासिशिक्षायै निबध्नाति—श्रीमदित्यादिना ।

गजस्याननं यस्य सः; श्रीमांश्चासौ गजाननश्च तम् । वाणीं सकलविद्याधिदेवताम् । ब्रह्मा आदिर्येषां ते च ते सद्गुरवश्च नीतिदेशिकाः तांश्च नत्वा । नीतिप्रकाशिका तदाख्या कृतिः । सा अनादिसिद्धा । इयं मद्बुद्धिस्था । सा(आ)दरात् जनमेजयानुग्रहवशात् । मया वैशम्पायनेन । तन्यते विस्तार्यते । तदुक्तं विक्रमार्कचरित्रे —

"श्रुत्वा वैशम्पायनाद्धृष्टो जनमेजयस्तदा ।
अष्टाध्यायवतीं नीतिं प्रावर्तयत तां तदा ॥" इति ॥ १ ॥

श्रीमत्यां तक्षशिलायां तदाख्यायां नगर्याम् । वरासने सिंहासने । सूपविष्टं सुखोपविष्टम् ॥ २ ॥

सम्यक् शितं तीक्ष्णं व्रतं यस्य सः संशितव्रतः । धर्मान् जानातीति मुनिः । अभ्यागात् आगतवान् । शिष्यैः स्वशिष्यैस्सहितः । एतत् श्लोकद्वयमेकं वाक्यम् ॥ ३ ॥

End:

तमेव व्यासमुद्दिश्यैव । स वैशम्पायनः । पारीक्षितोऽपि जनमेजयोऽपि । सुनीत्या प्रजाः पालयन् मुमुदे इत्यन्वयः ॥ १०० ॥

Colophon:

इति श्रीमन्नीतिप्रकाशिकातत्त्वविवृतौ अष्टमस्सर्गः ॥

No. 3877. नीतिप्रकाशिका—तत्त्वविवृतिसहिता.

NĪTIPRAKĀŚIKĀ : WITH TATTVAVIVṚTI.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{1}{4}$ inches. Pages, 4. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are :—Ālavandārstōtram 3*a*, Mukundamālā 7*a*, Lakṣmīstōtram (Catuśślōkī) 11*b*, Dhāṭīpañcakam 12*a*, Prārthanāpañcakam 13*a*, Pañcāyudhastōtram 13*a*, Jitantēstōtram 14*a*, Varadāṣṭakam 15*a*, Aṣṭaślōkī 15*b*, Nāmamālā 17*a*, Dhruvastōtram 19*a*.

Contains only 14 verses of the first Sarga and the commentary of Sītārāma.

Incomplete.

No. 3878. नीतिप्रकाशिका—तत्त्वविवृतिसहिता.

NĪTIPRAKĀŚIKĀ : WITH TATTVAVIVṚTI.

Substance, paper. Size, $13\frac{1}{8} \times 8\frac{1}{8}$ inches. Pages, 40. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Kumāravāstu 21*a*.

The text with the commentary of Sītārāma.

Complete.

No. 3879. नीतिवाक्यामृतम्.

NĪTIVĀKYĀMṚTAM.

Substance, palm-leaf. Size, $10\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 94. Lines, 8 on a page. Character, Kanarese. Condition, much injured. Appearance, old.

A well known work on government.

Samuddēśas 1 to 29 complete, 30th incomplete.

Incomplete.

Beginning:

सोमं सोमसमाकारं सोमाभं सोमसम्भवम् ।
सोमदेवमुनिं नत्वा नीतिवाक्यामृतं ब्रुवे ॥

अथ धर्मार्थकामफलाय राज्याय नमः । यतोऽभ्युदयनिश्रेयससिद्धिस्स धर्मः । आत्मानमिष्टनरेन्द्रसुरेन्द्रमुनीन्द्रमुक्तिस्थाने धत्त इति वा धर्मः । अधर्मः पुनरेतद्विपरीतफलः ॥

* * * *

ऐहिकामुत्रिकफलार्थमर्थव्ययस्त्यागः । स भस्मनि हुतमिवापात्रेष्वर्थव्ययः । पात्रन्त्रिविधम् धर्मपात्रङ्कार्यपात्रं कामपात्रञ्चेति । किन्तया कीर्त्या याश्रितान्न बिभर्ति प्रतिरुणद्धि वा धर्मम् ।

* * * *

Colophon:

इति धर्मसमुद्देशः ॥

यतस्सर्वप्रयोजनसिद्धिः सोऽर्थः । सोऽर्थस्य भाजनं योऽर्थानुभ येनार्थमनुभवति । अलब्धार्थलाभो लब्धपरिरक्षणं रक्षितविवर्धनञ्चार्थानुबन्धः ।

* * * *

Colophon:

इत्यर्थसमुद्देशो द्वितीयसमुद्देशः ॥

End:

अध्यास्य सर्वेदास्थानं दद्यात् । सर्वे(वे) (साधारणभूमिकं तिष्ठतो नास्त्यसमुचिता रक्षा.)

* * * *

Colophon:

इत्येकान्नत्रिंशो युद्धसमुद्देशः ॥
द्वादशवर्षा स्त्री षोडशवर्षः पुमान् प्राप्तव्यवहारौ.

No. 3880. नीतिसारः.

NĪTISĀRAḤ.

Substance, palm-leaf (Śrītāla). Size, 8 × 2 inches. Pages, 56. Lines, 11 on a page. Character, Malayālam. Condition, good. Appearance, new.

Complete.

A metrical treatise in 20 Sargas on government: by Kāmandaka. The author follows Cāṇakya mostly.

Beginning:

यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ।
देवस्स जयति श्रीमान् दण्डधारो महीपतिः ॥

वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
यो गीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥

यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपातामूलतः श्रीमान् सुपर्वानन्दपर्वतः ॥

एकाकी मन्त्रशक्त्या यश्शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥

नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥
दर्शनात्तस्य सुदृशो विद्यानां पारदृश्वनः ।
राजविद्याप्रियतया सङ्क्षिप्तं ग्रन्थमर्थवत् ॥
उपार्जने पालने च भूमेर्भूमीश्वरं प्रति ।
यत्किञ्चिदुपदेक्ष्यामो राजविद्याविदां मतम् ॥
राजास्य गज(जग)तो हेतुर्वृद्धेर्वृद्धाभिसम्मतः ।
नयनानन्दजनकश्शशाङ्क इव तोयधेः ॥

* * * *

न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा ।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥
नयविक्रमसंपन्नस्सूत्थानश्चिन्तयेच्छ्रियम् ।
नयस्य विनयो मूलं विनयश्शास्त्रनिर्णयः ॥

End:

एकोऽपि वारणपतिर्द्विषतामनीकं व्यक्तं निहन्ति मदसत्त्वगुणोपपन्नः ।
नागेषु हि क्षितिभुजां विजयो निबद्धस्तस्माद्गजाधिकबलो नृपतिस्सदा स्यात् ॥

Colophon:

इति नीतिसारे कामन्दकीये विंश[ति]स्सर्गः ॥

No. **3881.** नीतिसारः—सव्याख्यः.

NĪTISĀRAḤ: WITH COMMENTARY.

Pages, 256. Lines, 20 on a page. Character, Dēvanāgarī and Telugu.

Begins on fol. 1*a* of the MS. described under No. 1590.

Sargas 1 to 17 complete, 18th incomplete.

The commentary is called Upādhyāyanirapēkṣā.

Beginning :

यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ।
देवः स जयति श्रीमान् दण्डधारो महीपतिः ॥ १ ॥

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ २ ॥

चेतश्चक्रेऽखिलाज्ञानव्याप्तिसामर्थ्यधा(हा)रिणा(णे) ।
नमो विनिर्मितानन्तभवध्वंसाय शम्भवे ॥ ३ ॥

व्याख्या सुखावबोधार्था स्पष्टा सूक्ता सुसङ्गता ।
कामन्दकिप्रणीतस्य नीतिशास्त्रस्य लिख्यते ॥ ४ ॥

शास्त्रकारः स्वशास्त्रादौ नमस्यति नमस्कारं करोति । किमर्थमिति चेन्नमस्यनमस्कारात्पुण्यमुत्पद्यते । तदुत्पद्यमानं विरोधादपुण्यं निवर्तयति । तन्निवृत्तौ तु कार्याणां विघ्नादीनामभावं मन्यमानस्सकलार्थशास्त्रपारावारदृश्वा कामन्दकिराह । स देवो महीपतिर्जयति । यस्य महीपतेः । प्रभावात् प्रभुशक्तेः । कोशदण्डफलं हि प्रभुशक्तिः । भुवनं जगत् । इदम् । शाश्वते नित्ये । पथि स्वर्गमोक्षगामिनि मार्गे । तिष्ठति (अ)वस्थानं करोति । देव इति—दीव्यतीति देवः । दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिष्विति धातूक्तसमस्तगुणसम्पन्नत्वात् महीपतिरेव देवः । तथा चोक्तं स्मृतिकारैः—

* * * *

वंशे विशालवंश्यानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥ २ ॥

* * * *

जातवेदा इवार्चिष्मान्वेदान्वेदविदां वरः ।
यो वा वेदान्सुचतुरश्चतुरोऽप्येकवेदवि(व)त् ॥ ३ ॥
यस्याभिचारवज्रेण वज्रद्वा(ज्व)लनतेजसः ।
पपातामूलतश्श्रीमान्सुपर्वानन्दपर्व(त): ॥ ४ ॥
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥ ५ ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
यनु(येनो)द्दध्रि(द्ध्रे)नमस्तस्मै विष्णुगुप्ताय वेधसे ॥ ६ ॥
दर्शनात्तस्य सुदृशो विद्यानां पारदृश्वनः ।
राजविद्याप्रियतया संक्षिप्तग्रन्थमर्थवत् ॥ ७ ॥
उपार्जने रक्षणे च भूमेर्भूमीश्वरं प्रति ।
यत्किञ्चिदुपदेक्ष्यामो राजविद्याविदां मतम् ॥ ८ ॥
राजास्य जगतो हेतुर्वृद्धेर्वृद्धाभिसम्मतः ।
नयनानन्दजननः शशाङ्क इव तोयधेः ॥ ९ ॥
यदि न स्यान्नरपतिस्सम्यङ्नेता (त)तः प्रजा ।
अकर्णधारा बलवद्विप्लवेतेह नौरिव ॥ १० ॥

Colophon:

इति कामन्दकीयनीतिसारटीकायामुपाध्याय(निर)पेक्षायां सप्तदश-स्सर्गः ॥

End:

एतन्मौलादिषड्भेदं चतुरङ्गबलं स्मृतम् ।
षडङ्गमन्त्रकोशाभ्यां पदात्यश्वरथद्विपैः ॥ ५९ ॥
इति षड्विधमेतद्धि यथायोगं बलं बली ।
सुनिरिछद्रं प्रतिव्यूह(हं या)यात्प्रतिबलं प्रति ॥ ६० ॥

इत्युक्तक्रमेण षड्विधं बलमपि बलमेतदनन्तरोक्तं हि स्फुटम् । यथा-योगमिति । यस्य बलस्य येन बलेन सह योगो युज्यते । कर्तु(:)शील-

ञ(ल)सम्पन्नम् । सुगि(नि)रिछयिंद्र(द्रमि)ति । रन्ध्रं येन पश्यते(अव)का-
मा(शो) भवति, तन्निर्गतम् । त[ ]स्मिन् प्रतिव्यूहेति । परवि(चि)तव्यूहस्य
प्रत्यनीकभूतं व्यूहं विरचय्य यायात् परबलं प्रतीति ॥

No. 3882. नीतिसारव्याख्या—उपाध्यायनिरपेक्षा.

NĪTISĀRAVYĀKHYĀ: UPĀDHYĀYANIRAPĒKṢĀ.

Substance, paper. Size, 12 × 9¾ inches. Pages, 181. Lines, 23 on a page. Character, Telugu. Condition, good. Appearance, new.

Sargas 1 to 15 complete, 16th incomplete. This codex was copied from a MS. of the Library.

Same as the above.

No. 3883. नीतिसारव्याख्या.

NĪTISĀRAVYĀKHYĀ.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 352. Lines, 6 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Sargas 1 to 16 complete.

In the beginning, there are 17 pages treating of the genealogy of the kings of Mysore; and the commentary begins on the 10th fol. It is a translation in Kanarese of the Sanskrit commentary called Upādhyāyanirapēkṣā, the translator being one Lakṣmīpati, the minister of Cikadēvarāja. The Pratīkas are taken from the Sanskrit original of the text.

No. 3884. नीतिसारः—सव्याख्यः.

NĪTISĀRAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 243. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old

Sargas 1 to 8 complete, 9th incomplete.

Contains notes in Kanarese.

No. 3885. नीतिसारव्याख्या.

NĪTISĀRAVYĀKHYĀ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 314. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Sargas 1 to 15 complete, 16th incomplete.

This manuscript has been transcribed, and the transcript is described under number 3882.

No. 3886. नीतिसारः—सव्याख्यः.

NĪTISĀRAḤ WITH COMMENTARY.

Substance, paper. Size, $10\frac{1}{2} \times 8\frac{1}{8}$ inches. Pages, 153. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Sargas 1 to 9.

Begins on fol. 16*a*. The other work herein is Siddhayōgasaṅgrahaḥ 1*a*.

The text with the commentary known as Nayaprakāśa by Varadarājabhaṭṭa.

Beginning:

विधये विधेरपि सदा मृत्योरपि मृत्यवे पिनाकभृते ।
उशनाबृहस्पतिभ्यां नमोऽस्तु[दा]दैत्यामरगुरुभ्याम् ॥

विधिः ब्रह्मा । तस्यापि विधिरधिपः । स कारणं करणाधिपाधिप इति श्रुतेः । विचित्रन(नाना)प्रपञ्चनिर्माणचातुरीधुरीणतया नूतनप्रबन्धनिर्माणादौ पूज्यत्वमुचितम् । मृत्युर्निश्श्रेयसप्रत्यनीकवर्गः । तस्यापि मृत्युः । पिनाकभृद्ग्रहणम्—अरिष्टनिरसनसाधनसामग्रीस्मरणरूपत्वादुचितम् । नमस्ते अस्तु धन्वन इति श्रुतेः । नमनं नमः । तन्निघ्नतया

स्वासम्भावनापि तेनैवावश्यनिराकरणीयेति स्वस्थचित्ततयेष्टार्थसिद्धिः । एवं नू(न्यू)नारम्भसामान्यमात्रे तदुचितेष्टदेवतापूजानन्तरं सम्प्रदायप्रवर्तकपूजोपपन्नेति शुक्रबृहस्पत्योर्ग्रहणम् । तयोरसुरामरगुरुत्वविशेषणमर्थशास्त्रनिपुणमन्त्यूधीनानामनश्वरप्र(प)दोत्कर्षप्राप्तिसूचनार्थम् ।

एवं शास्त्रारम्भे शिष्टाचारसिद्धाभिमतोचितदेवतापूजानन्तरं राजनीतिशास्त्रस्यारभ्यत्वात्प्रजापालनादिकृत(कर्तृ)नृपाख्यदेवतापूजा कार्येति तां करोति--

यस्य प्रभावाद्भुवनं शाश्वते पथि तिष्ठति ।
देवस्स जयति श्रीमान् दण्डधारो महीपतिः ॥ १ ॥

तस्मादभिद्भर(भव)त्येष सर्वभूतानि तेजसी(से)ति लोके दृष्टादृष्टविघ्नोपशमहेतुत्वादपि शास्त्रादावस्य पूज्यत्वमुचितम् । यस्य प्रभावात् प्रभुशक्तिराविर्भवन्ती । भुवनं चतुर्वर्णाश्रमलक्षणो लोकः । शाश्वते पथि स्वस्मिन्स्वस्मिन्मार्गे स्वधर्मकर्माभिरतस्तिष्ठति अभ्युदयनिश्श्रेयसप्राप्तिं नातिक्रामतीत्यर्थः । देवस्स लोकपालांशत्वात्पूज्यः । दण्डधारः दुष्टेषु शिक्षां धारयिता । महीपतिः भूमण्डलनायकः । अत एव सर्वोत्कृष्टो वर्तत इति वाक्यार्थः ॥

* * * *

Colophon:

इतीन्द्रजयः प्रथमप्रकरणम् ॥

इति श्रीमद्वरदराजभट्टयज्वना विरचिते कामन्दकव्याख्याने नयप्रकाशे प्रथमसर्गस्थं प्रथमप्रकरणम् ॥

* * * *

इति कामन्दकीयव्याख्याने नयप्रकाशे विद्यावृद्धसंयोगो द्वितीयप्रकरणम् ॥

प्रथमस्सर्गः ॥

* * * *

इति श्रीमद्वरदराजभट्टयज्वना विरचिते नयप्रकाशे विद्याविभागस्तृतीयं प्रकरणम् ॥

* * * *

इति कामन्दकी(य)व्याख्याने चतुर्थप्रकरणम् ॥

* * * *

इति श्रीमद्वरदराजभट्टविरचिते कामन्दकी(य)व्याख्याने नयप्रकाशे दण्डमाहात्म्यं पञ्चमप्रकरणम् ॥

इति कामन्दकीये द्वितीयस्सर्गः ॥

* * * *

इति तृतीयस्सर्गः ॥

* * * *

इति श्रीमद्वरदराजभट्टारकयज्वना विरचिते कामन्दकी(य)व्याख्याने नयप्रकाशे प्रकृतिसम्पत् सप्तमप्रकरणम् ॥

सर्गश्चतुर्थः ॥

* * * *

इति कामन्दकी(यव्याख्याने) अष्टमप्रकरणम् ॥

पञ्चमस्सर्गः ॥

* * * *

इति कामन्दकीये नयप्रकाशे नवमप्रकरणम् ॥

षष्ठस्सर्गः ॥

* * * *

इति कामन्दकीये नयप्रकाशे राजपुत्ररक्षणं दशमप्रकरणम् ॥

* * * *

इति कामन्दकीये व्याख्याने आत्मरक्षणमेकादशप्रकरणम् ॥

सप्तमस्सर्गः ॥

* * * *

इति कामन्दकीये मण्डलयोर्नाम (गो नाम) द्वादशप्रकरणम् ॥

इति कामन्दकीये अष्टमस्सर्गः ॥

End:

विहीनोऽपि हि सन्धेयो व्यसने रिपुरागतः ।
काले दुनोति हिमवत्तोये(य) बिन्दुरिव क्ष्य(क्ष)ते ॥ ६२ ॥
न सा(न्त्व)मिच्छेद्धीनश्चेत्तत्र हेतुरसंशयः ।
तस्य विस्रम्भमालक्ष्य प्र(हरंस्त)त्र निस्स्पृहः ॥ ६३ ॥
कामन्दकीयं सव्याख्यं लिखितं जयवत्सरे ।
पौष्य(ष)मासे शुक्ले(क्लपक्षे) चतुर्थ्यानि(र्थ्यामि)भशत्रुणा ॥

No. 3887. शुक्रनीतिः.

ŚUKRANĪTIḤ.

Substance, paper. Size, 13¾ × 5½ inches. Pages, 166. Lines, 10 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, new.

A work on politics by Śukrācārya in four Adhyāyas in verse; deals chiefly with the duties of a king.

Beginning:

प्रणम्य जगदाधारं सर्गस्थित्यन्तकारिणम् ।
सम्पूज्य भार्गवः पृष्टो वन्दितः पूजितस्तु सः ॥
पूर्वदेवैर्यथान्यायं नीतिसारमुवाच तान् ।

भार्गव उवाच—

शतलक्षश्लोकमितं नीतिशास्त्रमथोक्तवान् ॥
स्वयम्भूर्भगवान् लोकहितार्थं सङ्ग्रहेण वै ।
तत्सारं तु वसिष्ठाद्यैरस्माभिर्वृद्धिहेतवे ॥
अल्पायुर्भूभृदाद्यर्थं सङ्क्षिप्तं तर्कविस्तृतम् ।
क्रियैकदेशबोधीनि शास्त्राण्यन्यानि सन्ति हि ॥
सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रकम् ।
धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः ॥

*　　　*　　　*　　　*

कुसीदकृषिवाणिज्यगोरक्षा वार्तयोच्यते ।
सम्पन्नो वार्तया साधु न वृत्तेर्भयमृच्छति ॥
दमो दण्ड इति ख्यातस्तस्माद्दण्डो महीपतिः ॥
तस्य नीतिर्दण्डनीतिर्नयनान्नीतिरुच्यते ॥
आन्वीक्षिक्यात्मविज्ञानाद्धर्षकौशो(शोकौ) व्युदस्यति ।
उभौ लोकाववाप्नोति त्रय्यान्तिष्ठन्यथाविधि ॥
आनृशंस्यं परो धर्मस्सर्वप्राणभृतां यतः ।
तस्माद्राजानृशंस्येन पालयेत्कृपणं जनम् ॥
न हि स्वसुखमन्विच्छन् पीडयेत्कृपणं जनम् ।
कृपणः पीड्यमानस्स्वमृत्युना हन्ति पार्थिवम् ॥

*　　　*　　　*　　　*

पुत्रवत्पालिता भृत्या(:) समये शत्रुताङ्गतौ(ताः) ।
न दोषस्स्यात्प्रयत्नस्य भागधेयं स्वकं हि तत् ॥
दृष्ट्वा सुविपुलं कर्म तपस्तद्वा(ष्ट्वा)दिवं व्रजेत् ।
उक्तं समासतो राजकृत्यं मिश्रेऽधिकं ब्रुवे ॥

Colophon:

इति राजप्रकरणाध्यायः ॥

End:

धर्मार्थौ यत्र न स्यातां (मो)क्षकामं(मौ) निरर्थकं(कौ) ।
अर्थस्य पुरुषो दासो दासस्त्वर्थो न कस्य चित् ॥
अतोऽर्थाय यतेतैव सर्वदा यत्नमास्थितः ।
अर्थो धर्मश्च कामश्च मोक्षश्चापि भवेन्नृणाम् ॥

Colophon:

इति नीतिसारखिले प्रथमं प्रकरणं समाप्तम् ॥
मार्गशिरकृष्णातिथौ ८ सं १९०९.

शुक्रोक्तनीतिसारस्य पुस्तकं त्वतिसुन्दरम् ।
लिखायतं (अलेखि तत्) वेङ्कटेशविदुषा भारते पुरे ॥



A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS.

CLASS VI.—KĀMA-ŚĀSTRA.

No. 3888. अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Substance, paper. Size, $12\frac{1}{8} \times 7\frac{5}{8}$ inches. Pages, 44. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 63*a*. The other work herein is Ratirahasya (with commentary) fol. 1*a*.

Complete in 10 Sthalas.

A treatise on Kāmaśāstra by Kalyāṇamalla. This is an erotic work on the nature of the sensual qualities possessed by different kinds of women, and was written to please a certain Lāḍakhān, son of Ahmedkhān, a Muhammadan ruler. The contents are mostly taken from previous writings on the subject.

Beginning:

अतिललितविलासं विश्वचेतोनिवासं समरकृतविकासं शम्बराख्यप्रणाशम् ।

रतिनयननिका(विरा)मं सन्ततश्चाभिरामं प्रसभविजितवामं शर्मदं नौमि कामम् ॥

लोटीवंशावतंसं(सो)हतरिपुवनितावारिनेत्र(नेत्रवारि)प्रपूर-

प्रादुर्भूतासिबन्धु(म्बुराशि)प्ष्वमितवरयशा लीलया प्लाविताश्व(रि): ।

सत्पुत्रः ख्यातकीर्तेरहमदनृपते(:)कामसिद्धान्तविद्वान्
जीयाच्छ्रीलाडखानः क्षितिपतिमुकुटैर्द्द(र्घृ)ष्टपादारविन्दः ॥

अस्यैव कौतुकनिमित्तमनङ्गरङ्गं ग्रन्थं विलास(सि)जनवल्लभमातनोमि ।
श्रीमन्महाकविवरेषु कलाविदग्धः कल्याणमल्ल इति भूपमनु(मुनि)र्यशस्वी ॥

भवा(मता)नि दृष्ट्वा बहुशो मुनीनां तत्सारमादाय निरूपयामी ।
अतोऽङ्गनाकेलिकलानुरागैर्ग्राह्यस्सदायं पुरुषैस्स्वभावः ॥

निस्सारे जगति प्रपञ्चसदृशे(कुलके) सारं कुरङ्गीदृशा-
मेकं भोगसुखं परात्मपरमानन्देन तुल्यं विदुः ।
तज्जात्यादिविवेकमूढमनसो लब्ध्वापि नानाङ्गनाः
संविन्दन्ति न कामतन्त्रविकलाः पश्वादिवन्मानवाः ॥

पद्मिनी चिन्तिनी(त्रिणी) चाथ शङ्खिनी हस्तिनी ततः ।
पूर्वपूर्वतरै(रा)स्तासु श्रेष्ठास्तल्लक्ष्म चक्ष्महे ॥

तत्र तावत्पद्मिनीस्वरूपं निरूप्यते—

पीता रक्तकुरङ्गशावनयना पूर्णेन्दुतुल्यानना
पीनोत्तुङ्गकुचा शिरीषमृदुला स्वल्पाशना दक्षिणा ।
फुल्लाम्भोजसुगन्धिकामसलिला लज्जावती मानिनी
शा(श्या)मा कापि सुवर्णचम्पकनिभा देवादिपूजारता ॥

End:

दयिते परदेशसंस्थिते शशिपङ्केरुहचन्दनादिभिः ।
परिताप(तप्य)त एव यद्वपुः कथिता सा कविभिर्वियोगिनी ॥

वैराग्यवान् छ(स)कलकेलिकलाकलापं(सु)
गृह्णातिनो(कान्तो जहाति न)सकार(श)मनङ्गवा(लौ)ल्यात् ।

यस्यास्त्रियस्सुरतसौख्यवितर्पिता सा
स्वाधीनपूर्वपतिकेति बुधैः प्रदिष्टा ॥

विविधकुसुममालाभूषिताङ्गी मनोज्ञा
सुरतरसविलोला सानुरागा स्वकान्ते ।
निवसति चटुलाक्षी वासगेहे चिरं या
वरकविभिरिहोक्ता सा किलोत्कण्ठितेति ॥

सुविदितपरमार्थः कामशास्त्रस्य विद्वान्
विविधरतिविनोदैः कामिनीनां मनांसि ।
अनुदित(न)मनुरागाद्रञ्जयेद्यस्य(श्च) लीला-
फलमविकलमेव प्राप्नुयान्मानवस्य(स्स): ॥

यावच्छङ्करमौलिगा सुरनदी गौरी तदर्धाङ्गना
यावत्प्रेमवती पयोधितनया वैकुण्ठनाथे हरौ ।
वेदाभ्यासरतो विरिञ्चिरपि भूर्यावद्दिनेशश्शशी
भूयात्तावदनङ्गरङ्गकइ(म)तिप्रीत्यै सदा कामिनाम् ॥

Colophon :

इति श्रीमल्लोडिवंशावतंसश्रीमल्लाटखानप्रभुविनोदाय श्रीमद्राजर्षिमहाकविकल्याणविरचितेऽनङ्गरङ्गे सुरतनिरूपणं नाम दशमस्थलः ॥

No. **3889.** अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Pages, 44. Lines, 25 on a page.

Begins on fol. 181*a* of the MS. described under No. 446.

Same work as the above.

Complete.

No. 3890. अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 53. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 5*a*; but one page contains Kāmakalātithinirṇaya. By Kalyāṇamalla.

The other works herein are Dēvīstuti 1*a*, Rahasyauṣadhaviṣaya 33*a*, Āryādviśatī 39*a*, Ṣōḍaśakalānāmāṇi 51*a*, Kriyāguptiślōka 52*a*, Caturaṅgakrīḍāślōka 54*a*.

At the end of the work there are two leaves containing a list of the names of certain medicines and drugs mentioned in the work.

Sthalas 1 to 9 complete, 10th incomplete.

Same work as the above, but the introduction is wanting in this.

No. 3891. अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Substance, paper. Size, $7\frac{7}{8} \times 6\frac{1}{4}$ inches. Pages, 29. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new.

Sthalas 1 to 5 complete, 6 th incomplete.

Begins on fol. 89*a*. The other work herein is Ratirahasya (with commentary) 1*a*.

Same work as the above.

No. 3892. अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{7}{8}$ inches. Pages, 47. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, not new.

Sthalas 1 to 9 complete; 10th incomplete.

By Kalyāṇamalla.

Same work as the above, but does not contain the introduction.

No. 3893. अनङ्गरङ्गम्.

ANAṄGARAṄGAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 13. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, not new.

Begins on fol. 1*a*. The other work herein is Ratirahasya (Harihara) 8*a*.

Sthalas 9 and 10. The first leaf in the manuscript is numbered 157*a*, and it contains the end of the 8th Sthala.

Same work as the above.

No. 3894. कूचिमारतन्त्रम्.

KŪCIMĀRATANTRAM.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Pages, 12. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 23*a*. The other works herein are Kāvyālōkalōcana 1*a*, Rūpakaparibhāṣā 13*a*, Vēdāṅgajyautiṣa 29*a*, Sōmasiddhānta 32*a*.

Paṭalas 3 complete.

This is a treatise on Kāmaśāstra written by Kūchimāra; chiefly treats of aphrodisiac medicines and charms.

Beginning:

शङ्कराय नमस्कृत्य यत्पूर्वैस्समुदाहृतम् ।
हिताहितकरं नृणां मन्त्रौषधिसमन्वितम् ॥
संयोगादिष्टसम्भारादुपपन्नं च तत्त्वतः ।
कूचिमारेण तपसा यत्कृतं क्रीडनं पुरा ॥

तत्प्रवक्ष्यामि चित्रार्थं नानार्थपदनिश्रितम् ।
श्रूयतां नामतश्चैव कूचा(चौ)पनिषदं पुनः ॥
वृंहणं लेपनं चैव वश्यबन्धनवृष्यकम् ।
कन्याकरं रिपोर्नाशं रणे शस्त्रनिवारणम् ॥

* * * *

Colophon:

इति कूचिमारे प्रथमः पटलः ॥

End:

माषचूर्णं पलं चैव मधुना सह सर्पिषा ।
अनुपानं पयः पीत्वा वृद्धष्षोडशगो भवेत् ॥
इदं महार्थं क्षीणानां विहारार्थमुदाहृतम् ।
नराणामल्पशुक्लानां[च]मि(खि)न्नानां च प्रजार्थिनाम् ॥

Colophon:

इति कूचिमारे तृतीयः पटलः ॥

No. 3895. रतिरहस्यम्.

RATIRAHASYAM.

Substance, paper. Size, $12\frac{5}{8} \times 8\frac{7}{8}$ inches. Pages, 74. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, old.

Paricchēdas 1 to 10 complete.

Begins on fol. 137*a*. The other works herein are Rahasyatantra 1*a*, Skandāgamarahasyamantrakalpaḥ 1*a*, Ratirahasyadīpikā 174*a*, Kacchapuṭītantra 326*a*, Bhairavatantra 234*a*.

A well-known work on Kāmaśāstra by Kokkōkakavi. He says that he produced the work to satisfy the curiosity of one Vainyadatta.

Beginning :

येनाकारि प्रसभमचिराद्र्धनारीश्वरत्वं
दग्धेनापि त्रिपुरजयिनो ज्योतिषा चाक्षुषेण ।
इन्दोर्मित्रं स जयति मुदां धाम वामप्रचारो
देवः श्रीमान् भवरसभुजां दैवतं चित्तजन्मा ॥

परिजनपदे भृङ्गश्रेणी पिकाः पटुवन्दिनो
हिमकरसितच्छत्रं मत्तद्विजो मलयानिलः ।
कृशतनुधनुर्वली(ल्ली)लीलाकटाक्षशरावली
मनसिजमहाधीरस्योच्चैर्जयन्ति जगज्जितः ॥

कोक्कोकनाम्ना कृतिना कृतोऽयं श्रीवैन्यदत्तस्य कुतूहलेन ।
विलोक्यतां कामकलासु धीराः प्रदीपकल्पो वचसां निगुम्भः ॥

भूयो भूयो मुनिवरगवीरर्थदुग्धानि दुग्ध्वा
निर्मत्या(थ्या)तिप्रणिहितधियो योऽयमादाय सारः ।
स्वादुः पथ्यो ललितरमणीयौवनाभोगभोग्यो
मुख्यो देवैरपि बहि(हु)मतः सेन(व्य)तां वन्दि(पण्डि)तेन्द्राः ॥

असाध्यायास्सुसन्धिश्च सिद्धायाश्चानुरञ्जनम् ।
रमण्याश्च रतिस्सम्यक्कामशास्त्रप्रयोजनम् ॥

संसारो(रे)पटलान्ततोयतरले सारं यदेवं परं
यस्यायञ्च समग्र एव विषयग्रामप्रपञ्चो मतः ।
तत्सौक्यं(ख्यं)परतश्च(त्त्व)वेदनमहानन्दोपमं मन्दधीः
को वा विन्दति सूक्ष्ममन्मथकलावैचित्र्यमूढो जनः ॥

जातिस्वभावगुणदेशजधर्मचेष्टाभावेङ्गितेषु विकला रतितन्त्रमूढाः ।
लब्ध्वा बहिः स्खलति यौवनमङ्गनानां किन्नारिकेलफलमाप्य कपिः करोति ॥

यद्वात्स्यायनसूत्रसङ्ग्रहबहिर्भूतं किमप्यागमैः
दृष्टिर्वा(ष्टे वा)च्यमिदं मया मुनिगिरां श्रद्धा हि साधारणी ।
भावव्यञ्जितमन्यभङ्गिकथितं तत्रैव चेदस्ति य-
न्मन्दानामुपयुज्यते तदपि च स्वप्नाभिधेयीकृता ॥

अत्र प्रथमं नन्दिकेश्वरगोणिकापुत्रयोर्मतमासाद्य तयोस्सङ्ग्रहि(ही)ष्यामः परतो वात्स्यायनीयम् ।

पद्मिनीं तदनु चित्रिणीं ततः शङ्खिनीं तदनु हस्तिनीं विदुः ।
उत्तमा प्रथमभाषिता ततो योषितो युवतिरुत्तरोत्तरा ॥

कमलमुकुलमृद्वी फुल्लराजीवगन्धिः सुरतपयसि यस्यास्सौरभं दिव्यमङ्गे ।
चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे स्तनयुगलमनर्घ्यं(र्घं) श्रीफलश्रीविडम्बि ॥

End:

काकोलूक(कीयेन तु)लोम्ना होमश्च पुरुषयोस्तद्वत् ।
अनयोरसृजा होमो नाम विलिख्यैव निम्बदलैः ॥

मूषकमार्जारद्विजदिगम्बराणां च रोमभिर्धूपः ।
क्रियते वेश्मनि यस्मिन् तत्रत्यानां मिथो वैरम् ॥

सुरतरुतगरवचागुरुगदघृतलयगन्धरसधूपः ।
वेश्मनि निहितस्तेषां परस्परप्रीतिमातनुते ॥

उद्भूतः पारिभद्रादमरनरफणी(णि)प्रेयसीगीतकीर्तिः
नप्ता तेजोदनाम्नः सदसि बहुमतः पण्डितानां कवीनाम् ।
एतच्छ्रीगद्यविद्याधरकलितनयः कामुकालीरहस्यं
कोक्कोकः कामु(का)नां किमपि सुखकरं व्याकरोत्कौतुकेन ॥

Colophon:

इति सिंहलपाटलीयश्रीपण्डितश्रीकोक्कोकस्य कृतौ रतिरहस्ये योगाध्यायो नाम दशमः परिच्छेदः ॥

No. **3896.** रतिरहस्यम्.

RATIRAHASYAM.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 61. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Ratirahasyadīpikā 32*a*.

Same work as the above.

Complete.

No. **3897.** रतिरहस्यम्.

RATIRAHASYAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 129*a* of the MS. described under No. 2539.

Same work as the above.

Incomplete.

No. **3898.** रतिरहस्यम्.

RATIRAHASYAM.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 19. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 31*a*. The other works herein are Dvirūpakōśa 1*a*, Vāṇīvilāsa 12*a*.

1st Paricchēda complete; 2nd incomplete.

Same work as the above.

No. 3899. रतिरहस्यम्.

RATIRAHASYAM.

Pages, 41. Lines, 15 on a page.

Begins on fol. 129*b* of the MS. described under No. 587.

Written on one side only.

Contains three Paricchēdas only.

A work on Kāmaśāstra by Harihara, son of Rāmavidvān.

Beginning:

येनाभेदि हिमाचलेन्द्रतनयानाथस्य धैर्यं मह-
द्येनाकारि समस्तलोकविजयः पुष्पेषुभिस्सद्बुधाः(र्वदा) ।
येनात्मीयवधूजनस्य सततं दासाः कृता मूर्तये
तस्मै पान्थजनान्तकाय च नमो मत्स्यध्वजायान्वहम् ॥

ये संसारसमुद्रसारविधुरा निन्दन्ति योगीश्वरा
मत्काव्यं न तदर्थमुज्ज्वलतरं मूढाय नैतत्कृतम् ।
ये शृङ्गाररसामृतं हि सततं पीत्वा न तृप्तिं गताः
तेषां ह्ये(षामे)व मयाधुना रचयते(विरच्यतेऽद्य हि मया) शृङ्गारपूर्वे-
(र्णं)महत् ॥

काव्यानि सन्तु वहुशो ग्रथितानि पूर्वैः शृङ्गारपूर्णसरसाखिलसम्मतानि ।
उद्धृत्य सारमधुनाहमुदीरयामि काव्येषु तेषु सरलं सर(क)लाविलासम् ॥

मया विरचितं काव्यं दृष्ट्वा योगिजनस्य च ।
मानसन्तु चलत्येव किमन्ये मनुजाधिपाः ॥

नारीविहीनशयनं नवपञ्चबाणशास्त्रैर्विहीनसुरतं रसहीनवाणी ।
लज्जागुणाप्रियवियुक्तपराङ्गना चेत्येतानि षण्डरतवत्सततं वृथा स्युः ॥

रूपयौवनसंपन्ना गुणराजिविराजिता ।
कटाक्षविवशीभूतजना सा कामिनी यथा ॥

* * * *

Colophon:

इति श्रीसर्वविद्यानवद्यसहजसारस्वतानवद्यचन्द्रनामाङ्करामविद्वन्मणि-कुमारहरिहरनामकविविरचितायां श्रृङ्गारदीपिकायां रतिरहस्ये द्वितीय-परिच्छेदः ॥

कुचकचग्रहणैः करपीडनैः समणितैरतिदीर्घसुभाषणैः ।
ललितसद्रदबन्धरतोत्सवैः वनितया रमयन्ति विलासिनः ॥

End:

कण्डूतेरप्रतीकारादन्तर्लिङ्गाविमर्दनात् ।
न द्रवन्ति न तृप्यन्ति योषितो नीचमैथुने ॥

Colophon:

इति सहजसार(स्व)तचन्द्रनामाङ्करामविद्वत्कुमारहरिहरनामाङ्कविर-चिते रतिरहस्ये बन्धनिरूपणं नाम तृतीयः परिच्छेदः ॥

No. **3900.** रतिरहस्यम्.

RATIRAHASYAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 3893.
By Harihara.
Breaks off in the 47th stanza of 1st Pariccheda.
Same work as the above.

No. **3901.** रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Pages, 97. Lines, 26 on a page.

Begins on fol. 174*a* of the MS. described under No. 3895.

Parichēdas 1 to 9 complete; 10th incomplete.

This is a commentary by Kāñcīnātha on the Ratirahasya of Kokkōka.

Beginning :

नत्वा महागणपतिं कोक्कोककृतस्य रतिरहस्यस्य ।
क्रियते दर्शितभावा काञ्चीनाथेन दीपिका सुधिया ॥

इह हि काव्यनाटकालङ्कारप्रभृतिसकलकलाकलापनिष्णातो वाग्विलासजितबृहस्पतिः कोक्कोकनामा कविः नन्दिकेश्वरश्वेतकेतुपाञ्चालदत्तकपारायणसुवर्णनाभघोटकमुखगोनर्दगौणीरापुत्रकूचिमारवात्स्यायनप्रभृतिभिः कृतेभ्यश्शास्त्रेभ्यस्सारमादाय रतिरहस्याख्यं ग्रन्थमारभमाणः प्रस्तुतदेवतापूजया निर्विघ्नमिच्छन् मकरध्वजं स्तौति । प्रजापतिः प्रजास्सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गसाधनं शास्त्रमध्यायानां शतसहस्र(ा)णित्र(त)त्रोवाच । तस्यैकदेशं स्वायंभुवो मनुः धर्माधिकारिकं पृथक् चकार । बृहस्पतिरर्थाधिकारिकं (चक्रे । ततो) भगवतस्सुरासुरमौलिघटितकिरीटमणिप्रभादीप्तपादारविन्दस्य पार्वतीपतेरनुचरेण नन्दिकेश्वरेण सहस्रेणाध्यायानां पृथक्कामशास्त्रं प्रोक्तम् । तदेव तु प(ञ्चभिः) अध्यायशतैरौद्दालकिः श्वेतकेतुः सं(चि)क्षेप । [तस्]तदेव तु पुनरध्यर्धेनाध्यायशतेन साधारणसांप्रयोगि(क)कन्यासंप्रयोगभार्याधिकारिकपारदारिकवैधि(शि)कौपसर्जनै(निषदिकैः) सप्त(सप्तभिर)धिकरणैर्भा(र्बा)भ्रव्यः पाञ्चालश्चकार । तस्य षष्ठं वैधि(शि)कमधिकरणं पाटलीपुत्रिकाणां गणिका(नां नि)योगात् दत्तकः पृथक्चकार; तत्संप्रयोगात् पारायणस्साधारण(णं)च, सुवर्णनाभिस्सांप्रयोगिकं, घोटमुखः कन्यासंप्रयुक्त(कं), गोनर्दीयो भार्याधिकारिकं, गोणिकापुत्रः पारदारिकं, कूचिमार औपनिषदिकम् । वात्स्यायनश्च सप्तभिरधिकरणैस्सर्वं प्रोवाच । एवमनेकैराचार्यैस्तच्छास्त्रं बाभ्रव्योक्तं खण्डशः प्रणीतमुत्कल्यमभवत् । एवमेते लोकहिताय कृतवन्तः । तथाहि महतां प्रवृत्तिर्लोकहितायैव यथा पञ्चानां भूतानां प्रवृत्तिः । प्रस्तुतिभाजो विश्वस्य स्त्रीपुं-

साभ्यामेव निष्पन्नत्वात् कामस्य पुरुषार्थत्वेन च पितृऋणविमोचनहेतुभूतां(तायाः) सन्ततिं(तेः) प्राप्य(त्वेन) च महापुरुषप्रणीतत्वात् च शास्त्रमिदं सर्वहितमिति कोक्कोकनामा कविः विश्वमतिविभवेन रतिरहस्यं कृतवान् । न(त)र्हि नन्दिकेश्वरादिप्रणीतेषु शास्त्रेषु विद्यमानेषु किमनेनेति चेत् तत्र महत्त्वान्नन्दिकेश्वरश्वेतकेतुबाभ्रव्यप्रणीतानां दुरादेयत्वं(त्वात्)दत्तकादिभ्यः(भिः) प्रणीतानां शास्त्राणामेकदेशत्वाच्च वात्स्यायनप्रणीतस्य महत्वं(त्त्वात्) गूढार्थत्वात्तर्कबाहुल्यात् बालानां दुर्ग्रहत्वेक(न) च तेभ्यस्सारमादाय प्रकाशितार्थं सुबोधमुपयुक्तांशमय(मिद)मित्यारम्भणीयम् । येनाकारीत्यादि । येन चित्तजन्मना त्रिपुरजयिनोऽर्धनारीश्वरत्वमकारि, स जयतीति क्रियाकारकसंबन्धः ।

* * * *

Colophon:

इति काञ्चीनाथकृतौ रतिरह्यति(हस्यदीपि)कायां पारदारिको नाम नवमः परिच्छेदः ॥

इतः परं योगाध्यायः— दृष्ट्वानेक इत्यादि । सूत्रपदप्रोक्तैः विधि(भिर)भिप्रेतमर्थमनधिगच्छन् पतिकौ(रौ)पनिषदिकमर्थमाचरेत्—इति वात्स्यायनः । अनेकविधां(धानि)बहुप्रकाराणां(णि)नन्दिकेश्वरप्रणीतानि मन्मथकलाशास्त्राणि ना(का)मकलाशास्त्राणि । शब्दार्णवं कीदृशं हेद्दिनं(सोड्ढिनम्) टह्दि(उड्ढि)नाख्येन ग्रन्थेन सहितम् । सकलां संपूर्णां हरमेखलाञ्च योगावलीनां शतं तिस्रो वैद्यकसंहिताश्च दृष्ट्वा बहुविधान् शैवागमान् आलोच्य पूर्वोक्तानि सर्वाण्यालोच्य महाजनहितं बहुजनहितमध्यायं संक्षेपतोऽहं वक्ष्य . . . . . . णादीनामध्यायं वक्ष्यामि ।

End:

आत्रेत्यादि । आत्मनः प्रयोक्तुर्बीजं रेतः आत्रैर्जर्झ(रि)तस्य च एकस्य दरे उदरमध्ये निवेशितं विक्षिप्तं कृत्वा, अथ वज्रादेकं स्वमन्त्रं

दत्वा अथ शरावयुगसंपुटं कृत्वा [शरावयुगसम्पुटं कृत्वा शरावयुगसंपुटीकृत्य] तन्मध्ये निक्षिप्य सप्ताहं सप्तदिवसं चुल्ल्या अश्मन्तकस्य उदरे निधाय दहेत् । तद्रसघुटिकां विधाय भक्ष्यविधौ दत्वा पुरुषः वसिष्ठभार्यामरुन्धतीमपि वाकर्षति वशेदिति । वशिदं(शीन्द्रं)वशयतीत्यर्थः.

No. 3902. रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 3896.

Paricchēdas 1 to 9 complete; 10th incomplete.

Same work as the above.

No. 3903. रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Substance, palm-leaf. Size, $9\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 179. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Parichēdas 1 to 8 complete; 9th incomplete.

Same work as the above.

No. 3904. रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Pages, 124. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 3888.

First 8 Paricchēdas complete.

This contains the work of Kokkōka and the commentary Ratirahasyadīpikā by Kāñcīnātha.

No. 3905. रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 71. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Paricchēdas 1 to 5 complete ; 6th incomplete.

Same work as the above.

No. 3906. रतिरहस्यदीपिका.

RATIRAHASYADĪPIKĀ.

Pages, 175. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under No. 3891.

Same work as the above.

No. 3907. रतिरहस्यप्रकाशिका.

RATIRAHASYAPRAKĀŚIKĀ.

Substance, paper. Size, 11½ × 7¾ inches. Pages, 151. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 158*b*. The other works herein are :—Dadhīcisaṁhitā 1*a*, Mahānyāsa 66*b*, Mahimnasthavavyākhyā 73*a*, Mātṛkācakra (commentary) 106*a*, Śrīvidyāratnasūtra 142*a*, Kāmakalāsūtra 240*b*, Kāmakalāsūtravyākhyā 246*a*.

Paricchēdas 4 (from the 17th stanza) to 10 (163 stanzas).

This contains the work of Kokkōka and a commentary called Ratirahasyaprakāśikā by Rāmacandra Budhēndra.

Beginning:

मानोब्ज(ज्झि)तादि(ति)बहुभुक् प्रकहिम्न(दुष्ण)गात्री
भुङ्क्ते च मध्वपि(घपिशिता)दि पिशाचसत्त्वा ।

दृष्टिं मुहुर्भ्रमयति प्रबलाशनार्ति-
(रु)द्वेगमेति विपुलं ति(कि)ल काकसत्त्वा ॥

मानोज्झिता मानेन त्यक्ता अतिबहुभुक् अत्यन्ताधिकभोजना प्रकहिम्ण(दुष्ण)गात्री अत्युष्णदेहा मद्यपिशितादि मद्यमांसादि बहु बह्वाहारं भुङ्क्ते। एवंविधा पिशाचसत्त्वा दृष्टिं मुहुः भ्रमयति चालयति । प्रबलाशनार्तिः (ब)हुलबुभुक्षा विपुलमधिकमुद्वेगं सन्त्रासम् एति गच्छति सा काकसत्त्वा ।

* * * *

Colophon:

इति श्रीसिंहलपाटलीयपुत्रपण्डितश्रीकोक्कोककृतौ रतिरहस्ये सामान्यधर्माधिकारो नाम चतुर्थः परिच्छेदः ॥

* * * *

इति श्रीमदापञ्चकुलकलशाब्धिपूर्णचन्द्र(न्द्रे)ण रामचन्द्र(न्द्रेण) विरचितायां रतिरहस्यप्रकाशिकायां सामान्यधर्माधिकारो नाम चतुर्थः परिच्छेदः ॥

* * * *

Colophon:

इति सिंहलपाटलीयपण्डितश्रीकोक्कोककृतौ रतिरहस्ये बाह्यरताधिकारो नाम पञ्चमः परिच्छेदः ॥

* * * *

इति श्रीमदापञ्चकुलकलशाब्धिपरिपूर्णचन्द्रश्रीरामचन्द्रबुधेन्द्रविरचितायां रतिरहस्यप्रकाशिकायां पञ्चमः परिच्छेदः ॥

* * * *

Colophon:

इति सिंहलपाटकीयपण्डितश्रीकोक्कोककृतौ रतिरहस्ये परदाराभियोगो नाम नवमः परिच्छेदः ॥

* * * *

इति श्रीमदापस्तम्बकुलकलशाब्धिपरिपूर्णचन्द्रेण श्रीरामचन्द्रबुधेन्द्रेण विरचिता(यां)रतिरहस्यप्रकाशिका(यां) नवमः परिच्छेदः ॥

योगिध्येयपदाब्जस्य योगानन्दस्वरूपिणः ।
नियोगाज्जानकीजानेर्योगाध्यायो विमु(वि)च्यते ॥

अथेदानीमुक्तकामतन्त्रोपकारकं योगाध्यायं सप्रपञ्चं निरूपयितुं प्रतिजानीते—

दृष्ट्वानेकविधानि मन्मथकलाशास्त्राणि शब्दार्णवं
सोदी(ड्डी)नं हरमेखलां च निखिलां योगावलीनां शतम् ।
तिस्रो वैद्यकसंहिता बहुविधानालोच्य शैवागमा-
न्योगाध्यायमहं महाजनमतं वक्ष्यामि सङ्क्षेपतः ॥

दृष्ट्वेति ।

End :

कुरुते परिणतवयसं वनितां त्रिस्सप्तरात्रेण ।
स्थिरविपुलकठिनतुङ्गस्तनयुगलां त्वस्य योगेन ॥

युवतीति । युवतिः फलिनी वचा उग्रगन्धा कटुकं त्रिकटुकं कटुकरोहिणी नाम ग्रन्ध्य(गन्ध)द्रव्यं वा । एतदन्वितः कृताञ्जलिर्लज्जालुः रजनिहारी.

No. 3908. रतिरहस्यप्रकाशिका.

RATIRAHASYAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 146. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

By Rāmachandrabudhēndra.

Parichēdas 4 (from the 17th stanza) to 10 (163 stanzas). This has been restored as number 3907.

Same work as the above.

No. **3909.** वात्स्यायनसूत्रम्.

VĀTSYĀYANASŪTRAM.

Pages, 10. Lines, 31 on a page.

Begins on fol. 57*a* of the MS. described under No. 2049.

Adhikaraṇa 1 complete; In the 2nd Adhikarṇa 1 to 3 Adhyāyas complete, 4th incomplete.

By Vātsyāyana.

This is a well-known work on Kāmaśāstra.

Beginning:

धर्मार्थकामेभ्यो नमः शास्त्रे प्रकृतत्वात् । तत्समयावबोधकेभ्यश्चाचार्येभ्यस्तत्संबन्धात् । प्रजापतिर्हि प्रजास्सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गसाधनं शास्त्रमध्यायानां शतसहस्रेणाग्रे प्रोवाच । तदेव तु पञ्चभिरध्यायशतैरौद्दालिक(लकिः) श्वेतकेतुरसञ्चिक्षेप । तदेव तु पुनरध्यर्धेनाध्यायशतेन साधारणसांप्रयोगिककन्यासंप्रयुक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदिकैस्सप्तभिरधिकरणैर्बाभ्रव्यः पाञ्चालश्चकार । तस्य वैशिकं षष्ठमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगात् दत्तकः पृथक् चकार । तत्प्रसङ्गात्पारायणस्साधारणं प्रोवाच; सुवर्णनाभस्सांप्रयोगिकं, खोर्द(घोट)कमुखः कन्यासंप्रयुक्तकं, गोनर्दीयो भार्यादि(धि)कारिकं, गोणिकापुत्रः पारदारिकं, कुचु(कूचि)मार औपनिषदिकञ्चेति । एवमनेकैराचार्यैस्तच्छास्त्रं खण्ड(श)स्संप्रणीतमुत्सन्नकल्पमभवत् । तत्र दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वान्महदिति बाभ्रवीयस्य दुरध्येयत्वात्संक्षिप्य सर्वमर्थमल्पेन ग्रन्थेन कामसूत्रमिदं प्रणीतं वात्स्यायनेन । तस्यायं प्रकरणाधिकरणसमुद्देशः । तद्यथा—

शास्त्रस्य संग्रहः; त्रिवर्गस्य प्रतिपत्तिः; विद्यासमुद्देशः; नागरिकवृत्त[स]नायु(य)कसहायदूतिकर्मविधि(मर्श):—इति साधारणं प्रथममधिकर-

णमध्यायाः पञ्च । प्रमाणकालभावेभ्यो रतावस्थापनम्; प्रीतिविशेषात्(:); उभ(प)गूहनविचारात्(:); चुम्बनविकल्पात्(:); नखरदनजातय त्(:); दशनच्छेद्यविधयः; देश्योपचाराः; संवेशनप्रकाराः; चित्ररतानि; प्रहणनयोगाः; तत्कृताश्च सीत्कृतं(तोप)क्रमात्(:); पुरुषायितम्; पुरुषोपसृप्तकानि; औपरिष्टकम्; रतारम्भावसानिकम्; रतविशेषाः; प्रणयकलहश्च – इति सांप्रयोगिकं द्वितीयमधिकरणम् अध्याया दश । वरणसावधानम्; संबन्धनिश्चयः; कन्याविस्रम्भणम्; बालायामुपक्रमाः; इङ्गिताकारसूचनम्; एकपुरुषाभियोगं(गः); प्रयोज्यसे(स्यो)पावर्तनम्; अभियोगतः कन्यायाः प्रतिपत्तिः विवाहयोगाः – इति कन्यासंप्रयुक्तकं द्वितीयमधिकरणम् अध्यायाः पञ्च । एकचारिणीवृत्तम्; प्रवासचर्या; सपत्नीषु ज्येष्ठावृत्तं, कनिष्ठावृत्तं, पुनर्भूवृत्तं, दुर्भगावृत्तम्, अन्तःपुरिकम्; पुरुषस्य बह्वीषु प्रतिपत्तिः – इति का(भा)र्याधिकारीकि(रिक)श्चतुर्थमधिकरणम् अध्यायौ द्वौ । स्त्रीपुरुषशीलावस्थापनम्; व्यावृत्तिकारणानि; स्त्रीषु विद्धात्(सिद्धाः) पुरुषात्(:); अवत्त(यत्न)साध्याश्च योषितः; परिचयकारणानि; अभियोगाः; भावपरीक्षा; दूतिकर्माणि; ईश्वरकामितकम्; अन्तःपुरिकावृत्तम्; दाररक्षितकम् – इति पारदारिकं पञ्चममधिकरणम् अध्यायाष्षट् । सहायगम्यगमनकारणचिन्ता; गम्योपावर्तनविधिः; कान्तानुवर्तनम्; अर्थागमोपायाः; विरक्तलिङ्गानि; विरक्तप्रतिपत्तिः; निष्कासनक्रमाः; विशीर्णप्रतिसन्धानम्; लाभविशेषाः; अनुबन्धार्थानर्थसंशयविचाराः; वेश्याविशेषाः – इति(वैशिकं) षष्ठमधिकरणम् अध्यायाष्षट् । सुभगङ्करणम्; वशीकरणम्; वृष्याश्च योगाः; नष्टरागप्रत्यानयनम्; वृद्धिविधयः; चित्रयोगाः – इत्यौपनिषदिकं सप्तममधिकरणम् अध्यायौ द्वौ । इति षट्त्रिंशदध्यायाः । चतुःषष्टिः प्रकरणानि सप्ताधिकरणानि । सपादं श्लोकसहस्रम् ।

इति शास्त्रस्य सङ्ग्रहः ॥

सङ्क्षेपमि(म)मुक्त्वाऽस्य विस्तरोऽतः प्रवक्ष्यते ।
इष्टं हि विदुषां लोके समासव्यास[साधा]रणं(भाषणम्) ॥
इति साधारणे प्रथमाधिकरणे शास्त्रसङ्ग्रहः प्रथमोऽध्यायः ॥

* * * *

Colophon:

इति सांप्रयोगिकद्वितीयेऽधिकरणे तृतीयोऽध्यायः ॥

आदितोऽष्टमः ॥

(रागवृद्धौ)सङ्घर्षात्मकं नखविलेखनम् । तस्य प्रथमसमागमे प्रवा-सप्रत्यागमने ।

End:

आकृतिविकारयुक्तानि चान्यानि । विकल्पानामानन्त्यादनन्तत्वाच्च कौशलविधेरभ्यासस्य च सर्वगामित्वाद्रागात्मकत्वाच्च नखच्छेद्यस्य कोऽत्र प्रकारानभिसमीक्षितुमर्हति ॥

No. 3910. वात्स्यायनसूत्रम्.

VĀTSYĀYANASŪTRAM.

Substance, palm-leaf. Size, $12\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 14. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

No. 3911. वात्स्यायनसूत्रम्.

VĀTSYĀYANASŪTRAM.

Pages, 24. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1890.

Incomplete. Wants beginning.

Same work as the above.

No. 3912. वात्स्यायनसूत्रम्--सव्याख्यानम्.

VĀTSYĀYANASŪTRAM: WITH COMMENTARY.

Substance, paper. Size, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Pages, 443 Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete 7 Adhikaraṇas only.

The commentary is by one Bhāskara-Nṛsiṁhaśāstrin, a resident of Benares.

Beginning:

डुण्डिः प्रोद्दण्डगण्डस्थलयुगविगलद्भूरिदानाम्बुधारा-
माधुर्यास्वादमत्तभ्रमरगलगलज्झङ्कियालङ्क्रियै मे ।
दुग्धाम्भोराशिमध्यप्रचलदविरलप्रौढवीचीचयाना-
माचार्यान्वाङ्निगुम्भान्वितरतु नितरां कामशास्त्रार्थवक्त्रे ॥

श्रीसिद्धेश्वरि तावकाङ्घ्रिनृपतौ कान्तिप्रतापान्विते
छत्रादिस्फुरिते कवीश्वरमनस्सिंहासनाध्यासिनि ।
धामोद्यन्मणिसौधति श्रितजनः सेनाधिनाथत्यसौ
नित्यं श्रीयुवराजति क्षितिभुजो दासन्ति तस्याद्भुतम् ॥

वत्सोपरि वात्सल्यात् वात्स्यायन[ना]माप्य कामशास्त्रं यः ।
चक्रे चक्रधरन्तं वन्दे वन्दारुबृन्दमन्दारम् ॥

धर्मार्थोपरि विलसन्मोक्षादभ्यर्हितः पूर्वः ।
सकलजगज्जनिहेतुः पुरुषार्थश्रेष्ठ आत्मभूर्जयति ॥

एकातपत्रं रजनीशबिम्बं नितम्बिनी राज्यमळिश्च वन्दी ।
स्तोत्राणि वात्स्यायनसूत्रजालं यस्यास्त्यसौ भाति स कामराजः ॥

अमन्दानन्दसन्दोहसंदायकधुरंधरः ।
स्मरराजो राजसखा राजते राजपूजितः ॥

श्रीसर्वेश्वरशास्त्रिसद्गुरुमहाकारुण्यसाहाय्यतः
श्रीराजन्नजलालसादरमुहुस्संप्रेरणादीक्षणात् ।
श्रीकाश्यां नरसिंहशास्त्रिकविना कन्दर्पचूडामणेः(णिः)
श्रीवात्स्यायनसूत्रवृत्तिरखिलप्रौढप्रिया लिख्यते ॥

श्रीमद्भास्करवंशवारिधिविधून् षट्शास्त्रवेदस्मृति-
श्रौताल्या(द्या)गमकाव्यनाटकमुखप्रोत्कृष्टविद्याप्रदान् ।
पूज्याण्णङ्गणयज्व(स)त्कृति(वि)सुतान्नत्वा नृसिंहस्सुधीः
श्रीवात्स्यायनसूत्रवृत्तिमखिलप्रीत्यै करोति क्रमात् ॥

* * * *

श्रीवात्स्यायनवीरभद्रमुखसद्ग्रन्थामृताम्भोनिधे-
र्युक्तयाख्यान् पृषतोऽद्य(तान् हि)कांश्चन समानीयाहमज्ञोऽपि वा ।
वृत्तिं काञ्चन कल्पयन्न(न्क)विपदं प्राप्नोमि यद्वद्भुवि
क्षुद्रा सा मधुकृत्पदं सुमनसस्सारस्य संमेलनात् ॥

श्रीभद्रप्रदरामचन्द्रदयया वाणी ममास्यादपि
प्रोद्यद्भावरसान्वितातिसरला प्रासैर्युताविर्भवेत् ।
वीणारोपितसद्गुणापि विरसाप्यत्यन्तमत्यद्भुत-
क्वाणैर्वाचयितृप्रभाववशतः सन्तोषदात्री न किम् ॥

पुरुषत्रये त्रिधास्ते वदने वक्षःस्थलेऽङ्कदेशे या ।
राजन्नजलालविभोर्मुखगृहचित्तेषु साम्बिकास्तु सदा ॥

रसगुणगणनाध्यायाः प्रकरणसंख्याऽब्धिदेहगाज्ज(म्बुराशिराग)मिता ।
साङ्ग्रिसहस्रं श्लोका अधिकरणं सप्त कामशास्त्रेऽस्मिन् ॥

अर्थो धर्मप्रापकस्यापि हेतुः स्वर्गप्रा(स्या)प्तौ स्वर्गनामैव कामः ।
अज्ञातात्यानन्दरूपाच्च मोक्षात् ज्ञातानन्दः काम उच्चैः पुमर्थः ॥

ओम्—

"धर्मार्थकामेभ्यो नमः"

अत्रभवान्वात्स्यायनः ब्रह्मानन्दाभिव्यञ्जकवृत्तिविशेषतया समाधेरिव कामस्य परमपुरुषार्थतां, निषेधशास्त्रस्य तत्स्वरूपानभिज्ञविषयतां, धर्मार्थयोश्च यागस्य प्रोक्षणावघातयोरिव सन्निपत्योपकारकतां, स्त्र्यन्नपानादेश्च सत्सङ्गादेरिव तत्साधनताम्, आनन्दाभिव्यञ्जकतया मोक्षादप्यभ्यर्हिततमतां च पश्यन्निष्प्रयोजनत्वामूलकत्वाशिष्टपरिगृहीतत्वादिदोषान्क्रमेण वारयन् विघ्ननिवर्तकं ब्रह्मानन्दानुसन्धानलक्षणमङ्गलञ्च शिष्यशिक्षायै प्रेक्षावत्प्रवृत्तयेऽनुबन्धचतुष्टयं च सूचयन् साङ्गं परमपुरुषार्थं निर्दिशति । तत्र धर्मत्वमलौकिकप्रवर्तकत्वमिति भाट्टाः; यागादिजन्यापूर्वत्वमिति प्राभाकरादयः । राजाज्ञादिव्यावृत्तयेऽलौकिकपदम् । प्रतिग्रहादिसाध्यत्वमर्थत्वम् । यद्यप्यर्थ्यत इति व्युत्पत्त्या सर्वस्याप्यर्थत्वं प्रतीयते; तथापि निर्मन्थ्याधिकरणन्यायेन योगाद्रूढेः प्रबलत्वात् पङ्कजादिशब्दवद्योगरूढ्या द्रव्यादिपरत्वमेव । कामत्वञ्चानन्दाभिव्यञ्जकवृत्तिविशेषत्वम् । योगादिजन्यावृत्तये विशेषपदम् । निरूपकत्वं विभक्त्यर्थः । अपकृष्टत्वप्रकारकज्ञानं नमश्शब्दार्थः ।

End:

तदेतद्ब्रह्मचर्येण परेण च समाधिना विहितं लोकयात्रार्थं न रागार्थोऽस्य संविधिः । लोकयात्रा लोकोपकारः रागार्थः रागहेतुकः । अस्य शास्त्रस्य संविधिः कृतिः । अनेन रागादिदोषशून्यमहर्षिप्रणीतत्वं सूचितम् ।

रक्षेद्धर्मार्थकामानां स्थितिं स्वां लोकवर्तिनीम् ।
अस्य शास्त्रस्य तत्त्वज्ञो भवत्येव जितेन्द्रियः ॥

लोकवर्तिनीं लोकप्रतियोगिकां लोकेभ्य इति यावत् । जितेन्द्रियः इन्द्रियालम्पटः चतुरः स्त्र्यनधीन इति यावत् ।

तदेतत्कुशलो विद्वान् धर्मार्थानवलोकयन् ।
तानि रागात्मकः कामी प्रयुञ्जानः प्रसिध्यति ॥

धर्मार्थौ कामश्च तत् अ(त)स्मात् अवलोकयन् जानन् कुशलः विलासिनीनां वभावज्ञाने अतिरागात्मकः तद्विलासैरतिरक्तः कामी तदिच्छुः प्रयुञ्जानः स्वयंप्रयोक्ता वा न प्रसिध्यति न भवति, किं तु तासां स्वभावज्ञस्सन् धर्मार्थकामान् संपूर्णान् समृ(म्य)गश्नुते शास्त्रतत्त्ववित् ॥

Colophon:

इति श्रीकविपदवाक्यमानतत्त्वज्ञश्रीकाशीनगरनिवासिभास्करनृसिंहशास्त्रिविरचितवात्स्यायनीयकामसूत्रवृत्तौ औपनिषदिके सप्तमेऽधिकरणे द्वितीयोऽध्यायः ॥

नष्टरागप्रत्यायनं वृद्धिविधयश्च चित्राश्च योगाः । आदितष्षट्त्रिंशः । समाप्तश्चेदमौपनिषदिकं सप्तममधिकरणम् । शास्त्रञ्च संपूर्णम् ॥

भास्करनृसिंहशास्त्री शास्त्रेष्टार्थप्रदेशकारुण्यात् ।
वात्स्यायनसूत्राणां वृत्तिं बुधहर्षवृद्धये व्यतनोत् ॥

काशीशं श्रित उल्लसद्धतियुतोऽयं धर्मशास्त्रे तथा
वाणीं व्याकुरुते कृतेतरगिरं मीमांसते चोभयीम् ।
पान्थः काव्यपथे तथा परिचितः कामागमे चेति मां
ग्रन्थो वक्ष्यति तत्कृतः प्रथयते नो वार्पितोऽस्मिन्भरः ॥

अथैतत्प्रबन्धास्तथाध्यापनोक्ता विनोपाधिमस्मिन् विधेयेऽधिकारी ।
असादु(धु)प्रयोगान्विसन्धीन् प्रबन्धे दयातो बुधास्साधु संशोधयन्तु ॥

नूत्ना वृत्तिरितीर्ष्यया विरहिताः पाण्डित्यपारङ्गताः
तत्कामाश्च कृपालवोऽत्र रसिकाः पश्यन्त्यवश्यं कृतिम् ।
यद्वा विद्वदधीशभक्तकलितक्षीरप्रसूनप्रियो
विश्वेशः कृतिकारकः कृतिहितः कृत्यानया तुष्यति ॥

प्राचीनैः कविभिः कृताः कतिचन ग्रन्थाः प्रसिद्ध्यै ततः
कार्या काचन सांप्रतं कृतिरिति ग्रन्थो मया नो कृतः ।
किन्तु प्रौढरसज्ञतोषणकृते तत्प्रेरणादीश्वर-
प्रीत्यर्थं स इहार्थितार्थदपदः कृत्यानया प्रीयताम् ॥

भास्करनृसिंहशास्त्री शास्त्री सर्वेश्वरोऽर्चितो येन ।
अधिकाशि पुस्तकं सोऽलिखदखिलं चैतदात्मपरतुष्ट्यै ॥

CLASS VII.—SYSTEMS OF INDIAN PHILOSOPHY.

1. NYĀYA.

A.—COMPREHENSIVE TREATISES.

No. 3913. अनुगममालिका.
ANUGAMAMĀLIKĀ.

Substance, palm-leaf. Size, 13⅝ × 1⅜ inches. Pages, 7. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 17*a*. The other works herein are Viśiṣṭāntarāghaṭitatvavicāra 1*a*, Dīpikāvyākhyā 11*a*.

Deals with a process of comprehensive and continuous definition in logic.

Incomplete.

Beginning:

रमया मनसा(वनमा)लया च दीप्ते रविकोट्युज्ज्वलकौस्तुभातिरम्ये ।
रघुनाथ मयार्पितांनि(तामु)रस्य (प्य)नुगत्युत्तममालिकां निधेहि ॥

यत्पदं यद्धर्मावच्छिन्नपरम्; अग्रे तत्पदमपि तद्धर्मावच्छिन्नपर-मिति । अभावत्वविशिष्टधर्मवत्त्वं तस्यानुगतोऽर्थः । अभावत्ववैशिष्ट्यम्—आधेयतासम्बन्धेन । आधेयता च—स्वसमानाधिकरणभेदप्रतियोगिता-वच्छेदकत्वसम्बन्धावच्छिन्नस्वानिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्ब-न्धेन । स्वाधिकरणत्वम्—स्वविशिष्टाभावत्वसम्बन्धेन । अभावे स्ववै-शिष्ट्यं च स्वावच्छिन्नसामानाधिकरण्यस्वसमानकालीनप्रकृतसाध्यताव-च्छेदकविशिष्टत्वोभयसम्बन्धेन ।

End:

यद्यपि गगनात्मकाभावमादायासम्भव एव सम्भवति; तथापि य-त्सामानाधिकरण्यघटकवृत्तिमत्त्वमात्रनिवेशेनापि तद्वारणं भवतीति तदुपेक्षि-तम् ! यद्यपि चरमक्रियात्मकाभावमादाय वह्निमान् धूमादित्यादावव्य-व्याप्तिस्सम्भावति; तथापि तदुपेक्षाबीजं ग्रन्थकृदै(तैव)वक्ष्यत इति न दोषः ॥

No. 3914. अनुमानपरिच्छेदः.
ANUMĀNAPARICCHĒDAḤ.

Substance, palm-leaf. Size, 14⅝ × 1⅜ inches. Pages, 10. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

A treatise in verse on Anumâna, a portion of Nyāya logic dealing with inference; by Śrīnivāsa *alias* Paramāṇumiśra, a pupil of Vēdāntavīrarāghavācārya.

Complete.

Beginning:

अनुमानन्त्वनुमितेः करणं कीर्तितं बुधैः ।
कथ्यतेऽनुमितिस्तत्र परामर्शभवा मतिः ॥
व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ।
यथा शैलोऽनलव्याप्यधूमवानिति निश्चयः ॥
तज्जन्यानुमितिश्शैलो वह्निमानिति निश्चयः ।
व्याप्तिर्हेतोस्साहचर्यं साध्येनाव्यभिचारिणा ॥

End:

अतोऽसिद्धिविरुद्धादेर्हेत्वाभासत्वमक्षतम् ।
सम्यग्घेतुविवेकाय हेत्वाभासा इहोदिताः ॥

Colophon:

श्रीमद्वीररघूद्वहश्रुतिशिखाचार्याख्ययोगीशितुः
पादाम्भोजरजोऽणुमिश्रणवशादन्वर्थया संज्ञया ।
प्रख्यातः परमाणुमिश्र इति यश्श्रीश्रीनिवासस्सुधीः
तेनेत्थं नृहरिर्न्यरूपयदनूमानम(न्तद)स्यां कृतौ ॥

No. 3915. अनुमानपरिच्छेदरहस्यम्.
ANUMĀNAPARICCHĒDARAHASYAM.

Substance, palm-leaf. Size, 17¾ × 1⅜ inches Pages, 98. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Svaprakāśavādārtha 50*a*, Tattvacintāmaṇi 64*a*.

Wants beginning: ends with Kēvalānvayīrahasya which is complete. The work as a whole is incomplete.

A treatise on the Anumāna-portion of the Nyāya system of philosophy. Author unknown.

Beginning:

सिषाधयिषेति । सिषाधयिषाविरहसहकृतं तद्विरहविशिष्टं यत्साधकमानरूपं साध्यनिश्चयः तदभावो यस्मिन् पुरुषे अस्ति स पक्षः । पक्षपदं(द)परिभाषाविषयतावच्छेदकानुमितिजनकधर्मवानित्यर्थः । तथा च विशेषणताविशेषसम्बन्धेन समवायसम्बन्धावच्छिन्नप्रतियोगिताकनिरुक्तसाध्यनिश्चयाभाववत्त्वमनुमितिजनकं पक्षत्वमिति वाच्यम् ।

End:

ननु उभयथापि केवलान्वयिनि विपक्षासत्त्वज्ञानं विना कथं व्याप्तिग्रहः? तस्य तद्धेतुत्वादित्यत आह व्यतिरेकश्चेति । अर्थस्तु पूर्ववदित्याहुः ॥

Colophon:

अनुमानपरिच्छेदरहस्ये केवलान्वयिरहस्यम् ॥

No. 3916. अनुमानप्रकरणम्.

ANUMĀNAPRAKARAṆAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 64. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 21*a*. The other works herein are Asatkhyātikhaṇḍana 1*a*, Nañvivēka 5*a*, Nañpradīpa 7*b*, Sāṅkaryakhaṇḍana 53*a*, Parāmarśavāda 71*a*.

Incomplete.

This is also a treatise on the Anumāna portion of the Nyāya system of philosophy.

Author unknown.

Beginning :

अनुमितिं प्रति पर्वतीयधूमव्यापको वह्निरित्याकारकपरामर्श एव हेतुः; न तु वह्निव्यापकधूमवान् पर्वत इत्याकारकः तस्य हेतुत्वे कारणताव-च्छेदककोटौ व्यापकसामानाधिकरण्यरूपव्याप्तिघटकीभूतसामानाधिकरण्या-दिपदार्थानां विषयतानिवेशाधिक्येन गौरवादिति व्यापकताज्ञानहेतुतावा-दिनः । अथैतन्मते यत्र पर्वतीयधूमसमानाधिकरणाभावप्रतियोगिताव-च्छेदकं(क)त्वत्वावच्छिन्नाभावघटितपर्वतीयधूमत्वावच्छिन्ननिरूपिता व्याप-कता न वह्नौ गृहीता; अपि तु धूमसमानाधिकरणाभावप्रतियोगितावच्छेद-कत्वसामान्याभावघटितधूमसामान्यव्यापकतैव ।

End :

घटादिप्रत्यक्षं प्रति तथाविधानुमितिसामग्र्याः प्रतिबन्धकत्वे कल्प-नीये प्रत्यक्षत्वादिकं प्रतिबध्यतावच्छेदककोटौ निवेश्य तादृशसामग्री-विशिष्टान्यत्वावच्छिन्नं प्रति तादृशसामग्रीत्वेन(प्रतिबन्धकत्वकल्प)ने(न) क्लृप्तेन निर्वाहसम्भवात् । न चोपदर्शितसामग्रीसंवलनदशायां सामान्यसामग्री-बलादेकसामग्रीविशिष्टस्यापरस्यापरस्या.

No. 3917. अनुमानप्रकरणम्.

ANUMĀNAPRAKARAṆAM.

Pages, 60. Lines, 11 on a page.

Begins on fol. 11*a* of the MS. described under No. 1388.

Pakṣatāvāda complete.

Same work as the above.

No. 3918. अन्यथाख्यातिविचारः.

ANYATHĀKHYĀTIVICĀRAḤ.

Substance, palm-leaf. Size, 16½ × 1¼ inches. Pages, 17. Lines, 7 on a page. Character, Grantha. Condition, injured Appearance, old.

Begins on fol. 26*a*. The other works herein are:—Padārthatattvam 1*a*, Padārthatattvavyākhyā 7*a*, Prāgabhāvavicāra 35*a*, Prāgabhāvavāda 44*a*.

Complete.

This is a treatise on the illusory character of the psychological process of perception.

Beginning:

सन्निकर्षदशायां रजतमिदमित्याकारकं शुक्तिरजतयोर्ग्रहणस्मरणात्मकं ज्ञानद्वयमेव जायते, न तु शुक्तौ रजतत्वप्रकारकं ज्ञानम्; ज्ञानमात्रस्य रजतान्यविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वाभावनियमस्य विना बाधकं त्यक्तुमशक्यत्वात् । अबाधितार्थमन्तर्भाव्यैव परामर्शतात्पर्यज्ञानादीनामनुमितिशाब्दबोधादिकं प्रति हेतुतया बाधितार्थस्थले अनुमित्यादेरसत्त्वेन तत्र वि(व्य)भिचारायोगात् ।

End:

तत्र पक्षसाध्योभयविषयकत्वेन एकज्ञानस्यैवानुभवात् । तादृशानुभवानङ्गीकारे प्रमात्मकानुमितिस्थलेऽपि एकज्ञानस्यासिद्धत्वापत्तेः । एवमबाधस्थले अन्यथाख्यातिसिद्धिर्बोध्या इति सूक्ष्ममतिभिर्विभावनीयम् ॥

Colophon:

इत्यन्यथाख्यातिविचारः ॥

No. **3919.** अप्रामाण्यानुगमः.

APRĀMĀṆYĀNUGAMAḤ.

Substance, palm-leaf. Size, 12 × 1⅜ inches. Pages, 3. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 19*a*. The other works herein are Tattvacintāmaṇidīdhitiprakāśikāsaṅgraha 1*a*, Viśiṣṭadvayāghaṭitatvaviśiṣṭāntarāghaṭitatvavicāra 21*a*.

Incomplete.

This deals with the comprehensive and continuous definition of what constitutes falsity or unreality.

Beginning:

इदं ज्ञानं वह्न्यभावाभाववति वह्निमति वह्न्यभावप्रकारकम्; एवं संयोगेन वह्निमति प्रतियोगितासम्बन्धेन वह्निमति वह्न्यभावप्रकारकम्; एवं वह्न्यभावाभाववति वह्न्यभावप्रकारकं वह्निमति वह्न्यभावप्रकारकम् . . . . . निश्चयानामप्रतिबन्धकत्वेन तादृशनिश्चयवारणाय धर्मे निश्चयवृत्तित्वम् ।

End:

स्वविशिष्टप्रकारतानिष्ठप्रकारतानिरूपितनिरूपकत्वनिष्ठप्रकारता निरूपकत्वसम्बन्धेन । ज्ञाननिष्ठप्रतियोगिता पूर्वोक्तसम्बन्धेन.

No. 3920. असत्ख्यातिखण्डनम्.

ASATKHYĀTIKHAṆḌANAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3916.

A treatise on Nyāya by Śiṅgarārya, son of Jagannāthārya of Kāśyapagōtra.

Complete.

The author herein endeavours to overthrow the position that perception presents as real what is in reality unreal.

Beginning:

इह केचित् शुक्तिकादाविदं रजतमित्याद्याकारिका प्रतीतिरसद्रजतादिविषयिण्येव नान्यथाख्यातिः; व्यधिकरणधर्मप्रकारकप्रतीतेरप्रामाण्यात् । अन्यथा घटत्वप्रकारकघटविशेष्यकख्यातिरपि प्रसज्येतेति वदन्ति । तदयुक्तम्—" लब्धरूपे कचित्किञ्चित्तादृगेव निषिध्यत " इति न्यायेनासत्प्रतियोगिकनिषेधस्यासंभवेन रजतस्यासत्त्वे नेदं रजतमित्यनुदयप्रसङ्गेन असत्ख्यातेर्दुर्वचत्वात् ।

End:

विसदृशारोपस्याप्रामाणिकत्वाच्च । तस्माद्रजतत्वादिप्रकारकशुक्तिविशेष्यकप्रतीतिः प्रामाणिकीति इदं रजतमित्यादावन्यथाख्यातिरेव सुवचेति राद्धान्तः ॥

Colophon:

श्रीकाश्यपकुलीनेन जगन्नाथार्यसूनुना ।
शिङ्गरार्येण रचितमसत्ख्यातेस्तु खण्डनम् ॥

No. **3921.** आख्यातवादः.

ĀKHYĀTAVĀDAḤ.

Substance, palm-leaf. Size, $10\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 18. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

A treatise on Nyāya logic by Tārkika-Śirōmaṇi-Bhaṭṭāraka. It investigates in detail the force of finite verbs and the meanings of the different tenses.

Complete.

Beginning:

आख्यातस्य यत्नो वाच्यः; पचति पाकं करोतीति यत्नार्थककरोतिना सर्वाख्यातविवरणात् । व्यवहारादिव विवरणादपि बाधकं विना व्युत्पत्तिः; किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च ।

End:

सर्वत्र धात्वर्थाश्रयत्वमेव कर्तृत्वं संख्यावर्तमानत्वादिकं कचिदाश्रयत्वादिकमपि वाख्यातार्थ इति गुरुमतमपि तत्र तत्र तादृशयत्नाननुभवप्रसङ्गादनुपादेयमिति ॥

Colophon:

इति तार्किकशिरोमणिभट्टारकनिरूपितत्वमा(त आ)ख्यातत्वं(वादः) ॥

No. 3922. आख्यातवादः.

ĀKHYĀTAVĀDAḤ.

Substance, palm-leaf. Size, 17 × 1⅛ inches. Pages, 10. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 33*a*. The other works herein are Viśiṣṭavaiśiṣṭyabōdhavicāra 1*a*, Viṣayatāvāda 12*a*, Mātariśvapratyakṣavāda 20*b*, Dravyanāśarahasya 29*a*, Īśvaravāda 38*a*, Nityasukhavāda 57*b*, Vidhivāda 61*a*.

A work similar to the above: by Raghudēva.

Incomplete.

No. 3923. आख्यातवादः.

ĀKHYĀTAVĀDAḤ.

Substance, palm-leaf. Size, 15¾ × 1 ¼ inches. Pages, 50. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

No. 3924. आख्यातवादटिप्पणी.

ĀKHYĀTAVĀDAṬIPPAṆĪ.

Substance, palm-leaf. Size, 16¾ × 1⅝ inches. Pages, 80. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

This is a commentary on the Ākhyātavāda of Tārkika-Śirōmaṇi-Bhaṭṭāraka.

By Raghudēva.

Complete.

Beginning:

प्रणम्य नीरदश्याममुद्दामगुणमन्दिरम् ।
आख्यातवादसद्याख्या रघुदेवेन तन्यते ॥

नैयायिकः परमतं निराकर्तुं प्रथमतः स्वमतं व्यवस्थापयति— आख्यातस्येति । यत्नो वाच्यः यत्नत्वविशिष्टो वाच्यः । यत्नत्वं शक्यतावच्छेदकमिति यावत्; यथाश्रुते यत्नस्य व्यापारान्तर्गतत्वेन व्यापारशक्तिवादिमतव्यवच्छेदाप्रतीतेः । शक्ततावच्छेदकं चाख्यातत्वम्; तच्च रूढिसम्बन्धेन आख्यातपदवत्त्वम् ।

End:

क्वचिदिति । इदं च मध्यस्थं पूर्वत्राप्यन्वयि । तेन तत्र तत्र प्रस्य(थ)मान्तपदाभावात् संख्यायाः वर्तमानत्वाद्यविवक्षया च वर्तमानत्वादेरनन्वयेऽपि न क्षतिः ॥

Colophon :

इत्याख्यातवादटिप्पणी समाप्ता ॥

No. 3925. ईश्वरवादः.
ĪŚVARAVĀDAḤ.

Substance, paper. Size, 10 × 4⅛ inches. Pages, 38. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Viṣayatavada 20*b*, Tattvacintāmaṇivyākhyā (Phakkikā) 37*b*.

Dated the 9th of Vaiśākhaśuddha, 1777 Saṁvat.

A treatise by Mahādēvapaṇḍita, son of Mukundapaṇḍita in proof of the existence of Īśvara or God.

Complete.

Beginning :

साम्बं शिवं नमस्कृत्य महादेवस्सतां मुदे ।
तार्किकाभिमतं मानमीश्वरे वक्ति तत्त्वतः ॥

अत्रेश्वरे आत्मत्वं जीवभिन्नवृत्ति न वा, जीवभिन्नं ज्ञानादिमन्न वा, जन्यं सकर्तृकं न वेत्यादिविप्रतिपत्तौ ईश्वरे प्रमाणमनुमानमेवेति नैयायिकाः । तच्च जन्यं सकर्तृकं कार्यत्वाद्घटादिवदित्याकारकम् ।

End:

ईश्वरानुग्रहादेवेश्वरवादोऽयमद्भुतः ।
महादेवेन रचितः तनोतु सुधियां सुखम् ॥
स्वयं यो ग्रन्थमन्यस्य तदीयञ्चान्यकर्तृकम् ।
वक्ति शीघ्रं क्षयस्तस्य तावुभौ जारजातकौ ॥

Colophon:

इति श्रीमत्पद्वाक्यप्रमाणज्ञपुण्यनामकरोपनामश्रीमुकुन्दपण्डितात्मजमहादेवपण्डितविरचितेश्वरवादः समाप्तः ॥

No. 3926. ईश्वरवादः.

ĪŚVARAVĀDAḤ.

Pages, 40. Lines, 8 on a page.

Begins on fol. 38*a* of the MS. described under No 3922.

Same work as the above.

Complete.

No. 3927. कारकवादार्थः.

KĀRAKAVĀDĀRTHAḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Samāsatattva 12*a*.

A treatise on the meaning and force of declensional cases: by Rudrabhaṭṭācārya.

Complete.

Beginning:

विभक्त्यर्थद्वारा क्रियान्वयि सत् क्रियानिमित्तं कारकम् । राज्ञः पुरुषो गच्छतीत्यत्र गमनप्रयोजकस्य राज्ञो वारणाय क्रियान्वयीत्यन्तम् । तत्र

साक्षात्क्रियान्वयित्वं न ग्रामादेः ; परम्परया तदन्वितान्वयित्वरूपक्रिया-न्वयित्वं राज्ञोऽप्यतो विभक्त्यर्थद्वारेति । सम्बन्धस्य तु न क्रियाया-मन्वयः ।

End:

निमित्तत्वं यथेष्टविनियोगवत्त्वेनेच्छाविषयत्वम् । तथाच तादृशेच्छा सप्तम्यर्थो जन्यत्वसम्बन्धेन हननेऽन्वेतीत्यन्ये । सीम्नि पुष्कलको हत इत्यपरार्धसामानाधिकरण्यं भासते । तत्र सप्तमीति शाब्दिकैर्व्याख्यातम् ; तथापि तत्र क्रियापदं धर्मपरम् ; सामान्यवत्त्वे सति प्रत्यक्षगुणत्वादिति प्रामाणिकप्रयोगानुरोधादिति ध्येयम् ॥

Colophon:

इति श्रीमहोपाध्यायविद्यानिवासभट्टाचार्यात्मजश्रीरुद्रभट्टविरचितः कारकपरिच्छेदस्समाप्तः ॥

No. 3928. कारिकावली.

KĀRIKĀVALĪ.

Substance, paper. Size, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Pages, 14. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*; the other work herein is Muktāvalī 8*b*.

Dated Pramōdūta year Āśvina-śuddha 12.

Copied by Veṅkaṭapati for Tirumalai Anantācārya.

This is an elementary treatise on Nyāya logic written in verse by Viśvanāthapañcānana. It consists of 168 Ślōkas. This work is also known as Bhāṣāparicchēda.

Complete.

Beginning:

नूतनजलधररुचये गोपवधूटीदुकूलचोराय ।
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाभावः पदार्थास्सप्त कीर्तिताः ॥

End:

सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ।
तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ॥

Colophon:

इति श्रीमहोपाध्यायसुतविश्वनाथवागीशभट्टाचार्यविरचितो भाषापरिच्छेदः समाप्तः ॥

No. 3929. कारिकावली.

KĀRIKĀVALĪ.

Substance, paper. Size, 10¾ × 4⅝ inches. Pages, 22. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*b*. The other works herein are Muktāvalī 13*a*, Dinakarīya 77*a*.

Complete.

Same work as the above.

No. 3930. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, 14⅝ × 1⅝ inches. Pages, 2. Lines, 7 on a page. Character, Telugu Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tarkasaṅgrahadīpikā 11*a*.

Complete.

Same work as the above.

No. 3931. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 10. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 42*a*. The other work herein is Tarkasaṅgrahadīpikāprakāśa 1*a*.

Same work as the above.

Complete.

No. 3932. कारिकावली.

KĀRIKĀVALĪ.

Substance, paper. Size, $13 \times 5\frac{1}{8}$ inches. Pages, 13. Lines, 12 on a page. Character, Devanāgarī. Condition, good. Appearance, old.

Begins on fol. 24*b*. The other works herein are Tattvacintāmaṇidīdhitiprakāśikā 1*b*, Muktāvalī 31*b*.

Complete.

Same work as the above.

No. 3933. कारिकावली.

KĀRIKĀVALĪ.

Substance, paper. Size, $7\frac{1}{8} \times 4\frac{3}{4}$ inches. Pages, 3. Lines, 12 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Muktāvalī 3*a*.

From Anumānakhaṇḍa to Guṇanirūpaṇa.

Incomplete.

Same work as the above.

No. 3934. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 20. Lines, 5 on a page. Character, Telugu and Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Muktāvalī 15*a*.

There are two copies of which the 1st is incomplete and the 2nd complete.

Same work as the above.

No. 3935. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 3. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Viśēṣavādārtha 3*a*.

Incomplete.

Same work as the above.

No. 3936. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 10. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 25*a*. The other works herein are Tarkasaṅgrahadīpikā 1*a*, Muktāvalī 30.

Complete.

Same work as the above.

No. 3937. कारिकावली.

KĀRIKĀVALĪ.

Substance, palm-leaf. Size, 17¼ × 1⅓ inches. Pages, 10. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Muktāvalī 6*a*.

Incomplete.

Same work as the above.

No. 3938. कारिकावली-सव्याख्या.

KĀRIKĀVALĪ: WITH COMMENTARY.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 33. Lines, 6 or 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1. The other work herein is Dinakarabhaṭṭīya 17*a*.

Pratyakṣa only complete.

Same work as the above with a commentary by the author himself.

No. 3939. कारिकावलीव्याख्या-मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ: MUKTĀVALĪ.

Pages, 128. Lines, 12 on a page.

Begins on fol. 13*a* of the MS. described under No. 3929.

This also is a commentary on the Kārikāvalī of Viśvanāthapañcānana by the author himself.

Complete.

Beginning:

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥

निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्नु राजीवदयावशंवदः ॥

सद्द्रव्या गुणगुम्भिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति नूतनेत्यादिना । नूतन . . . . बीजाय ॥

ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्; विनापि मङ्गलं नास्तिकादिग्रन्थेषु निर्विघ्नसमाप्तिदर्शनादिति चेन्न ।

End :

ननु सजातीये सोऽयमिति प्रत्यभिज्ञा कुत्र दृष्टेत्यत आह—

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् । यदौषधं मया कृतं तदौषधमन्येनापि कृतमिति भावः ॥

Colophon :

इति श्रीयुतमहोपाध्यायनैयायिकशिरोमणिविश्वनाथराजा(पञ्चा)ननभट्टाचार्यविरचितसिद्धान्तमुक्तावली समाप्ता ॥

No. 3940. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ—MUKTĀVALĪ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 109. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Breaks off in Śabdakhaṇḍa.

Same work as the above.

No. 3941. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYA : MUKTĀVALĪ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 104. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

The first two pages are lost. Breaks off in the Guṇa-parichēda.

Same work as the above.

No. 3942. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 92. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 3934.

Incomplete.

Same work as the above.

No. 3943. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 42. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 33*a*. The other works herein are Tarkabhāṣā 1*a*, Tarkasaṅgraha 54*a*, Tarkasaṅgrahadīpikā 64*a*.

Incomplete.

Same work as the above.

No. 3944. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 22. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are—Candrikā (Kuvalayānandavyākhyā) 12*a*, Mālatīmādhava 55*a*, Tattvacintā-

maṇivyākhyā (Dvitīyaphakkikā) 72*a*, Śaivaparibhāṣā 85*a*, Nala-campu 104*a*.

Contains Anumāna-Upamāna and Śabda-Paricchēdas.

Incomplete.

Same work as the above.

No. 3945. कारिकावलीव्याख्या–मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 142. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 3936.

Breaks off in the Śabdhakhaṇḍa.

Incomplete.

Same work as the above.

No. 3946. कारिकावलीव्याख्या–मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 30. Lines, 12 on a page.

Begins on fol. 3*a* of the MS. described under No. 3933.

Anumānakhaṇḍa complete.

Same work as the above.

No. 3947. कारिकावलीव्याख्या–मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 68. Lines, 11 on a page.

Begins on fol. 31*b* of the MS. described under No. 3932.

Breaks off in Guṇanirūpaṇam.

Incomplete.

Same work as the above,

No 3948. कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALIVYĀKHYĀ: MUKTĀVALĪ.

Pages, 106. Lines, 15 on a page.

Begins on fol. 8*b* of the MS. described under No. 3928.

Complete.

Same work as the above.

No. 3949. कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ: MUKTĀVALĪ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 87. Lines, 8 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Tarkasaṅgrahadīpikā 45*a*, Tarkasaṅgraha 69*a*.

Incomplete.

Same work as the above.

No. 3950. कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ: MUKTĀVALĪ.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 119 Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

No. 3951. कारिकावलीव्याख्या—मुक्तावली.
KĀRIKĀVALĪVYĀKHYĀ: MUKTĀVALĪ.

Substance, paper. Size, $10 \times 4\frac{1}{2}$ inches. Pages, 92. Lines, 10 on a page Character, Telugu. Condition, good. Appearance, not recent.

Begins on fol. 15*a*. The other work herein is Dinakarīya 1*a*.

Complete.

Same work as the above.

No. 3952. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Pages, 110. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 3937.

Incomplete.

Same work as the above.

No. 3953. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance palm-leaf. Size, 13 × 1¾ inches. Pages, 3. Lines, 5 on on a page. Character, Telugu. Condition, good. Appearance. new.

Begins on fol. 29*b*. The other works herein are Tarkasaṅgraha 1*a*, Tarkasaṅgrahadīpikā 8*a*.

Incomplete.

Same work as the above.

No. 3954. कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Substance, palm-leaf. Size, 14⅛ × 1⅛ inches. Pages, 22. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 33*a*. The other works herein are Dinakarabhaṭṭīya 1*a*, Tarkāmṛtataraṅgiṇī 12*a*, Tarkāmṛta 31*a*.

Anumāna and Upamāna only complete.

Same work as the above.

No. 3955. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.
MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Pages, 315. Lines, 10 on a page.

Begins on fol. 77*a* of the MS. described under No. 3929.

A commentary on Muktāvalī by Mahādēva, son of Bālakṛṣṇa. Complete.

Beginning:

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवास्याम्बुजात् ।
ज्ञात्वाशेषमतं मितेन वचसा सिद्धान्तमुक्तावली-
गूढार्थांस्तनुते यथामति महादेवः परेषां कृते ॥

तत्र तावद्भाषापरिच्छेदव्याख्यानं चिकीर्षुर्विश्वनाथपञ्चाननो निर्विघ्नपरिसमाप्तये कृतमीश्वरनिर्देशरूपमङ्गलमस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निबन्धनं कुर्वन् ईश्वरं प्रार्थयते चूडामणीकृतेति । लीलेति । इदं च विशेष्यम्; नातस्समाप्तपुनरात्तत्वं दोषः ।

End:

अतो भावार्थं प्रकाशयति—यदौषधं मया कृतमित्यादिना । अत्र च स्वकर्तृकत्वस्वभिन्नकर्तृकत्वस्वरूपविरुद्धधर्माध्यासापातभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वान्न व्यक्तयभेदो विषयः; किन्तु तत्सजातीयाभेदो विषय इति भावः ॥

Colophon:

भानुं प्रणम्य परिभाव्य च शास्त्रसारं मुक्तावलीकिरण एष पितृप्रदिष्टः ।
सद्युक्तिभिर्दिनकरेण करेण सोऽयं नीतः प्रकाशपदवीं सुधियां मुदेऽस्तु ॥

मुक्तावलीप्रकाशोऽयमज्ञानतिमिरापहः ।
तेन सन्तोषमायातु नीलकण्ठस्सतां प्रियः ॥

No. 3956. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYAKHYĀNAM: DINAKARA-BHAṬṬĪYAM.

Substance, paper. Size, 11 × 5¾ inches. Pages, 175. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

The first leaf is lost.

Copying was finished on Wednesday the 2nd of Śrāvaṇa-Śuddha in the Śukla year by Veṅkaṭācala for Anantācārya.

Complete.

Same work as the above.

No. 3957. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARA-BHAṬṬĪYAM.

Substance, paper. Size, 10⅝ × 4½ inches. Pages, 246. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as the above.

No. 3958. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM: DINAKARA-BHAṬṬĪYAM.

Substance, palm-leaf. Size, 14¼ × 1⅜ inches. Pages, 239. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Pratyakṣa and Anumāna are complete.

Same work as the above.

No. 3959. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Pages, 28. Lines, 13 on a page.

Begins on fol. 1*a* of the MS. described under No. 3951.

Incomplete.

Same work as the above.

No. 3960. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Substance, paper. Size, $12\frac{1}{2} \times 3\frac{7}{8}$ inches. Pages, 57. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Only the first Paricchēda complete.

Same work as the above.

No. 3961. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Substance, paper. Size, $10\frac{3}{4} \times 5$ inches. Pages, 65. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, old.

Breaks off in Pratyakṣa.

Same work as the above.

No. 3962. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Pages, 124. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 3938.

Breaks off in Anumāna.

Same work as the above.

No. 3963. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 28. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains only Śabdakhaṇḍa.

Incomplete.

Same work as the above.

No. 3964. मुक्तावलीव्याख्यानम्–दिनकरभट्टीयम्.

MUKTĀVALĪVYĀKHYĀNAM : DINAKARA-BHAṬṬĪYAM.

Pages, 22. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3954.

Anumāna incomplete.

Same work as the above.

No. 3965. दिनकरीयव्याख्या–तरङ्गिणी.

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 364. Lines, 6 on a page. Character, Grantha. Condition, not good. Appearance, old.

Pratyakṣa-khaṇḍa complete.

A commentary on the Muktāvalīvyākhyā of Mahādēva by Ramarudrabhaṭṭa, son of Rāmēśvara. It is also called after him sometimes as Rāmarudrabhaṭṭīyam.

Beginning:

तातस्य तर्कसरसीरुहकाननेषु रामेश्वरस्य तरणेश्चरणौ प्रणम्य ।
श्रीरामरुद्रसुकृती कृतिनां हिताय लीलावशात्किमपि कौतुकमातनोति ॥

सिद्धान्तमुक्तावलीव्याख्यां चिकीर्षुर्महादेवः प्रारिप्सितग्रन्थविघ्नविघाताय कृतं तातनमस्काररूपं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति लक्ष्मीति । गूढार्थांस्तनुते विस्तारयतीत्यर्थः । अर्थस्य विस्तारो नाम नानाजनसम्बन्धः । स च सम्बन्धः प्रकृते स्वविषयकज्ञानवत्त्वमेवेत्यर्थः ।

End:

तथाच तद्विशेष्यकलौकिकप्रत्यक्षं प्रति तद्विषयकज्ञानत्वेन कारणत्वमावश्यकम्; अन्यथा घटादिविशेष्यकालौकिकमानसे हि घटादेर्भानस्याकस्मिकत्वापत्तेरिति भावः । इत्याहेति । इत्यभिप्रायेण ज्ञानलक्षणाप्रत्यासत्तेः प्रयोजनमाहेत्यर्थः ॥

Colophon:

इति श्रीरामरुद्रभट्टाचार्यविरचितायां दिनकरीयप्रकाशतरङ्गिण्यां प्रत्यक्षतरङ्गस्समाप्तः ॥

No. 3966. दिनकरीयव्याख्या—तरङ्गिणी.

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 69. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

To the end of Śaktivāda.

Incomplete.

Same work as the above.

No. 3967. दिनकरीयव्याख्या—तरङ्गिणी.

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Pages, 53. Lines, 9 on a page.

Begins on fol. 20*a* of the MS. described under No. 1781.

Incomplete.

Same work as the above.

No. 3968. दिनकरीयव्याख्या—तरङ्गिणी.

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ

Substance, palm-leaf (Śrītāla). Size, 14⅝ × 2¼ inches. Pages, 14. Lines, 15 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sarasvatīvilāsa (Campubhāratavyākhyā) 8*a*.

Incomplete.

Same work as the above.

No. 3969. दिनकरीयटिप्पणम्.

DINAKARĪYAṬIPPAṆAM.

Substance, palm-leaf. Size, 16⅞ × 1½ inches. Pages, 78. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

This contains brief notes on the Dinakarīya of Mahādēva.

This MS. is said to have belonged to one Musalpākam Anantācārya.

Complete.

Beginning:

विषयत्वं ज्ञानविषयसुखे अतिप्रसक्तमत आचारेति । यद्यप्याचारः क्रिया; तथापि विषयत्वश्रुतेः कृतिरेव विवक्षिता । . . . . तेन श्येनयागादौ प्रवृत्त्युपयुक्तबलवदनिष्टाननुबन्धीष्टसाधनत्वरूप-साध्याभावेऽपि न व्यभिचार इत्युक्तं महादेवेन । अत्रेदमवधेयम्—परमतसिद्धस्यैव हेतोरनुमापकत्वम्; न चायं हेतुः परमते सिद्धः ।

तथा हि—मङ्गले समाप्तिसाधनतां सन्दिहानेन पुंसा समाप्तिसाधनताबुद्ध्या मङ्गले प्रवृत्त(वर्त)माने पुरुषे इष्टसाधनतांशे भ्रान्तिरहितत्वमपि सन्दिह्यत एव ।

End:

न वा रङ्गविशेष्यकरजतत्वप्रकारकभ्रमे वस्तुमात्रस्यैव रङ्गनिष्ठाभावप्रतियोगितानिरूपितविषयतासम्बन्धावच्छिन्नावच्छेदकताश्रयतया तदनवच्छेदकाप्रसिद्ध्या अव्याप्तिरिति सर्वं समञ्जय(स)म् ॥

Colophon:

इति दिनकरीयटिप्पणं संपूर्णम् ॥

No. 3970. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf. Size, $15\frac{1}{3} \times 1\frac{1}{2}$ inches. Pages, 78. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Pratyaksa incomplete.

A commentary on Muktāvalī by Rāya Narasiṁhaśāstrin.

Beginning:

कामाक्षीपादपाथोजे जप्त्वा मुक्तावलीप्रभा ।
श्रीरायनरसिंहाख्यपण्डितेन चिकीर्ष्यते ॥

तत्र प्रारिप्सितग्रन्थपरिसमाप्तिविरोधिविघ्नव्यूहविध्वंसनविचक्षणां परमेश्वरप्रार्थनामादौ निबध्नाति—चूडामणीकृतेति । अचूडामणिः चूडामणिस्सम्पद्यमानः कृतः चूडामणीकृतः चूडामणीकृतो विधुर्येन स तथेत्यर्थः । एवं वलयीकृतेत्यत्रापि विग्रहो ज्ञेयः । . . . . .

* * * *

ननु विघ्नविघातायेत्यादिग्रन्थेन दर्शितं नवीनमतं सूचितं प्राचीनमतं चायुक्तं व्यभिचारादित्याक्षिपति नन्विति । निर्विघ्नपरिसमाप्तिदर्शनादिति । एतेन तत्र प्रत्यक्षेण समाप्तेः तत्कारणतया विघ्नध्वंसस्य च सत्त्वमाविष्कृतम् ॥

For the end, see under the next number.

No. 3971. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 524. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, not old.

Guṇa-Paricchēda complete.

The copying of this manuscript was finished on Śukla-Pratipad in the month of Caitra in the year of Nandana.

For the beginning, see under the previous number.

End :

ननु तदेवौषधमित्यादौ व्यक्त्यभेद एव विषयोऽस्तु; बाधकाभावादित्याशङ्कां बाधकप्रदर्शनेन परिहरति—मुक्तावल्यां यदौषधं मया कृतमिति । मयैव कृतमित्यर्थः । यथाश्रुते उभयकर्तृकौषधस्याभेदसंभवादसाङ्कर्यापत्तेः । तथाच तत्र स्वमात्रकर्तृकत्वस्वाभिन्नमात्रकर्तृकत्वरूपविरुद्धधर्माध्यासेनाभेदस्य वक्तुमशक्यत्वादिति भावः ॥

Colophon :

इति गुणपरिच्छेदः ॥

इति महामहोपाध्यायश्रीबालकृष्णतर्कालङ्कारभट्टाचार्यसद्गुरुप्रसादलब्धविद्यावैभवश्रीमदाल्वारिवंशपयःपारावारराकासुधाकररायनरसिंहपण्डितकृतमुक्तावलीप्रभा संपूर्णा ॥

तर्कदुर्गमहारण्यनव्यवर्त्मानुवर्तिनी ।
मुक्तावलीप्रभा हर्षं सतां वितनुतां सदा ॥

No. 3972. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf Size, $14\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 126. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the portions on Śabda and Anumāna only.

Incomplete.

Same work as the above.

No. 3973. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 210. Lines, 10 on a page. Character, Grantha. Condition, fair. Appearance, old.

Contains the portions on Anumāna and Śabda only.

Incomplete.

Same work as the above.

No. 3974. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf (Śrītāla). Size, $20\frac{1}{2} \times 2$ inches. Pages, 173. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains Guṇa-Paricchēda only.

Incomplete.

Same work as the above.

No. 3975. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 6. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 19*a*. The other works herein are Bhavānandaprakāśikā 1*a*, Sarasvatīvilāsa (Campubhāratavyākhyā) 22*a*.

Pratyakṣa incomplete.

Same work as the above.

No. 3976. मुक्तावलीप्रभा.

MUKTĀVALĪPRABHĀ.

Substance, palm-leaf. Size, $21 \times 1\frac{5}{8}$ inches. Pages, 243. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains Pratyakṣa-Paricchēda only.

Incomplete.

Same work as the above.

No. 3977. मुक्तावलीटीका—तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪṬĪKĀ : TĀRKIKASIDDHĀNTA-RATNAMAÑJŪṢĀ.

Substance, paper. Size, $11\frac{1}{2} \times 9$ inches. Pages, 384. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

A commentary on Muktāvalī by Paṭṭābhirāma-Śāstrin.

Incomplete.

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
मुक्तावलीस्थवाक्यार्थनिरुक्तिः क्रियते मया ॥
मुक्तावलीमनेकप्राक्तनटीकादुरुक्तिमलाम् ।

गोपायतादिदं मे तार्किकसिद्धान्तरत्नमञ्जूषा ॥
अनिदंपूर्वगृहीतैर्घटितां पट्टाभिरामकविनेमाम् ।
मञ्जूषां युक्तिमणिभिरादत्तां कोऽपि गोपिकाजारः ॥

भाषापरिच्छेदव्याख्यानमारम्भ(भ)माणो विश्वनाथपञ्चाननस्वेष्टदेवतां प्रार्थयते—चूडामणीकृतेति । अत्राचूडामणिः चूडामणिः कृतः चूडामणीकृतः तादृशो विधुर्येनेति विग्रहः । अत्र विग्रहवाक्ये चूडासंयोगित्वरूपचूडामणिसादृश्यविशिष्टस्य निर्वाहकतासम्बन्धेन कृधात्वर्थे कृतौ व्यापारे वान्वयः । नामार्थधात्वर्थयोरपि क्वचिद्भेदान्वयस्वीकारात् ।

For the end, see under the next number.

No. 3978. मुक्तावलीटीका—तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪṬĪKĀ : TĀRKIKASIDDHĀNTARATNAMAÑJŪṢA.

Substance, palm-leaf. Size, 18¾ × 1¾ inches. Pages, 122. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Abhēdakhaṇḍana 169*a*, Śrībhāṣyārambhaprayōjanasamarthana 169*a*.

Incomplete.

Same work as the above.

For the beginning, see under the previous number.

यावन्मातृकालाभं लिखिता मञ्जूषा पट्टाभिरामविद्वत्कृता ॥

End:

ततश्च स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुणनवकवान् सावयवद्रव्यं शब्द इति वदन्तोऽपि भगवत्सूत्रकारोक्तिविरोधादेव प्रत्याख्येयाः । शब्दस्य सावयवत्वे अनन्तावयवतन्नाशादिकल्पनागौरवाच्चेत्यलमधिकेन । शब्दो न स्पर्शवद्विशेषगुण इति.

No. 3979. मुक्तावलीटीका–तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪṬĪKĀ : TĀRKIKASIDDHĀNTA-RATNAMAÑJŪṢĀ.

Substance, palm-leaf. Size, $19\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 31. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 7*a*. The other work herein is Brahmasāguṇya-nirūpaṇam 1*a*.

From Jalanirūpaṇa to Vāyunirūpaṇa.

Incomplete.

Same work as the above.

No. 3980. मुक्तावलीटीका–तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪṬĪKĀ : TĀRKIKASIDDHĀNTA-RATNAMAÑJŪṢĀ.

Substance, palm-leaf. Size, $19\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 178. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants beginning and end.

Incomplete.

Same work as the above.

No. 3981. मुक्तावलीटीका–तार्किकसिद्धान्तरत्नमञ्जूषा.

MUKTĀVALĪṬĪKA : TĀRKIKASIDDHĀNTA-RATNAMAÑJŪṢĀ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 46. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other work herein is Puruṣakāra-mīmāṁsā 1*a*.

Incomplete.

Same work as the above.

No. 3982. तत्त्वचिन्तामणिः

TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, 14 × 1½ inches. Pages, 348. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Pratyakṣakhaṇḍa complete. Anumānakhaṇḍa incomplete. Breaks off in Hētvābhāsa.

A treatise on logic by Gaṅgēśa mainly based on the Vaiśēṣika philosophy of Kaṇāda.

It is divided into 5 parts, as Pratyakṣakhaṇḍa, Anumānakhaṇḍa, Upamānakhaṇḍa, Śabdakhaṇḍa and Guṇaparicchēda.

Beginning:

गुणातीतोऽपीशस्त्रिगुणसचिवस्त्र्यक्षरमयः
त्रिमूर्तिर्यस्सर्गस्थितिविलयकर्माणि तनुते ।
कृपापारावारः परमगतिरेकस्त्रिजगतां
नमस्तस्मै कस्मैचिदमितमहिम्ने पुरभिदे ॥

अ[ ]न्वीक्षानयमाकलय्य गुरुभिर्ज्ञा(त्वा गुरू)णां मतं
चिन्तादिव्यविलोचनेन च तयोस्सारं विलोक्याखिलम् ।
तन्त्रे दोषगणेन दुर्गमतरे सिद्धान्तदीक्षागुरु-
र्गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ॥

यतो मणेः(णिः) पण्डितमण्डनक्रिया प्रचण्डपाषण्ड(तमस्ति)रस्क्रिया ।
विपक्षपक्षे न विचारचातुरी न च स्वसिद्धान्तवचोदरिद्रता ॥

इह खलु सकलशिष्टैकवाक्यतया अभिमतकर्मारम्भे तत्समाप्ति-कामा मङ्गलमाचरन्ति । तत्र यद्यपि मङ्गलस्य कारणता नान्वयव्यतिरेकगम्या; विनापि म(ङ्गलं प्रम)त्ताद्यनुष्ठितानां समाप्तिदर्शनात् । न च जन्मान्तरीयतत्परिकल्पनम्; अन्योन्याश्रयात्, लोकावगतकारणेनान्यथा-सिद्धेश्च ।

* * * *

तद्यथार्थत्वम्; पाकरक्ते श्यामोऽयमिति ज्ञानस्य यथार्थत्वप्रसङ्गात्। प्रमृष्टतत्तादृशे च स्मरणे अविद्यमानधर्मावबोधो न भासते। तथाहुराचार्याः—स्मृतेर्याथार्थ्यमपि कुतः—इति ॥

Colophon:

इति श्रीमहामहोपाध्यायश्रीगङ्गेश्वरविरचिते आन्वीक्षिकीतत्त्वचिन्तामणौ प्रत्यक्षपरिच्छेदस्समाप्तः ॥

See under the next number for the end.

No. 3983. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 192. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Anumānaparicchēda complete with Īśvarānumāna.

Copying was finished on Sunday the 1st of Kṛṣṇapakṣa Nabhas in the year Śubhakṛt by the son of Kṛṣṇa, of Ghaṭīyantra.

Same work as the above.

See under the previous number for the beginning.

End:

तत्राव्याप्यत्वस्य असाधकशब्दार्थत्वादसाधकताननुगमेऽपि हेत्वाभासत्वमननुगतमेव; यस्य ज्ञानमनुमितिप्रतिबन्धकं तस्य हेत्वाभासत्वादिति ॥

Beginning of Īśvarānumāna:

एवमनुमाने निरूपिते तस्माज्जगन्निर्मातृपुरुषधौरेयसिद्धिः; क्षित्यादौ कार्यत्वेन घटवत्सकर्तृकत्वानुमानात्।

End of Īśvarānumāna:

(अत एवानुमाने)नागमबाधाप्रयोजकत्वेन च श्रुतिवाक्यशेषे च

मानाभावः; (उत्पन्नतत्त्व)ज्ञानस्यापवर्गविलम्बोपपादनार्थमुक्तरीत्या भोग-स्यैवाक्षेपादिति तस्यापवर्गस्य परमपुरुषार्थस्य श्रुतिसिद्धं कारणमनुमानं विविक्तमिति ॥

Colophon:

इति महोपाध्यायगङ्गेशविरचिते तत्त्वचिन्तामणौ अनुमानाख्यो द्वितीयः परिच्छेदः समाप्तः ॥

कन्दाडयण्णपदपङ्कजमत्तभृङ्गः पद्मादयाख्यगणिकानटनैकरङ्गः ।
चिन्तामणौ व्यलिखमीहितमध्यखण्डं चिन्ताविनिश्चितसुदुर्ग्रहसर्वशा(स्त्रम्) ॥

घटीयन्त्रनिवासेन कृष्णपुत्रेण धीमता ।
अलिख्यत ह्ययं खण्डः स्वार्थे स्वे(स्वीये)च्छया मणौ ॥

No. 3984. तत्त्वचिन्तामणिः.

TATTVACINTAMANIḤ.

Substance, palm-leaf. Size, 15¼ × 1½ inches. Pages, 195. Lines 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Śabdakhaṇḍa complete.

The first 8 leaves are wanting. The extract here given is taken from the 17th fol.

Same work as the above.

Beginning:

सकृदिन्द्रियसम्बन्धयोग्यसर्वार्थोपलब्ध्यनुकूलसंस्कारजनकत्वं दृष्टम्; तद्वद्वायुरपि सर्वदेशसर्वशब्दोपलब्ध्यनुकू . . . .
तथा च सर्वशब्दोपलब्धिस्स्यात् । तदुक्तम्—

सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत् ।
घटायोन्मि(न्मी)लितं चक्षु(ः) पटं न हि न बुध्यते ॥ इति ॥

End:

अर्थापत्त्यनुपलब्ध्योस्त . . . . घमन्त-
र्भावः प्रागेव चिन्तितः । अतस्सिद्धं चत्वारि प्रमाणानीत्यत उपर-
म्यते ॥

धीराः कुशाग्रमतयो भवतः प्रणम्य मौलौ निधाय करवारि(जमेष याचे) ।
वाणीयमर्थरहितापि विशृङ्खलापि सानुग्रहेण हृदयेन विलोकयन्तु ॥

Colophon:

इति गङ्गेश्वरविरचिते तत्त्वचिन्तामणौ तृतीयः शब्दपरिच्छेदः स-
माप्तः ॥

No. 3985. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Substance, paper. Size, $10\frac{1}{2} \times 4\frac{1}{2}$ inches. Pages, 7. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tattvacintāmaṇidīdhiti 5*a*.

Breaks off in Anumāna.

Same work as the above.

No. 3986. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 6 on a page Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 52*a*. The other works herein are Mīmāṁsāparibhāṣā 1*a*, Bhagavatpūjākrama 28*a*, Tattvacintāmaṇidīdhiti 58*b*.

Bādha complete in the Anumānakhaṇḍa.

Same work as the above.

No. 3987. तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $19\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 172. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Tattvacintāmaṇivyākhyā (Ālōka) 88*a*.

Contains Pratyakṣa only.

Same work as the above.

No. 3988. तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 140. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Wants beginning and end. Contains from Pañcalakṣaṇī up to Hētvābhāsa.

Same work as the above.

No. 3989. तत्त्वचिन्तामणिः.

TATTVACINTAMAṆIḤ.

Substance, palm-leaf. Size, $15 \times 1\frac{1}{4}$ inches. Pages, 22. Lines, 56 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 14*a*. The other work herein is Tattvacintāmaṇi-dīdhiti 1*a*.

To the end of Maṅgalavāda.

Same work as the above.

No. 3990. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Pages, 17. Lines, 10 on a page.

Begins on fol. 108*a* of the MS. described under No. 1388.

Breaks off in Pakṣatā.

Same work as the above.

No. 3991. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 181. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Pratyakṣa incomplete.

Without Maṅgalavāda.

Same work as the above.

No. 3992. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $18 \times 1\frac{3}{8}$ inches. Pages, 16. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 10*a* and 25*a*. The other works herein are Tattvacintāmaṇivyākhyā (phakkikā) 1*a*, Tattvacintāmaṇidīdhiti 13*a*.

Anumāna incomplete.

Same work as the above.

No. 3993. तत्त्वचिन्तामणिः.
TATTVACINTĀMAṆIḤ.

Pages, 86. Lines, 7 on a page.

Begins on fol. 64*a* of the MS. described under No. 3915.

From Pakṣatā to the Īśvaravāda complete in Anumāna.

Same work as the above.

No. 3994. तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Substance, paper. Size, $10\frac{1}{8} \times 4\frac{1}{8}$ inches. Pages, 12. **Lines**, 12 on a page. Character, Telugu. Condition, good. **Appearance**, new.

Begins on fol. 44*a*. The other work herein is Tattvacintāmaṇidīdhiti 1*a*.

Incomplete.

Same work as the above.

No. 3995. तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Substance, paper. Size, $11\frac{5}{8} \times 3\frac{5}{8}$ inches. Pages, 31. Lines, 11 on a page. Character, Telugu. Condition, good. Appearance, new.

Anumāna incomplete.

Same work as the above.

No. 3996. तत्त्वचिन्तामणिः.

TATTVACINTĀMAṆIḤ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Tattvacintāmaṇidīdhiti 5*a*, Tattvacintāmaṇidīdhitiprakāśikā 12*a*.

Contains Anumāna up to Pūrvapakṣavyāpti only.

Same work as the above.

No. 3997. तत्त्वचिन्तामणिव्याख्या.

TATTVACINTĀMAṆIVYĀKHYĀ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 17. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Incomplete.

A commentary on the Anumānakhaṇḍa of Tattvacintāmaṇi.

Author not known.

Beginning:

प्रत्यक्षनिरूपणानन्तरमुपजीव्योपजीवकभावसङ्गत्या अनुमानं निरूपयन् प्रतिजानीते—अथेति । अथशब्दोऽत्र आनन्तर्यवाची । प्रत्यक्षनिरूपणस्य अथावधित्वं गम्यते ; अत एव सिद्धत्वमपि । निरूप्य(त) इति वर्तमानार्थकलट्प्रत्ययेनानुमाननिरूपणस्य साध्यत्वलाभः ॥

End:

लाघवेनातिरिक्तविषयताया अनभ्युपगमेऽपि आपत्त्यनन्तरं तादृशानुव्यवसायवारणाय बाधाभावस्यानवच्छेदककोटिनिवेशे गौरवात्त(त्त)दनुमितिसामग्रीविशिष्टवह्निप्रकारकानुमितित्वेन हेतुत्वेन.

No. 3998. तत्त्वचिन्तामणिव्याख्या–आलोकः.

TATTVACINTĀMAṆIVYĀKHYĀ : ĀLŌKAḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 88*a* of the MS. described under No. 3987.

Breaks off in Prāmāṇyavāda in the Pratyakṣakhaṇḍa.

A commentary on the Tattvacintāmaṇi of Gaṅgēśōpādhyāya by Jayadēva.

Beginning :

वक्त्राणि पञ्च कुचयोः प्रतिबिम्बितानि दृष्ट्वा दशाननसमागमनभ्रमेण ।
भूयोऽपि शैलपरिवृत्तिभयेन गाढमालिङ्गिता गिरिजया गिरिशः पुनातु ॥

अधीत्य जयदेवेन हरिमिश्रात्पितृव्यतः ।
तत्त्वचिन्तामणेरिद्ध मा(आ)लोकोऽयं प्रकाश्यते ॥

प्रसङ्गान्मङ्गलस्य समाप्तिहेतुतां व्यवस्थापयितुं भूमिकामारचयति—इहेति । इह लोके । खलु वाक्यालङ्कारे । एकवाक्यता(या) अविप्र-(तिप)त्तिः । अतो भ्रममूलकताशङ्का निराकृता ; विचाराङ्गसंशयबीज-भूतविप्रतिपत्त्यदर्शनात्तन्न्यूनता च परिहृता ।

* * * *

यदि चाग्निहोत्रस्यापि धर्मेण पापमपनुद(ती)ति मानान्तरन्त्वा(रात्पा)-पक्षयजनकत्वं ज्ञायते तदा वाक्यभेदः ; अग्निहोत्रानुरोधेन विनिपातपदस्य पापसामान्यपरत्वात्, मङ्गलानुरोधेन च प्रारब्धे प्रतिबन्धकविघ्नपरत्वादिति भावः ।

अथशब्द इति । यद्यप्यथशब्दो ग्रन्थान्तर्गतः कथं मङ्गलं तस्य तज्जन्यत्वात्, तथापि तदुच्चारणहेतुभूतज्ञानं तत्र मङ्गलं तद्बहिर्भावेन वा ग्रन्थ इति वदन्ति ।

End :

तथाच मुरारिभट्टनययोर्ज्ञानस्य ज्ञेयत्वानियमेन अज्ञायमानज्ञान-व्यक्तिविशेषप्रामाण्ये तदाश्रयीभूतज्ञानग्राहकसामग्र्यप्रसिद्ध्या तद्ग्राह्यत्वसाध्या-भावेनांशतो बाधापत्त्या पक्षसङ्कोचकस्यावश्यकतया तत एव प्रकृतेऽपि सामञ्जस्यात् किम्.

No. 3999. तत्त्वचिन्तामणिव्याख्या–तत्त्वदीपिका.

TATTVACINTĀMAṆIVYĀKHYĀ : TATTVADĪPIKĀ.

Substance, paper. Size, 10¾ × 4½ inches. Pages, 116. Lines, 13 on a page. Character, Telugu. Condition, good. Appearance, new.

To the end of Sāmānyalakṣaṇa in Anumānaparicchēda.

This commentary is by Raghudēva

Beginning :

कर्पूराद्भुतधवलं केवलमीशानकीर्तितं ब्रह्म ।
वेदाविदितरहस्यं सकलनमस्यं नमस्यामः ॥
अनुमानपरिच्छेदगूढार्थे तत्त्वदीपिका ।
धीराणामुपकाराय रघुदेवेन तन्यते ॥

असङ्गताभिधाने उन्मत्तप्रलपितत्वशङ्का स्यादिति सङ्गतिं प्रदर्शयन् शिष्यावधानाय प्रतिजानीते—प्रत्यक्षोपजीवकत्वादि(त्यादि)ना । अत्र प्रत्यक्षोपजीवकत्वादित्यस्य प्रत्यक्षप्रमित्युपजीवकत्वात् प्रत्यक्षप्रमाणोपजीवकत्वाच्चेत्यर्थः ।

End :

न चैवं सति पूर्वोक्तातिप्रसङ्गः, समवायसम्बन्धेन तदधिकरणप्रत्यासन्नत्वं रजतत्वादिप्रकारकज्ञानविशेष्यतासम्बन्धेन यत्र यत्र, तत्र समवायसम्बन्धेन तदधिकरणप्रत्यासन्ना रजतत्वादिप्रकारकेच्छेति उभयप्रत्यासत्त्या एकधर्मावच्छिन्नका.

Colophon :

इत्यनुमानचिन्तामणिव्याख्याने रघुदेवीये सामान्यलक्षणग्रन्थस्समाप्तः ॥

No. **4000.** तत्त्वचिन्तामणिव्याख्या-तत्त्वदीपिका.

TATTVACINTĀMAṆIVYĀKHYĀ : TATTVADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 236. Lines, 9 on a page. Character, Telugu. Condition, injured Appearance, new.

Contains the Pañcalakṣaṇī and Caturdaśalakṣaṇī. Two copies.

This seems to be a different commentary from the above by the same author.

Beginning:

भोक्तुं नवनवनीतं विनीतमिव यान्तमङ्कमम्बायाः ।
वेदाविदितगुणान्तं नन्दसुतं तं नमस्यामः ॥
अयत्नतः पण्डितमण्डलीनां गूढार्थतत्त्वप्रतिपत्तिहेतोः ।
संक्षेपतः श्रीरघुदेवशर्मा नवीननिर्माणमिदं तनोति ॥

प्रत्यक्षप्रमाणोपजीवकत्वात्प्रत्यक्षानन्तरमनुमानं निरूप्यते, प्रत्यक्षप्रमित्युपजीवकत्वात्प्रत्यक्षप्रमित्यनन्तरमनुमितिर्निरूप्यते । नन्वसङ्गतं न प्रयुञ्जीतेति वाक्यादनन्तरनिरूपणे सङ्गतिरपेक्षिता किं तत्प्रदर्शनेन ? किं वा निरूपणीयनिरूपणप्रतिज्ञया इति चेन्न ।

End:

एवं वह्नित्वादेः सम्बन्धत्वे तेन सम्बन्धेन वह्न्यादेस्साध्यतायां तत्तद्रूपादिहेतावव्याप्तेः ; तत्र तेन सम्बन्धेन प्रतियोग्यनधिकरणं यद्धेत्वधिकरणं तद्वृत्त्यभावस्याप्रसिद्धेरिति चेन्मैवम्—

साध्यतावच्छेदकसम्बन्धेन यत्त्वावच्छेदकावच्छिन्नाधिकरणं, तदनुयोगित्वस्य निरूपकीभूता(तत्वा)भावनिरूपितत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टा.

No. **4001.** तत्त्वचिन्तामणिव्याख्या—दर्पणः.

TATTVACINTĀMAṆIVYĀKHYĀ: DARPAṆAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 90. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, old.

This commentary is also known as Maṇidarpaṇa, and is by Rājacūḍāmaṇimakhin.

Incomplete.

Beginning:

वामालकावल्लभभावमुद्रासीमाविभागेन्द्रमणीशिलेव ।
रोमावली राजति यस्य मध्ये सोमावतंसस्स सुखाय भूयात् ॥
यत्पादरेणुपरमाणुभिरेव सृष्टां पश्यन्निजप्रणयिनीं किल पश्यदङ्घ्रिः ।
आस्थापयन्निखिलकारणतामणूनां भद्रं स मे दिशतु भानुकुलावतंसः ॥
अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः ।
राजचूडामणिमखी कुरुते मणिदर्पणम् ॥

ननु मङ्गलमिदमफलम्; समाप्तीतराफलकत्वे सति समाप्त्यफलकत्वात् जलताडनवत् । नचापि(वि)गीतशिष्टाचारविषयत्वेन हेतुना सफलत्वे सिद्धे विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यमिति विशेषणासिद्धो हेतुरिति वाच्यम् ; तथासति स्वर्गकामनाजन्यकृतिविषयत्वापत्त्या समाप्तिकामनाजन्यभ्रमरहिताचारविषयत्वापत्तेः । तस्मात् न स्वर्गः फलं कल्प्यतामिति न विशेषणासिद्धिः ।

End:

तच्च प्रत्यक्षं द्विविधम्—निर्विकल्पकं सविकल्पकं चेति । तत्र सप्रकारकं ज्ञानं सविकल्पकम्; निष्प्रकारकं तु निर्विकल्पकम् । तत्र विप्रतिपत्तिः – ज्ञानत्वं सविकल्पकत्वव्याप्यं ने(न वे)ति । . . . स्मरणरूपविशेषणज्ञानं न सम्भवति;

जातिविशेषस्य पूर्वमनुभवादित्यर्थात्तत्र निर्विकल्पकसिद्धिरिति वाच्यम् ॥

Colophon :

इति मणिदर्पणे स्वप्रकाशवादः ॥

No. 4002. तत्त्वचिन्तामणिव्याख्या—दीधितिः.

TATTVACINTĀMAṆIVYĀKHYĀ : DĪDHITIḤ.

Substance, paper. Size, 9¼ × 3 inches. Pages, 21. Lines, 9 on a page. Character, Telugu Condition, good. Appearance, new.

Anumāna incomplete.

Breaks off in Vyadhikaraṇadharmāvacchinnābhāvakhaṇḍana.

This is a well known commentary by Raghunātha-Śirōmaṇi-Bhaṭṭāchārya on the Tattvacintāmaṇi of Gaṅgēśa.

Beginning :

ओं नमस्सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अध्ययनभावनाभ्यां सारं निर्णीय निखिलतन्त्राणाम् ।
दीधितिमधिचिन्तामणि कुरुते तार्किकशिरोमणिः श्रीमान् ॥

परजुष्टनयान्निवर्तमाना मनसाम्बांधरसा विशुद्धबोधैः ।
रघुनाथकवेरपेतदोषा कृतिरेषा विदुषां करोतु मोदम् ॥

न्यायमधीते सर्वस्तनुते कुतुकान्निबन्धमप्यत्र ।
अस्य तु किमपि रहस्यं केच(न) विज्ञातुमीशते सुधियः ॥

मान्यान् प्रणम्य विहिताञ्जलिरेष भूयो भूयो विधाय विनयं विनिवेदयामि ।
दूष्यं वचो मम परं निपुणं विभाव्य भावावबोधविहितो न दुनोति दोषः ॥

This manuscript was completed on the 13th of the dark fortnight of the Vaiśākha month in the year Raktākṣi.

Same work as the above.

See under the previous number for the beginning.

End:

अत्रायं क्रमः—

निष्कामनया भगवत्प्रीत्यर्थं कृतैः कर्मभिर्दुरितक्षयरूपात्मशुद्धिर्भवति; ततो विषयेषु वैराग्यम्; ततः श्रवणादौ प्रवृत्तिः; ततः श्रवणादिक्रमेण तत्त्वज्ञानोत्पत्तौ पूर्वोक्तमिथ्याज्ञाननाशादिक्रमेण मोक्षनिष्पत्तिः। अधिकमस्मदीयाभिनवचिन्तामणिव्याख्यायामनुसन्धेयं तर्ककर्कशविचारचातुरीधुरीणैरिति॥

कौण्डिन्यगोत्रसंभूतो नीलकण्ठाख्यपण्डितः।
कृतिमार्पिपदेतस्मै चन्द्रचूडाय मङ्गलम्॥

Colophon:

इति श्रीमत्पाण्योपनामककौण्डिन्यवंशपयःपारावारराकाचन्द्रायमाण-पदवाक्यप्रमाणपारावारपारीणश्रीरामभट्टतनूजश्रीनीलकण्ठभट्टविदुषा विरचितः तर्कसङ्ग्रहदीपिकाप्रकाशः समाप्तः ॥

No. **4169.** तर्कसङ्ग्रहदीपिकाव्याख्या—नीलकण्ठप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ :
NĪLAKAṆṬHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 23*a*. The other work herein is Ātmabōdhadīpikā 1*a*.

Wants beginning and end.

Same work as the above.

No. **4170.** तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ :
NĀRASIṀHAPRAKĀŚIKĀ.

Substance, paper. Size, $11 \times 8\frac{1}{2}$ inches. Pages, 659. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

A commentary on the Dīpikā of Annambhaṭṭa: by Rāya-Narasiṁha of Āḷūri family, pupil of Bālakṛṣṇa.

Complete.

Beginning:

ध्यात्वा श्रीमातृपादाब्जे दीपिकायाः प्रकाशकः ।
श्रीरायनरसिंहेन पण्डितेन चिकीर्ष्यते ॥

तत्र प्रारिप्सितग्रन्थविरामविरोधिविघ्नव्यूहविध्वंसनाविचक्षणां विश्वनाथादिविनुतिं शिष्यशिक्षार्थमादौ निबध्य शिष्याभि(व)धानाय प्रारिप्सितं गतिजानीते—विश्वेश्वरमित्यादिना । विश्वस्य प्रपञ्चस्य ईश्वरं सृष्ट्यादिकर्तारमित्यर्थः । एतेन ईश्वरे अनुमानप्रमाणं सूचितम् । तथाहि—

कार्यं कृतिजन्यं कार्यत्वाद्घटवत्; भूरादीनां स्थितिः पतनप्रतिबन्धकप्रयत्नप्रयुक्ता स्थितित्वात् नितम्बलम्नस्य पात्रादि(देः)स्थितिवत् ।

End:

इत्थञ्च वेदान्तशास्त्रं श्रवणोपयोगि, न्यायशास्त्रं मननोपयोगि, योगशास्त्रं निदिध्यासनोपयोगीति परम्परया त्रयाणामविशेषेण मोक्षफलकत्वं निराबाधमिति न किञ्चिदनुपपन्नमिति दीपिकाकारस्य निगूढाभिप्रायः ॥

Colophon:

इति श्रीमहोपाध्यायश्रीमद्बालकृष्णतर्कालङ्कारभट्टाचार्यसद्गुरुप्रसादलब्धविद्यावैभवश्रीमदाल्लूरिवंशपयःपारावारराकासुधाकररायनृसिंहपण्डित - कृतदीपिकाप्रकाशस्सम्पूर्णः ॥

दीपिकायां प्रकाशोऽसौ पेष्टा गूढार्थबोधनम् ।
पेष्टा दोषागतान्ध(न्ध्य)स्य भूयात्तोषाय वेतृ(वै नृ)णाम् ॥

No. **4171.** तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĀRASIṀHAPRAKĀŚIKĀ.

ubstance, palm-leaf. Size, $11\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 150. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Anumāna and Upamāna-Paricchēdas only complete.

Same work as the above.

No. 4172. तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĀRASIMHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 14⅜ × 1⅜ inches. Pages, 240. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Pratyakṣapariccheda only, complete.

Same work as the above

No. 4173. तर्कसङ्ग्रहदीपिकाव्याख्या—नारसिंहप्रकाशिका.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ : NĀRASIṀHAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 19⅛ × 1⅝ inches. Pages, 196. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Some leaves are wanting in the middle.

Same work as the above

No. 4174. तर्कसङ्ग्रहदीपिकाटिप्पणी.

TARKASAṄGRAHADĪPIKAṬIPPAṆĪ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 3913.

Incomplete.

A gloss on the Tarkasaṅgrahadīpikā : by Rāmarudra.

Beginning :

तातस्य तर्कसरसीरुहकाननेषु रामेश्वरस्य तरणेश्चरणौ प्रणम्य ।
श्रीरामरुद्रसुकृती कृतिनां हिताय लीलावशात्किमपि कौतुकमातनोति ॥

अथ पण्डितशिरोमणिरन्नंभट्टाख्यः निजनिर्मिततर्कसङ्ग्रहव्याख्यानश्चि- कीर्षुः निर्विघ्नपरिसमाप्तये कृतं मङ्गलं शिष्यशिक्षायै श्लोकतो निबध्नाति—

विश्वेश्वरमित्यादिना । विश्वेश्वरं जगन्नियन्तारम् । साम्बमूर्तिम् अम्बा पार्वती तत्सहितविग्रहम् । गिरां वेदरूपवाचां गुरुम् उपदेष्टारम् । गिरं गुरूनिति क्वचित्पाठः ; तत्र सरस्वतीं विद्यागुरुंचे(रूंश्चे)त्यर्थः ।

End:

विघ्नध्वंसपूर्वकत्वकथनन्तु शिष्टस्य मङ्गलस्य कथं कालान्तरभाविफलकत्वमित्याशङ्कानिरासाय विघ्नध्वंसस्य द्वारतालाभार्थमित्यवधेयम् । निबन्धनस्य प्रयोजनमाह—शिष्टेति.

No. 4175. तर्कसङ्ग्रहदीपिकाव्याख्या.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ.

Substance, paper. Size, $13\frac{3}{8} \times 8\frac{3}{8}$ inches. Pages, 122. Lines, 27 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Pratyakṣaparicchēda only, complete.

A gloss on the Dīpikā of Annambhaṭṭa : by Hanumadbhaṭṭa.

Beginning:

लक्ष्मीशगौरीशविधीन्द्रवन्दितं जगन्निदानं जगतामभीष्टदम् ।
सारस्वतं शैशवमङ्गणे वपुः स्य(न्दिष्य)माणं भवुकाय सन्ततम् ॥

व्यासार्यं पितरं सुधाकरमिव श्रीकाश्यपाख्यान्वय-
क्षीराब्धौ गुरुवीरराघवपदं विद्वच्छिखामण्डनम् ।
दुर्वादिद्विरदेन्द्रकुम्भयुगळग्रासैकबद्धस्पृहं
स्वान्तप्रान्तगतान्धकारदिनपं वन्दारुरत्नं स्तुमः ॥

अहञ्च हनुमान् ज्ञात्वा तन्त्रं सर्वं विशेषतः ।
विवृणोमि कृतेऽन्येषां तर्कसङ्ग्रहदीपिकाम् ॥

तर्कसङ्ग्रहव्याख्यां चिकीर्षुरन्नंभट्टः निर्विघ्नपरिसमाप्तये कृतस्य ईश्वरप्रणामरूपमङ्गलस्य अन्तेवासिनोऽप्येवङ्कुर्युरित्यन्तेवासिशिक्षायै निबन्धनं कुर्वन् चिकीर्षितं प्रतिजानीते—विश्वेश्वरमिति । ननु ग्रन्थारम्भे अन्यदेवतानत्यादिरूपं मङ्गलं प्रथमतः कुतो न कृतमिति चेन्न ।

End:

इन्द्रियाणां प्रत्यक्षज्ञानकारणत्वे युक्तिमाह—असाधारणेति । साधारणकारणवारणाय इन्द्रियपदम् । चक्षुरादि प्रत्यक्षप्रमाणमिति । प्रत्यक्षप्रमाकरणमित्यर्थः ॥

No. **4176.** तर्कसङ्ग्रहदीपिकाव्याख्या.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ.

Substance, palm-leaf. Size, 10 × 1½ inches. Pages, 70. Lines, 5 on a page. Character, Telugu and Nandināgarī. Condition, injured. Appearance, old

A commentary on the Dīpikā of Annambhaṭṭa.

Incomplete.

Beginning:

अस्तु चेतसि तद्वस्तु प्रस्तुतं श्रुतिमस्तकैः ।
निस्तुलं श्च(च) प्रसादं यत्प्रसादं तनुतां मयि ॥

पुरः प्रसार्य . . . मीषन्मतिशलाकया ।
दीपिकां दीपयित्वेक्षे रहस्यं तर्कसङ्ग्रहे ॥

प्रारिप्सितविघ्ननिवारणैकप्रयोजनस्वे(ष्टदेवता)प्रणिपातरूपं मङ्गलमादौ निबध्नता चिकीर्षितं प्रतिज्ञायते—विश्वेश्वरमित्यादिना । साम्बमूर्तिमिति हेतुगर्भविशेषणम् । असन्निहितप्रकृतेश्चैतन्यस्य ईश्व(र)त्वायोगात् ।

End:

उपसंहरति तस्मादिति। उष्णस्पर्शभास्वररूपवत्त्वादित्यर्थः,। ए(त)दुक्तं लीलावत्याम्—

अनुच्छिन्नद्रवत्वन्तु वस्तु यत्प्रतिभासते।
सुवर्णव्यवहारोऽयं तत्र शास्त्रं प्रवर्तते॥ इति॥

No. 4177. तर्कसङ्ग्रहदीपिकाव्याख्या.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{3}$ inches. Pages, 84. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Lakṣaṇāvalī 44*a*.

Breaks off in Śabdakhaṇḍa.

Another commentary on the Dīpikā of Annambhaṭṭa.

Beginning:

शुक्लाम्बरधरं . . . . शान्तये॥

नत्वा विघ्नेश्वरं देवं . . . . . . ।
. . . . ॥

(अन्नम्भ)ट्टाख्यः स विद्वान् प्रारिप्सितस्य ग्रन्थस्य अविघ्नेन प्रचयगमनाभ्यां शिष्टाचारपरिपालनाय च कृतं विशिष्टेष्टदेवता . . . . . . चिकीर्षितं प्रतिजानीते—विश्वेश्वरमिति। यद्यपि ईश्वरनमस्कारेणैव सर्वदेवता नमस्कृताः तस्य सर्वात्मकत्वात् आत्मैव देवताः . . . . (ग्रन्था)दौ कर्तव्यतां सूचयति—गिरं गुरुमिति। शिशुहितामिति। मन्दप्रज्ञानामपि सम्यक् व्युत्पत्तिदायिनीमित्यर्थः।

End:

ननु शाब्दत्वं न जातिः; साक्षात्त्वादिना साक(ङ्क)र्यात्। तथाहि – साक्षात्त्वं विहाय शाब्दत्वं ज्योतिष्टोमादिवाक्यजन्यप्रमायां वर्तते; शाब्दत्वम्.

No **4178.** तर्कसङ्ग्रहव्याख्या.

TARKASAṄGRAHAVYĀKHYĀ.

Pages, 63. Lines, 7 on a page.

Begins on fol. 1ᵇ of the MS. described under No. 28

Pratyakṣakhaṇḍa only complete.

A commentary on the Tarkasaṅgraha of Annambhaṭṭa.

Author unknown.

Beginning:

निधाय हृदि . . . . . तर्कसङ्ग्रहः॥ इति।

ग्रन्थारम्भे मङ्गलमाचरन्त्यभियुक्ताः। तत्र यः पुमान् ग्रन्थमारभते; तेन जन्मान्तरे दुष्कर्म कृतं स्यात्; तेन च दुरितमुत्पन्नं भवेत्; तच्च दुरितमेतस्मिन् जन्मनि एतत्पुरुषारम्भित(ब्ध)ग्रन्थसमाप्तिं प्रतिबध्नाति; प्रतिबन्धके सति किञ्चिदपि नोत्पद्यते।

* * * *

अनन्तरं विशेषधर्मप्रकारकजिज्ञासावन्तः(न्तं) पदार्थाः कियद्विशेषधर्मविशिष्टा इति पृच्छन्तं शिष्यं प्रति तदीयजिज्ञासाशान्तये आचार्यो ब्रूते—द्रव्यगुणेत्यादिना। सप्त पदार्था इत्यन्तं विशेष्यवाचकम्, अभावा इत्यन्तं विशेषणवाचकम्। सप्तेत्यस्य सप्तत्वसंख्याविशिष्टविभाजकधर्मान्यतमविशिष्टा इत्यर्थः।

End:

विशेषणविशेष्यभावः। भाव इत्यस्य धर्म इत्यर्थः; तथाच विशेषणवृत्तिधर्मः विशेषणत्वं. विशेष्यवृत्तिधर्मः विशेष्यत्वम्; तथाचाभावेन साकं विशेषणत्वविशेष्यत्वान्यतरः सन्निकर्षः.

No 4179. तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.

TARKASAṄGRAHAVYĀKHYĀ: NYĀYABŌDHINĪ.

Pages, 26. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 4116.

An elementary work on Nyāya by Gōvardhana-Sudhī, being a commentary on the Tarkasaṅgraha of Annambhaṭṭa.

Up to Śabdaparicchēda.

See under the next number for the end.

Beginning:

अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्धनसुधीस्तनुते न्यायबोधिनीम् ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति – निधायेति । पदार्थान् विभजते द्रव्येति । अत्र सप्तग्रहणं पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्याप्तिलाभाय ।

No. 4180. तर्कसङ्ग्रहव्याख्या—न्यायबोधिनी.

TARKASAṄGRAHAVYĀKHYĀ: NYĀYABŌDHINĪ.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 20. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Candrālōka 11*a*.

Complete

Same work as the above.

See under the previous number for the beginning.

End:

अनेक इत्यनुपादाने नित्यत्वविशिष्टसमवेतत्वमात्रोक्तौ आकाशगतैकत्वपरिमाणादौ जलपरमाणुगतरूपादावतिव्याप्तिः; जलपरमाणुरूपादेः पृथिवीपरमाणुगतरूपादिवत् पाकाभावेन जलपरमाणुरूपादेः आकाशगतै-

कत्वपरिमाणादेः नित्यत्वात् समवेतत्वाच्च । अतोऽनेकेति समवेतत्वविशेषणम् ॥

Colophon:

इति श्रीगोवर्धनभट्टाचार्यविरचितायां तर्कसङ्ग्रहव्याख्यायां न्यायबोधिन्यां शब्दपरिच्छेदस्समाप्तः ॥

No. **4181.** **तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.**

TARKASAṄGRAHAVYĀKHYĀ : NYĀYABŌDHINĪ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 17. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Breaks off in Anumāna-paricchēda.

Same work as the above.

No. **4182.** **तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.**

TARKASAṄGRAHAVYĀKHYĀ : NYĀYABŌDHINĪ.

Pages, 25. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 4143.

Pratyakṣa incomplete.

Same work as the above.

No. **4183.** **तर्कसङ्ग्रहव्याख्या--न्यायबोधिनी.**

TARKASAṄGRAHAVYĀKHYĀ : NYĀYABŌDHINĪ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 21. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Pratyakṣa incomplete.

Same work as the above.

No. 4184. तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः.

TARKASAṄGRAHAVĀKYĀRTHANIRUKTIḤ.

Pages, 45. Lines, 8 on a page.

Begins on fol. 15a of the MS. described under No. 1193.

A brief commentary on Tarkasaṅgraha by Paṭṭābhirāma

Complete.

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः क्रियते मया ॥

इह खलु प्रारिप्सितप्रकरणपरिसमाप्तिप्रत्यर्थिप्रत्यूहविध्वंसनाय ग्रन्थारम्भे मङ्गलमनुतिष्ठन्ति शिष्टाः। प्रतिपित्सूनां प्रतिपत्तये द्रव्यादिपदार्थान् प्रतिपिपादयिषुरन्नंभट्टस्समनुमतं मङ्गलमुपनिबध्नाति – निधायेति । ननु शिष्टसम्प्रदायादनुष्ठीयतां नाम मङ्गलम्; तदुपनिबन्धनं निरर्थकमिति चेन्न ; उपनिबन्धनस्य शिष्यशिक्षार्थतामन्नम्भट्टो मनुते ।

End:

सर्वेषामेवेति । यथायथं यथायोग्यम् । अन्तर्भावादिति । अन्तर्भावप्रकारश्च दीपिकायां दर्शितः ; इह तु विस्तरभिया न लिख्यत इति सर्वं समञ्जसम् ॥

अयुक्तमपि शास्त्रज्ञा यदुक्तं पुनरुक्तिमत् ।
बालबोधनिमित्तार्थं क्षम्यतां तदशेषतः ।

Colophon:

निरुक्तिः समाप्ता ॥

No. 4185. तर्कसङ्ग्रहवाक्यार्थनिरुक्तिः.

TARKASAṄGRAHAVĀKYĀRTHANIRUKTIḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 60. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Pratyakṣaparicchēda incomplete.

Same work as the above.

No. 4186. तर्कसङ्ग्रहपरिभाषा.

TARKASAṄGRAHAPARIBHĀṢĀ

Pages, 27. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1193.

An elementary treatise on the conclusions of the Nyāya and Vaiśēsika systems: by Paṭṭābhirāma.

Complete

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
बालव्युत्पत्तये तर्कसङ्ग्रहः क्रियते मया ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायाभावास्सप्त पदार्थाः । तत्र द्रव्याणि—पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव । तत्र भूः पृथिवी मृत्पाषाणघटपटादिरूपा परमाण्वादिमहापृथिवीपर्यन्ता । द्वाभ्यां परमाणु(भ्यां)मिलिताभ्यामेकं द्व्यणुकमुत्पद्यते; त्रिभिर्द्व्यणुकैः त्र्यणुकम्; ततश्चतुरणुकादिक्रमेण महती पृथिवीत्युत्पद्यते ।

End:

तत्र पदज्ञानं करणं पदार्थोपस्थितिर्व्यापारः । उक्तानि प्रमाणानि चत्वारि ।

पट्टाभिरामविदुषा काणादन्यायगोचरा ।
बालानामवगाहाय परिभाषा स्फुटीकृता ॥

No. 4187. तर्कसङ्ग्रहपरिभाषा.

TARKASAṄGRAHAPARIBHĀṢĀ.

Pages, 35. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 4105.

Complete.

Same work as the above.

No **4188.** तर्कसारः.

TARKASĀRAḤ.

Substance, palm-leaf. Size, 17¾ × 1¼ inches. Pages, 276. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

The leaves are neither numbered nor arranged in proper order; consequently the extent of the work cannot be quite correctly determined.

Breaks off in Śabdaparicchēda.

A commentary on the Tarkabhāṣāprakāśa of Cennubhaṭṭa: by Kōmpella Vēṅkaṭabudha.

Beginning:

आलिङ्गिताद्रितनयाङ्गमनङ्गलीलामूलाङ्कुरायितलसत्पुलकप्रपञ्चम् ।
वेलातिगाश्रितकृपालतिकालवालं पात्यान्महः किमपि नः परदेवताख्यम् ॥
कोम्पेल्लवेङ्कटबुधः प्रथितानुभावान्वाणीविनायकगुरून्प्रणिपत्य मूर्ध्ना ।
श्रीचन्नुभट्टकृतिभासुरतर्कभाषाभावं प्रकाशयति बालविबोधहेतोः ॥
काक्षाङ्क्षिवर्त्म विदुषामपि दुर्विबोधं क्वाहं बुधास्त्रिचतुराणि पदानि जानन् ।
कुर्वे तथापि सहसा ननु तर्कसारं सन्तो हसन्त्वयमनुग्रह एव नूनम् ।

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां मध्ये धर्मादीनां त्रयाणां क्षयिष्णुत्वेन सातिशयत्वेन च हेयत्वान्मोक्षस्यैकस्योपादेयत्वात्तस्य च श्रवण-मननिदिध्यासनोत्तरकालीनेतरभिन्नत्वप्रकारकात्मसाक्षा(त्का)रसाध्यत्वाद्वे-दान्तवाक्यैः श्रुतात्मस्वरूपस्य पुरुषस्य मननोपयोगितया आत्मनदित-रपदार्थस्वरूपप्रतिपादिकामान्वीक्षिकीं प्रणिनीषुर्भगवान् सूत्रकारः प्रेक्षावतां प्रवृत्तिसिद्धये विषयप्रयोजनादिसंबन्धमादावसूत्रयत् — प्रमाणप्रमेयसंशय- . . . . तत्त्वज्ञानान्निःश्रेयसाधिगमः — इति । तत्त्वं ज्ञायते अनेनेति तत्त्वज्ञानं शास्त्रम्: तस्मान्मोक्षप्राप्तिर्भवतीत्यर्थः ।

End:

भेदान्वये तु भिन्नविभक्तिकपदसमभिव्याहाराभावात् निराकाङ्क्ष . . . . . . सरूपाकाङ्क्षाया आत्मनिष्ठत्वेन अर्थेषु पदेषु

वा अभावेऽपि जिज्ञासायोग्यनावच्छेदकसमभिव्याहारविषयत्वावच्छिन्नत्वे रूपाकाङ्क्षायाः पदेषु सत्त्वेन.

No. 4189. तर्कसारः.

TARKASĀRAḤ.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 91. Lines, 4 on a page. Character, Telugu Condition, good. Appearance, new.

Incomplete.

Same work as the above.

Beginning:

प्रमाणादिषोडशपदार्थतत्त्वज्ञानान्मोक्षप्राप्तिर्भवतीति न्यायपञ्चाध्याय्यां प्रथमसूत्रेण श्रीमदक्षपादमहामुनिभिर्गौतमाचार्यैस्सिद्धान्तितम् । तादृशञ्च प्रमाणादिषोडशपदार्थतत्त्वज्ञानमुद्देशलक्षणपरीक्षादिकं विना न सम्भवतीति तासामप्यवश्यकर्तव्यतायां भाष्यकारैः प्रतिपादितायामुद्देशादीनां निरूपणं क्रियते । तत्र वस्तुसङ्कीर्तनमुद्देश इति स्फुटत्वाल्लक्षणस्वरूपविचारः क्रियते । तत्रासाधारणधर्मो लक्षणमिति प्राचीना वदन्ति ।

End:

तथापि संस्कारपदं भावनाव्यतिरिक्तपरमित्येवंरूपेण संयोगादीनां समानासमानारम्भकत्वमूह्यम् । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभावनाशब्दाः.

No. 4190. तर्कसुधा.

TARKASUDHĀ.

Pages, 61. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 4033.

A treatise on certain questions bearing on Nyāya by Śrīśailasūri, a Paṇdit at the court of a Vīracikadēvēndra.

Incomplete.

Beginning:

स्वैरं हरेः पुलकितोपवनभ्र(द्रु)माणि हर्षोदयस्तिमितवन्यविहङ्गमानि ।
अन्योन्यवैरविगमोत्सुकसर्वसत्त्वान्याकर्णयानि मुरलीकलशिञ्जितानि ॥

आलोलकुन्तलमरालकलापचूडमानर्तितभ्रुमुखरीकृतवंशनालम् ।
वस्तु त्रिभङ्गललितं मयि सन्निधत्तां व्यत्यस्तपादकमलं व्रजभागधेयम् ॥

जयति श्रीबालधन्विकुलं तदमलं भुवि ।
कृपा निरुपधिर्यस्मिन् यतीन्दोर्नित्यमेधते ॥

तत्र रत्नाकर इव प्रादुरासीत्कलानिधिः ।
श्रीमान् सौम्यनृसिंहार्यस्सन्मार्गद्योतनोद्यतः ॥

वेदान्तार्थविचारनिश्चितमतेस्तस्मादभूत्तत्कृपा-
भूमप्राप्तसमस्तशास्त्रहृदयः श्रीशैलसूरिः कृती ।
यो गोविन्दपदारविन्दयुगलीन्यस्ताखिलात्मास्थितिः
तत्कल्याणगुणानुभूत्युदितया तत्सेवया निर्वृतः ॥

प्रौढेनाप्रतिमेन वीरचिकदेवेन्द्रेण बाल्यात्प्रभृ-
त्येकान्त्यान्निजानिर्विशेषमनघां वृद्धिं परां प्रापितः ।
सोऽयं न्यायपयोनिधिं निरवधिं निर्मथ्य निष्पादितां
भक्त्या तर्कसुधां समर्पयति तत्प्रेम्णा जुषध्वं बुधाः ॥

इह खलु—

प्रयोगहेतुभूतार्थतत्त्वज्ञानसमुद्भवः ।
शब्दः प्रमाणमित्येतल्लक्षणं लक्ष्यते मणौ ॥

तदर्थश्च प्रयुज्यत इति प्रयोगो वाक्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्ज-
न्यत्वम् । तादृशश्च शब्दो लोके घटमानयेत्याद्यविसंवादि वाक्यम् ।

End:

अतस्तात्पर्यादनुमानाविषयस्वसमानकालीनविषयसत्तावगाहिज्ञानजनक-त्वादेव नानुवादकत्वम् । अतः शब्दःस्वातन्त्र्येण प्रमाणमिति निरवद्यम् ॥

शौरेः कौशिकतिरुमलदेशिकहृत्पद्मसद्मरसिकस्य ।
तर्कसुधाख्यानिबन्धे पूर्णः शब्दस्वतन्त्र(ता)वादः ॥
प्रौढेनाप्रतिमेन . . . जुषध्वं बुधाः ॥

Colophon:

इति श्रीकौशिककुलतिलकश्रीशैलसूरिकृतिषु तर्कसुधायां शब्दखण्डे शब्दस्वातन्त्र्यवादः सम्पूर्णः ॥

No. 4191. तर्कामृतम्.

TARKĀMṚTAM.

Pages, 31. Lines, 4 on a page.

Begins on fol. 21*a* of the MS. described under No. 4143.

A treatise on Nyāya logic: by Jagadīśa.

Complete.

Beginning:

ब्रह्माद्या निखिलार्चितास्त्रिदशसन्दोहास्सदाभीष्टदाः
अज्ञानप्रशमाय यत्र मनसो वृत्तीस्समस्ता दधुः ।
श्रीविष्णोश्चरणाम्बुजं भवभयध्वंसैकबीजं परं
हृत्पद्मे विनिधाय तं निरुपमं तर्कामृतं तन्यते ॥

अथ रतिश्रियश्च(श्रुतिरश्रूयते)—आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति । अस्यार्थः—मुमुक्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मदर्शनमिष्टसाधनमिति यावत् । आत्मदर्शनोपायः क इत्यत आह श्रोतव्य इत्यादि । तेनार्थक्रमेण शाब्दक्रमस्त्यक्तो भवति; अग्नि-होत्रं जुहोति यवागुं(गूं) पचतीत्यादिवत् । . . . . . .

पदार्थो द्विविधः—भावोऽभावश्चेति । तत्र भावष्षड्विधः — द्रव्यगुणकर्मसामान्यविशेष(समवाय)भेदात् । तत्र द्रव्यत्वगुणत्वकर्मत्वानि जातयः; सामान्यत्वादीनि तूपाधयः ।

End:

न कलञ्जं भक्षयेदित्यादौ बलवदनिष्टजनके लक्षणा । क्रियासङ्गतस्य एवकारस्य अत्यन्तायोगव्यवच्छेदोऽर्थः—यथा नीलं सरोजं भवत्येवेति । विशेषणसङ्ग(त)स्यायोगव्यवच्छेदः—यथा शङ्खः पाण्डर एवेति । विशेष्यसङ्गतस्यान्ययोगव्यवच्छेदः—यथा पार्थिव एव धनुर्धर इति । एवं दिशा सर्वत्र बोध्यः ॥

Colophon:

इति जगदीशविरचितं तर्कामृतं समाप्तिमगमत् ॥

No. 4192. तर्कामृतम्.

TARKĀMṚTAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 3954.

Contains Śabdakhaṇḍa.

Same work as the above.

No. 4193. तर्कामृतम्.

TARKĀMṚTAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Breaks off in the Śabdakhaṇḍa.

Same work as the above.

No. 4194. तर्कामृततरङ्गिणी.

TARKĀMṚTATARAṄGIṆĪ.

Pages, 39. Lines, 9 on a page.

Begins on fol. 12*a* of the MS. described under No. 3954.

A commentary on the Tarkāmṛta of Jagadīśa.

By Mukundabhaṭṭa.

Complete.

This manuscript is stated to have been transcribed by one Cakravarti Varāhācāryar.

Beginning:

(शरणीकृत्य विश्वेशचरणौ त)न्यतेतराम् ।
बालानामवगाहाय तर्कामृततरङ्गिणी ॥

ब्रह्माद्या इति । तच्छ्रीविष्णोः चरणाम्बुजमित्यन्वयः । त्रिदशानां सन्दोहाः समूहाः त्रिदशश्रेष्ठा इति यावत् । स . . . . . . यः समस्ताः चाक्षुषस्पर्शनाद्याः मनसोऽन्तःकरणस्य वृत्तीः । चरणाम्बुजमित्यत्र हृत्पद्म इत्यत्र च उत्तरपदार्थप्रधानो न मयूरव्यंसकादिसमासः ।

End:

अव्यवधानञ्च प्रकृतवाक्यार्थघटकोपस्थितित्वावच्छेदेन प्रकृतान्वयबोधानुकूलोपस्थित्युत्पत्त्यनधिकरणत्वे सति तादृशोपस्थित्यधिकरणक्षणध्वंसाधिकरणो यः क्षणः तद्ध्वंसाधिकरणक्षणानुत्पत्तिकत्वम् । गिरिज्ञानानीति बहुवचनन्तु व्यक्त्यभिप्रायेण ॥

Colophon:

इयं तर्कामृततरङ्गिणी सम्पूर्णा ॥

No. 4195. तर्कामृतव्याख्यानम्—सुवर्णचषकम्.

TARKĀMṚTAVYĀKHYĀNAM : SUVARṆACAṢAKAM.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 9'. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in Anumāna.

A commentary on the Tarkāmṛta of Jagadīśa: by Gaṅgārāmajat.

Beginning:

आत्मरूपगुणकृत्यकारिणे लोचनाकलिततत्त्वसाक्षिणे ।
नूतनोद्भवसमाधिहेतवे नीलकण्ठगुरवे नमो नमः ॥

गुरुगणना यत्पूर्वं यस्याग्रे स ब्रह्माग्रणीतनयः ।
कविमिव तं कवयन्तं तातं नाराय(णं नौमि) ॥

(मुक्तावलीप्रकाशात्स्फुरिते चषके समर्पितं सुधिया) ।
(गङ्गारामेण मया) पिबन्तु तर्कामृतं सुधियः ॥

यद्यप्यविगीतशिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे विशेषतः फलजिज्ञासायां दृष्टसम्भवे विश्वजिन्न्यायानवताराद्रात्रिसत्रन्यायेन फलकल्पनाध्रौव्ये परिशेषानुमानप्रवृत्तस्य पुंसः प्रारब्धं कर्म निर्विघ्नं परिस-(माप्यतामिति मङ्गले) प्रवृत्तपुरुषकामनाविषयत्वे समाप्तिरप्युपस्थिता ; तथापि नास्तिकग्रन्थपरिसमाप्तौ अवश्यक्लृप्तनियतपूर्ववृत्तिताकेन स्वतस्सिद्ध-विघ्नात्यन्ताभावेनैव विघ्नस्थलीयसमाप्तिनिर्वाहे न तत्र मङ्गलस्य हेतुत्वम् ; अन्यथासिद्धत्वात् ।

For the end, see under the next number.

No. **4196.** तर्कामृतव्याख्यानम्—सुवर्णचषकम्.

TARKĀMṚTAVYĀKHYĀNAM : SUVARṆACAṢAKAM.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 70. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Same work as the above.

Anumānakhaṇḍa complete.

For the beginning, see under the previous number.

End:

एतद्दोषरहित इति । सर्वेषामेव दोषाणां नित्यदोषत्वात् । शब्दो नित्यः शब्दत्वादित्यत्र उक्तासाधारण्यस्य साध्यवदवृत्तित्वरूपस्य विरहादित्याशयः । सद्धेतुः प्रमाकरणमेव; अयोगोलकं धूमवत् धूमादित्यादेः सदोषस्य प्रमाकरणत्वेऽपि न क्षतिः । एतद्दोषरहित एव हेतुस्सद्धेतुः प्रमाकरणमिति व्याख्या दुर्व्याख्यैवेति मन्तव्यम् ॥

Colophon:

समाप्तः अनुमानखण्डः ॥

No. **4197.** तार्किकरक्षाविवृतिः.

TĀRKIKARAKṢĀVIVṚTIḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 175. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

A commentary on Varadarāja's Tārkikarakṣā (a treatise based on the Nyāya and Vaiśēṣika systems): by Harihara of Bhāradvājagōtra.

Breaks off in Guṇadravyasambandha.

Beginning:

अन्योन्यव्यस्तसामान्यसमावेशनिदर्शनम् ।
अव्याजभक्तिसुलभमव्याद्द्वयमुखं महः ॥

यदुपक्रमञ्जनि(नु)ष्मद्वर्गो यदुपज्ञमखिल आम्नायः ।
तमजमनन्तमुपासे वृषाकपायीमनोरमं देवम् ॥

ऐश्वर्येहावशैर्नित्यं मनोवागादिभिः सुरैः ।
वन्दनीयां भजे देवीं स्वाभीष्टफलसिद्धये ॥

प्रकरणमुदितं गौतममुनिमतमनुसृत्य वरदराजेन ।
विवृणोमि हरिहरोऽहं भारद्वाजो नृसिंहसूरिसुतः ॥

इह खलु वरदराजो नाम कश्चिद्विपश्चित् अक्षपादपक्षिलादिभिरनेकधा लक्षणपरीक्षाभ्यां प्रपञ्चितपदार्थजातं बालिशानुजिघृक्षया कारिकानिबन्धेन तार्किकरक्षाख्यग्रन्थेन सङ्गृह्य तार्किकरक्षां स्वयमेव विवरीतुमारभमाणः प्रारिप्सितस्य ग्रन्थस्य परिपन्थिप्रत्यूहविघाताय शिष्टाचारपरिप्राप्तमिष्टदेवतानमस्काररूपं मङ्गलमादा निबध्नाति — प्रथमश्लोकेन नमामि परमात्मानमित्यादिना । परमात्मानं नमामीति संबन्धः । परम उत्कृष्टश्चासौ आत्मा चेति कर्मधारये परमात्मशब्देन ईश्वर उच्यते ।

End :

तच्चानुगतरूपादि । तन्तुपटोत्पत्त्यनन्तरं समवायिकारणाभावलक्षणप्रतिबन्धकापगमे सति अविलम्बेन कार्यजनकत्वमप्यस्त्येवेति न(नाति)व्याप्तिः। ततश्चैकाश्रितकार्यं प्रति निमित्तत्वानधिकरणत्वे सत्यसमवायिकारणवृत्तिगुणत्वापरजातिमत्त्वं(त्त्वम)समवयिकारणत्वम् । नवेत्यादि । असमवायिकारणत्वानधिकरणत्वे सति निमित्तकारणवृत्तिगुणत्वापरजातिमत्त्वं निमित्तकारणत्वं नाम । संयोगेत्यादि । उष्णस्पर्शः पाकजे निमित्तम्

No. 4198. तार्किकरक्षाविवृतिः.

TĀRKIKARAKṢĀVIVṚTIḤ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{3}{4}$ inches. Pages, 42. Lines, 9 on a page. Character, Kanarese. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

No. 4199. तार्किकरक्षाव्याख्या.

TĀRKIKARAKṢĀVYĀKHYĀ.

Pages, 64. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 1350.

Contains the Anumāna portion ; wants beginning and end.

Another commentary on Varadarāja's Tārkikarakṣā.

Author unknown.

Beginning :

तत्रान्यथा हेतुत्वादित्याह तथापि बाधेति । व्यभिचारज्ञानविरहतर्कयोरेव प्रयोजकत्वस्योक्तत्वान्नन्वित्यादिना तज्ज्ञानमादायाक्षेपोऽनुपपन्न इत्याशङ्क्याह . . . तस्मात् स्थितमेतत्—स्वतस्सिद्धशङ्काविरहस्थले तर्कापेक्षा नास्त्येव, यत्रापि शङ्का तत्रापि व्याघातावधिरेवेति नानवस्थिते-(तिः) । केषाञ्चिदन्यथावस्थापरिहारमाह परे त्विति । न तर्कान्तरेति ।

End :

ननु स्वकीयायां शङ्काप्रतिबन्धकत्वेऽनवस्थाशङ्कापरिहारेऽपि व्याघातावधिराशङ्केत्याचार्यमतं खण्डितमित्याशङ्क्य तस्यैवायमर्थकथनपरत्व . . . . . . तत्र हीति । व्याघातावधिराशङ्केत्यत्र हीत्यर्थः । एवं स्यादित्यत्रैवं शब्दार्थमाह स्वकीयेति.

No. 4200. न्यायकौस्तुभः.

NYĀYAKAUSTUBHAḤ.

Substance, paper. Size. 11½ × 5 inches. Pages, 488. Lines, 14 on a page. Character, Telugu and Dēvanāgarī. Condition, good. Appearance, new.

Complete. To the end of Upamāna.

A treatise on Nyāya logic by Mahādēva Paṇatāmakara, son of Mukundapaṇḍita.

Beginning :

दाक्षायणीरमणसच्चरणारविन्दं ब्रह्मादिभिस्सुरवरैरपि सेव्यमानम् ।
श्रीगौतमं मुनिवरं मणिकारमुख्यान् आन्वीक्षिकीरतबुधांश्च नमामि भक्त्या ॥

मुकुन्दं पितरं नौमि षट्शास्त्रीतत्त्वदर्शिनम् ।
यत्पुण्यपरिपाकेन शास्त्रे गतिरभून्मम ॥

पुरुहूतपुरोहितं सभायां कवितायां किल कालिदासमन्यम् ।
निखिलाखिलशास्त्रविद्धुरीणं शितिकण्ठाभिधसद्गुरुं नमामि ॥

मोक्षहेतुप्रमाणादितत्त्वज्ञानाय सद्धियाम् ।
महादेवेन सुधिया क्रियते न्यायकौस्तुभः ॥

न्यायसिद्धान्त(नि)ष्कर्षे जिज्ञासा यस्य विद्यते ।
सङ्ग्राह्यस्तेन सुधिया न्यायकौस्तुभ आदरात् ॥

न्यायाम्भोधिं समुन्मथ्य भावनामन्दराद्रिणा ।
विष्णुनेव महादेवेनायं कौस्तुभ उद्ध(द्धृ)तः ॥

इह सकलशिष्टानां ग्रन्थारम्भे मङ्गलाचरणात् मङ्गलफलमादौ विचार्यते । तत्र प्राचीनानुयायिनः—

मङ्गलं (न) समाप्ति(फल)कम्; तस्य चाशुविनाशितया समाप्तव्यवहितपूर्वक्षणे असत्त्वेन हेतुत्वमनुपपन्नमिति विघ्नध्वंसो व्यापारः; तथा च समाप्तित्वावच्छिन्नं प्रति विघ्नध्वंसद्वारा मङ्गलं हेतुरिति पर्यवसन्नम् ॥

End:

सप्रतियोगिकत्वं ससम्बन्धिकत्वम्; तेन संबन्धान्तराणामपि सङ्ग्रह इत्यलं पल्लवेन ॥

संक्षेपेणैवोपमानं ग्रन्थकृद्भिर्निरूपितम् ।
अतः किञ्चिद्विस्तरेण मया तद्धि निरूपितम् ॥

Colophon:

इति श्रीमन्मुकुन्दपण्डितात्मजपणतामकरोपनामकमहादेवपण्डित(विर)चिते न्यायकौस्तुभे उपमानकौस्तुभस्सम्पूर्णः ॥

No. **4201.** न्यायचूडामणिः.

NYAYACŪḌĀMAṆIḤ.

Substance, palm-leaf. Size. 15¾ × 1½ inches. Pages, 191. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Prāmāṇyavāda complete.

A work on Nyāya logic: by Rāmakṛṣṇādhvarin, son of Dharmarājādhvarīndra.

Beginning:

ननु प्रमाणतत्त्वमत्र विविच्यत इत्यनेनैव प्रेक्षावत्प्रतिपित्सितार्थप्रतिज्ञासिद्धेः शेषवैयर्थ्यम् । न चान्वीक्षिकीप्रयोजनमोक्ष . . . . . . कदेशप्रमाणतत्त्वनिरूपकस्वग्रन्थस्यापि तत्प्रयोजनसिद्धेर्न वैयर्थ्यमिति वाच्यम्; यतो मणेरित्यादिनैव स्वग्रन्थप्रयोजनस्योक्तत्वादित्याशङ्क्य प्रेक्षावत आस्तिकस्यैहिकप्रयोजनमात्रेण गहनक्लेशात्मकग्रन्थे प्रवृत्त्यनुपपत्तेः ।

End:

तथा सति समूहालम्बने विशेषणताविशेष्यकत्ववर्णनवैयर्थ्यादित्या-शङ्क्य विशिष्टबुद्धौ तस्याः प्रकारकत्वा . . . . न प्रकारशब्दस्य विषयपरत्वाभावात् तच्छब्देनापि तथैव परामर्शादित्याश-येनाह्—तथाचेति ॥

Colophon:

इति श्रीधर्मराजाध्वरीन्द्रात्मजश्रीरामकृष्णाध्वरिविरचिते न्यायचूडा-मणौ प्रामाण्यवादस्समाप्तः ॥

No. 4202. न्यायपारिजातः.

NYĀYAPĀRIJĀTAḤ.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{3}{4}$ inches. Pages, 160. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning and end in Śabdakhaṇḍa.

Incomplete.

A treatise on Nyāya logic: by Yallayārya

Beginning:

द्वितीयकल्पेऽपि किं प्रतिपाद्येच्छाविषयत्वमुत प्रतिपादकेच्छाविष-यत्वमिति विकल्प्यान्त्ये प्रतिपादकस्य बुभुक्षाकाले प्रयुक्तघटमानयेति वाक्यस्य भोजनादिपरत्वापत्तेरित्यभिप्रेत्याद्यमनूद्य प्रत्याह—मणिकारो ना-पीति । तत्रेच्छाविषयत्वमात्रं विवक्षितमुत समभिव्याहृतपदार्थसाध्यत्व-मपि इच्छाविशेषणमपि(ति) विकल्प्याद्यं प्रत्याह—मणिकारो यस्येति ।

* * * *

Colophon:

इति श्रीयल्लयार्यविरचिते न्यायपारिजाते तात्पर्यवादस्समाप्तः ॥

दशदाडिमादिवाक्यवदसाङ्गत्यपरिहारायाह—प्रसङ्गादिति । तत्प्रतीति-

प्रयोजकत्वरूपतात्पर्यज्ञानकाले प्रतीतिप्रयोजकत्वं . . . मावृत्त्या वा तया विनापीत्येवं तस्योपस्थितत्वादिति भावः ।

End:

इष्टापत्तिशङ्कां निराकरोति मणिकारः सिद्धौ तदन्यस्य वाक्येन प्रवृत्तिप्रसङ्गमिति । जीवनस्य सिद्धत्वेन द्वारत्वात्.

No. **4203.** न्यायप्रकाशिका.

NYĀYAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 162. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in Anumāna.

A commentary on the Tarkabhāṣāprakāśikā of Cennubhaṭṭa: by Naraharimiśra.

Beginning:

प्रतिनृपतिशिरोभिस्सार्धमर्धेन्दुमौलेर्नमयति पणचापं राघवे लाघवेन ।
विदितम(द)नतन्त्रो मूलमन्त्रो रतानां जयति जनकजाया लालसो दृग्विलासः ॥

तत्रेति । नान्वयव्यतिरेकसहचारज्ञानसहकृताध्यक्षगम्येत्यर्थो कारणताशरीरप्रविष्टान्वयव्याप्तिरेव ; न तत्र व्यतिरेकसहचारज्ञानं कारणम् ; मानाभावात् । न च व्यतिरेकेण सहचारेणान्वयव्याप्तिगृह्यत इति नास्याभिधानमिति वाच्यम् ; तथाप्यन्यतरोपादानव्यर्थतापत्तेः ।

End:

न च तत्स्वरसाद्व्यापकत्वमर्थोऽस्त्विति वाच्यम् ; तथा सति तावन्मात्रस्यैव गमकतासामर्थ्ये शेषवैयर्थ्यापत्तेः । प्रथमानुमाने साधनवैकल्यं दृष्टान्ते पक्षे हेत्वसिद्धिश्च स्यात् । महत्त्वस्य द्रव्यत्वाव्यापकत्वात् । एवमदृष्ट.

No. 4204. न्यायरत्नटीका—द्युतिमालिका.

NYĀYARATNAṬĪKĀ : DYUTIMĀLIKĀ.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 166. Lines, 5 on a page. Character. Nandināgarī. Condition, injured. Appearance, old.

A commentary on Maṇikaṇṭha's Nyāyaratna : by Nṛsiṁha-yajvan, son of Maṅkālānnaṁ Sōmayājin.

Complete.

Beginning :

श्रीपतिर्निजभक्तानां रक्षणे दत्तमानसः ।
. . . व्यापकं नित्यं विश्वमातरमम्बिकाम् ॥
. . . . ।
न्यायरत्नस्य टीकेयं विशदद्युतिमालिका ॥

* * * *

न तथा चायं तस्मान्न तथेति—इत्यनुमानं न्यायस्स एव रत्न-मिति ग्रन्थनाम कथितम् । द्वितीयपक्षे क्षित्यादिकं सकर्तृकं कार्यत्वाद्यदेवं तदेवं यथा घटः तथा चेदं तस्मात्तथेति—इत्यनुमानं न्यायः ।

* * * *

वस्तुतस्तु संशयप्रयोजनादयस्तु अवयवसामान्यलक्षणाक्रान्तत्वाभावा-देव नावयवाः ; किन्तु न्यायाङ्गत्वेनोपयुज्यन्त इति नाधिक्यमिति भावः । उपसंहरति — अत इति । यतः अज्ञातानां तेषामुपयोगः अत इत्यर्थः ॥

Colophon :

इति श्रीमदहोबिलनृसिंहस्वामिकरुणाकटाक्षवीक्षितसकलशास्त्रार्थनि-र्णयसमर्थश्रीमन्मङ्कालान्नंसोमयाजिसूनुना नृसिंहयज्वना विरचितायां न्याय-रत्नटीकायां द्युतिमालिकायामवयवनिरूपणम् ॥

End:

अस्यापि प्रतिपक्षानुमानमाह पूर्ववादी अयमिति । वह्निमत्त्वाश्रय इत्युक्ते सिद्धसाधनता; तदर्थमेतत्पर्वतातिरिक्तेति । एतत्पर्वतातिरिक्तत्वे सति वह्निमत्त्वाश्रय इति पूर्वपक्षानुमानं भवत्येवेति भावः । एवमुत्तरत्रापि द्रष्टव्यम् । स्वनामधेयपुरस्सरं स्वकृतग्रन्थस्योपयोगमाह—इति श्रीमणिकण्ठेनेति । ग्रन्थकर्तृनामधेयं दर्शितम् । न्यायशास्त्रकर्तारमक्षपादमुनिं नत्वा मह्रीकरोति यद्विवेचनेति ॥

Colophon:

विवेश पूर्णतां सम्यक् विशदा द्युतिमालिका ।
तार्क्ष्याचलेशमन्त्रस्य चिन्तनात् प्रत्यहं मुदा ॥

No. 4205. न्यायशास्त्रार्थदीपः.

NYĀYAŚĀSTRĀRTHADĪPAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 110. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nyāyaśāstrārthadīpavyākhyā 71*a*.

A work on Nyāya logic by Śaśadhara. The work is often called Śaśadharīya after the name of the author.

Complete.

Beginning:

ध्वंसितपरसिद्धान्तध्वान्तं गौतममतैकसिद्धान्तम् ।
नत्वा नित्यमधीशं शशधरव(श)र्मा प्रकाशयति ॥

न्यायशास्त्रार्थदीपोऽयं कथासु विजिगीषुभिः ।
दा(धा)रणीयः प्रयत्नेन (सत्तर्क)स्नेहपूरितः ॥

इह तावदभीष्टकर्मणो निर्विघ्नपरिसमाप्तिमुद्दिश्य बहुशः प्रवर्तमाना विनाकायाच्च(यकार्च)नतिथि(दधि)दूर्वादौ मङ्गले दृश्यन्ते प्रेक्षावन्तः । तत्र (मङ्गलस्य)वा तद्विशेषस्य नमस्कारस्य वा दुरिताद्युत्सारणद्वारा अभीष्टसमाप्तिं प्रति कथमुपायत्वं ग्राह्यम् श्रुतेरिति चेन्न ; तथाविधश्रुतेरनाकलनात् । शिष्टाचारात्तदनुमानामिति चेन्न ; शिष्टाचारस्य(।)निर्वचनात् । तथा हि—

किमिदं शिष्टाचारत्वम्? वेदप्रामाण्याभ्युपगन्त्रि(न्तृ)पुरुषोत्पाद्यमानत्वं वा, उद्देश्यविशेषितमेतदेव वा, एवम्भूतपुरुषेण वेदमूलकतया स्वीक्रियमाणत्वं वा, वेदमूलकतया प्रतीयमानत्वं वा, वेदोपदिष्टहेतुफलभावक्रियात्वमेव वा, अन्यद्वा? नाद्यः—तथाविधपुरुषक्रियमाणस्य जलताडनस्य शिष्टाचारत्वप्रसङ्गात् । तथा च तेनापि वेदानुमानं स्यात् ।

End:

संसर्गाभावे तु यत्र प्रतियोगिविरहप्रयुक्तः प्रतियोग्यनुपलम्भः, तत्र योग्यप्रतियोगिकोऽपि गृह्यते । अत एव वायौ रूपाभावग्रहे शब्दाभावश्च प्रत्यक्षः । मनसि तु न रूपविरहयुक्तो रूपानुलम्भ इति नासौ तत्र योग्यमन एव सर्वत्र तन्त्रमित्याहुरिति सर्वं सुन्दरमिति संक्षेपः ॥

No. 4206. न्यायशास्त्रार्थदीपः.

NYĀYAŚĀSTRĀRTHADĪPAḤ.

Substance, palm-leaf (Śrītāla). Size, 17¾ × 2¼ inches. Pages, 92. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

To the end of Vyāptivāda.

Same work as the above.

No. 4207. न्यायशास्त्रार्थदीपः.

NYĀYAŚĀSTRĀRTHADĪPAḤ.

Pages, 32. Lines, 5 on a page.

Begins on fol. 13a of the MS. described under No. 4117.
Breaks off in Śaktivāda.
It is also called Nyāyasiddhāntadīpa.
Same work as the above.

No. 4208. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ.

Substance, palm-leaf (Śrītāla). Size, 17⅜ × 2¼ inches. Pages, 74. Lines, 10 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

This is a commentary on the Nyāyaśāstrārthadīpa of Śaśadhara by Bhiṣagrāṭ. It is also called Prabhā.

Contains Maṅgalavāda, Andhakāravāda, Kāraṇatāvāda, Sahajaśaktivāda, Manōṇutvavāda and Mōkṣavāda.

Incomplete.

Beginning :

कल्याणाचलकोदण्डं कमलाकान्तसायकम् ।
कल्लोलमालितूणीरं कलये पुरशासनम् ॥

सङ्केतं प्राप्य राधारहितमथ हरिश्शङ्कयागत्य दृष्ट्वा
तच्च(च्छ्व)श्रूं द्वारि वृद्धां निकटगृहवधूवेषधारी सशङ्काम् ।
तां तत्सीत्कारभाषागतिहसितमुखैर्वञ्चयन्नेत्य गेहं
राधामालिङ्ग्य गाढं रतिमुदितमनाश्श्रेयसे भूयसेऽस्तु ॥

अवलम्बे कृपालम्बामम्बां शैलोन्नतस्तनीम् ।
लम्बोदरं च सस्कन्दं कम्बुकुन्देन्दुसन्निभम् ॥

स्वपक्षरक्षापरिपन्थिकक्ष्याशिक्षाप्रगल्भोक्तिभरो भिषग्राट् ।
व्याख्यां विशेषेक्षितपक्षिलाक्षपादप्रबन्धः कुरुते प्रभाख्याम् ॥

प्रारी(रि)प्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं शिष्टाचारविशिष्टेष्टदेवतानमस्कारं कृतं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—ध्वंसितेति । अत्र नित्यमधीशं नत्वेति नमस्कारनिबन्धः ।

* * * *

ग्रन्थगौरवभिया दिङ्मात्रमत्र प्रदर्श्यते । परिहारस्तूक्त एव । कामनायां प्रारिप्सितत्वप्रवेशस्तु विषयमाहात्म्यान्नातिरिच्यक(त) एवेति ।

अन्धकारवादप्रारम्भः—

एवं तावत् स्वकृ(की)र्त्यमङ्गलस्य साफल्यं प्रसाध्य प्रतिज्ञातं गौतमसिद्धान्तं प्रदर्शयन् प्रथममन्धकारस्याभावत्वं प्रसाद(ध)यितुं विवादाङ्गसंशयविप्रतिपत्तिं दर्शयति – अन्धकार इति ॥

* * * *

बादरायणवंश्येन भिषग्राजविपश्चिता ।
हेतुश्शशधरग्रन्थे व्याकृतोऽयं यथामति ॥

End :

मोक्षवादः—

अपवर्गस्वरूपं निरूपयिष्यन् तस्य शास्त्रेऽवश्यनिरूप्यत्वमाह—अपवर्ग इति । आन्वीक्षिकीप्रयोजनत्वेनेति । आन्वीक्षिकी तर्कशास्त्रम् । न चात्र प्रमाणाभावः; आत्मा वारे द्रष्टव्य इति श्रुत्या आत्ममननस्यापवर्गहेतुत्वं प्रतिपाद्यते; मननञ्च युक्तिभिरनुचिन्तनम्; तथा च मननरूपभेदानुमितौ आत्मनः प्रतियोग्युपस्थापकत्वेनान्यथा वा शास्त्रस्योपयोगात् श्रुतिसिद्धमेव तदपवर्गकारणत्वमिति महर्षिणा प्रतिपादितम् । आद्यसूत्रेणेति शेषः । तथा च सोऽवश्यं निरूप्यत इति भावः ।

* * * *

तस्य स्वतस्सिद्धत्वात् शास्त्रवैयर्थ्यमित्यत उक्तमभिव्यक्तीति । जीवस्येति । अस्यार्थ(:).

No. 4209. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ.

Pages, 28. Lines, 8 on a page.

Begins on fol. 71*a* of the MS. described under No. 4205.

Breaks off in Tamōvāda.

Same work as the above.

No. 4210. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ.

Substance, palm-leaf. Size, 17⅜ × 1⅛ inches. Pages, 58. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

No. 4211. न्यायशास्त्रार्थदीपव्याख्या.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅞ × 1⅜ inches. Pages, 14. Lines, 7 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

Begins on fol. 6*a*. The other work herein is Raghuvaṁśa 8th Sarga 1*a*.

Incomplete.

Same work as the above.

No. 4212. न्यायसङ्ग्रहः.

NYĀYASAṄGRAHAḤ.

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 5. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 44*a*. The other works herein are Kuravañjiprabandha 1*a*, Pañcasaṁskāravidhāna 18*a*. Ambujavallīpariṇaya

(**nāṭaka**) 19*a*. Ambujavallīdaṇḍaka 42*a*, Nyāyasaṅgrahadīpikā 47*a*, Varāhastōtra 89*a*, Varāhavijayakāvya 90*a*.

Complete.

By Śrīnivāsa of Śrīmuṣṇa.

This is a short treatise on Nyāya logic intended for the use of higinners.

Beginning :

नमस्कृत्य जगन्नाथं न्यायसङ्ग्रह उच्यते ।
पदार्थो द्विविधः प्रोक्तो भावाभावप्रभेदतः ॥
तत्र भावो द्रव्यगुणकर्मसामान्यरूपतः ।
विशेषस्समवायश्चेत्यपि षड्विध ईरितः ॥

End :

एतेषां तत्त्वविज्ञानं साक्षान्मोक्षस्य कारणम् ।
मोक्षत्वं तत्त्वधीजात्मसर्वदुःखविनाशता ॥

Colophon :

इति श्रीमुष्णनगरश्रीनिवासविपश्चिता ।
बालानामुपकाराय कृतोऽयं न्यायसङ्ग्रहः ॥

No. **4213.** न्यायसङ्ग्रहदीपिका.

NYĀYASAṄGRAHADĪPIKĀ.

Pages, 83. Lines, 9 on a page.

Begins on fol. 47*a* of the **MS.** described under No. 4212.

Complete.

A commentary on the Nyāyasaṅgraha of Śrīnivāsa: by Śrīnivāsabudha, son of Śrīmadvīravallīvaradanārāyaṇaguru of Kauṇḍinyagōtra.

Beginning :

विविधसकललोकव्रातजन्मादिहेतुं
निरवधिभवरूपापायवाराशिसेतुम् ।

निखिलनिगममूलं निर्मलानन्दबोधं
श्रितदुरितविदारं श्रीवराहं नमामि ॥

इह खलु श्रीमुष्णनगरनिवासः श्रीनिवासाख्यो विपश्चित् निजबालकानुग्र(ह)धिया कारिकाशतेन न्यायसङ्ग्रहं कर्तुकामो निर्विघ्नमेव स्वाभीष्टपरिपूरणाय कृतं मङ्गलमुपदिशन्नेव प्रारिप्सितं प्रतिज्ञाय सामान्यतः पदार्थमुद्दिश्य विभजते—

नमस्कृत्य . . . . . . प्रभेदतः ॥ इति ।

अत्र मङ्गलं नाम नमस्काराद्यन्यतमम् । तच्च अलौकिकाविगीतशिष्टाचारानुमितश्रुतिबोधितारब्धसमाप्तिरूपेष्टसाधनताकमित्यादौ कृतम् ।

End:

इदानीं स्वग्रन्थपरिपूर्तिं द्योतयन् स्वनामप्रकटनपुरस्सरमेतत्प्रकरणस्य सफलतामाह--

इति श्रीमुष्णनगर . . . . . , न्यायसङ्ग्रहः ॥

अर्थस्तु स्पष्ट एव ॥

Colophon:

इति श्रीमुष्णनगरनिवासिकौण्डिन्यकुलतिलकायमानश्रीमद्वीरवल्लीवरदनारायणगुरुवरतनयश्रीनिवासविबुधविरचितेयं न्यायसङ्ग्रहदीपिका सम्पूर्णा ॥

No. 4214. न्यायसिद्धान्तदीपप्रकाशः--न्यायरत्नम्.

NYĀYASIDDHĀNTADĪPAPRAKĀŚAḤ : NYĀYARATNAM.

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 148. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not recent.

Begins on fol. 1*a*. The other work herein is Yōgarūḍhi 75*a* To the end of Nirvikalpakavada.

A commentary on Śaśadhara's Nyāyaśāstrārthadīpa: by Dharmarājādhvarīndra of Kauṇḍinya-gōtra.

Beginning:

वटविटपिसमीपे बोधमुद्रां दधानो जयति जगति भूमा कोऽपि सोमावतंसः ।
विगतकलुषजाले भक्तचित्तालवाले सुदृढमिव निधित्सुश्चिन्मयान्यङ्कुराणि ॥

अध्यासीनोऽग्रहारं मखिकुलमहितं कण्डूमाणिक्कसंज्ञं
व्याकुर्वन् यः प्रकाशं समतनुत मणेः पङ्क्तिटीकाविभागम् ।
सोऽयं कौण्डिन्यगोत्रः शशधरकलितन्यायसिद्धान्तदीपं
गम्भीरं युक्तिजालैर्विशदयति तथा धर्मराजो बुधेन्द्रः ॥

भवन्ति दूषणानीह पूर्वटीकासु यद्यपि ।
तथापि न विलिख्यन्ते ग्रन्थगौरवभीतितः ॥

निर्विघ्नपरिसमाप्त्यर्थं मङ्गलमाचरन् चिकीर्षितं प्रतिजानीते—ध्वंसितेति । परेषां मीमांसकानां सिद्धान्तरूपान्धकारो ध्वंसितो येनेति क्रियाविशेषणम् । गौतमेनाङ्गीकृतो यो मुख्यसिद्धान्तः तम् । स्वकीर्त्यनुवृत्त्यर्थं स्वनाम दर्शयति—शशधरेति । प्रकाशयति सम्यक् प्रतिपादयतीत्यर्थः ।

End:

न च वह्निमानित्यादिव्यक्तिसाध्यकानुमितौ पक्षीयसाध्यस्य प्रागनवगमेन तद्विशिष्टानुमितौ व्यभिचारः; सामान्यप्रत्यासत्त्या सर्वोपसंहारेण व्याप्तिग्रहवेळायां पक्षीयसाध्यव्यक्तेरप्यनवगतत्वेन दोषाभावात् । तदेतदाह—इति संक्षेप इति.

Colophon:

इति धर्मराजविरचिते न्यायरत्ने निर्विकल्पकवादः ॥

No. 4215. न्यायसिद्धान्तमञ्जरी.

NYĀYASIDDHĀNTAMAÑJARĪ.

Substance, paper. Size, 10¼ × 4⅜ inches. Pages, 85. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śrīkaṇṭhīya 44*b*.

Complete.

A work on Nyāya logic by Jānakīnātha otherwise called Cūḍāmaṇibhaṭṭācārya.

Beginning:

प्रणम्य परमात्मानं जानकीनाथशर्मणा ।
क्रियते युक्तिमुक्ताभिः न्यायसिद्धान्तमञ्जरी ॥

इह खलु निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति । तच्च प्रमाणाधीनमिति प्रमाणं निरूप्यते । तत्र प्रमायाः करणं प्रमाणम्; प्रमा च यथार्थानुभवः । तदाहुराचार्याः—यथार्थानुभवो मानमिति । ननु किमिदं याथार्थ्यम्? किमिदमनुभवत्वम्? उच्यते—तद्वति तदवगाहित्वं याथार्थ्यम् । भवति हि रजते इदं रजतमिति ज्ञानं तद्वति तदवगाहीति यथार्थम् ।

End:

अथ रजतत्वेन्द्रियसन्निकर्षविरहात(त् क)थं तत्प्रकारकमिति चेन्न—सन्निहितं रजतं यत्र तत्र तत्संयुक्तसमवायस्य अन्यत्र ज्ञानसन्निकर्षस्य सत्त्वात् । ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेद्रजतत्वप्रकारकमेवेत्यवेहि । तत्रैव किं मानमिति चेत्तत्प्रकारकप्रवृत्तिरिति संक्षेपः ॥

Colophon:

इति श्रीचूडामणिभट्टाचार्यरचिता न्यायसिद्धान्तमञ्जरी समाप्ता ॥

No. 4216. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 53. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Pratyakṣakhaṇḍa complete. Anumānakhaṇḍa incomplete.

Same work as the above

No. 4217. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ.

Substance, paper. Size, 10¼ × 4¾ inches Pages, 31. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nyāyasiddhāntamañjarīvyākhyā (Tarkaprakāśikā) 17*b*.

Complete.

Same work as the above.

No. 4218. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHANTAMAÑJARĪ.

Substance, palm-leaf. Size. 13⅜ × 1⅝ inches. Pages, 41. Lines, 6 on a page. Character, Telugu. Condition. injured. Appearance, old.

Incomplete.

Same work as the above.

No. 4219. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHANTAMAÑJARĪ.

Substance, palm-leaf. Size, 17⅝ × 1¼ inches Pages, 36. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 124*a*. The other work herein is Śrīkaṇṭhīya 1*a*.

From Śabdakhaṇḍa to the end.

Complete.

Same work as the above.

No. 4220. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ.

Substance, palm-leaf. Size, $20\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 36. Lines, 8 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Nyāyasiddhāntamañjarīdīpikā (Tarkaprakāśikā) 19*a*.

Complete.

Same work as the above.

No. 4221. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ.

Pages, 68. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4105.

Breaks off in the Śabdakhaṇḍa.

Same work as the above.

No. 4222. न्यायसिद्धान्तमञ्जरी.
NYĀYASIDDHĀNTAMAÑJARĪ.

Pages, 17. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 1388.

Anumānakhaṇḍa incomplete.

Same work as the above.

No. 4223. न्यायसिद्धान्तमञ्जरीदीपिका--तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Pages, 256. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 4220.

A commentary on the Nyāyasiddhāntamañjarī of Jānakīnātha : by Śrīkaṇṭha.

Complete

Beginning:

सन्ध्यायाः प्रणतिक्षणे गिरिजया सेर्ष्यं समालोकिते
रोषं मानिनि मा कृथास्त्वदपरा नान्यास्ति वन्द्या मम ।
किन्तु त्वामहमानमामि मनसि ध्यात्वा तवैवाकृती-
रित्थं हर्षितशैलराजतनयादृष्टः शिवः पातु नः ॥
सिद्धान्तगूढवर्त्मैकभावनापरिशीलिता ।
श्रीकण्ठनिर्मिता सेयं कृतिरातनुतां मुदम् ॥

सत्येकस्मिन्नपि बाधके साधकसहस्रस्याकिञ्चित्करत्वात् प्रतिबन्धका-भावस्यावश्यापेक्षिततया प्रकृतग्रन्थपरिसमाप्तिप्रतिबन्धकदुरितरूपविघ्नवि-घाताय कृतं भगवन्नत्यात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति— प्रणम्येति । मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसद्वारा हेतुत्वमिति सिद्धा-न्तस्थितिः ।

For the end, see under the next number.

No. 4224. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ: TARKAPRAKĀŚIKĀ.

Pages, 274. Lines, 13 on a page.

Begins on fol. 17*b* of the MS. described under No. 4217.

Complete.

Same work as the above.

For the beginning, see under the previous number.

End:

रजतत्वेति । शुक्तौ रजतत्वप्रकारकं प्रत्यक्षमित्यर्थः । तत्रैव शुक्तौ रजतत्वप्रकारकप्रत्यक्ष एव । तत्प्रकारकेति । शुक्तौ रजतत्वप्रकारिका प्रवृत्तिरित्यर्थः । प्रवृत्तौ तु इष्टतावच्छेदकप्रकारकज्ञानत्वेन हेतुताया व्यवस्थापितत्वादिति भावः । इदं रजततया जानामीत्यनुव्यवसायोऽपि शुक्तिगोचररजतत्वप्रकारकप्रत्यक्षसाधकोऽवसेय इति ॥

अतिकर्कशतर्के यद्धृदयं स्फुरितं मम ।
सिद्धेश्वरिपदद्वन्द्ववरस्यैतद्विजृम्भणम् ॥
योऽसौ काश्यां समुत्पादि विश्वनाथेन धीमता ।
तस्य श्रीकण्ठकृतिनः कृतिः कलयतां मुदम् ॥

Colophon:

इति श्रीकाशीगर्भसम्भवदीक्षितविश्वनाथात्मजदीक्षितश्रीकण्ठशर्मविरचिता तर्कप्रकाशाभिधा न्यायसिद्धान्तमञ्जरीदीपिका समाप्ता ॥

No. **4225.** **न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.**

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 142. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Śabdakhaṇḍa to the end of Śaktivāda.

Same work as the above.

No. **4226.** **न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.**

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17⅝ × 1⅝ inches. Pages, 116. Lines, 10 on a page. Character, Telugu. Condition, injured. Appearance, very old.

Begins with Upamānakhaṇḍa and breaks off in Śabdakhaṇḍa.

Same work as the above.

No. 4227. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Pages, 58. Lines, 10 on a page.

Begins on fol. 77*a* of the MS. described under No. 1388.

Śabdakhaṇḍa incomplete.

Same work as the above.

No. 4228. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, paper. Size, $9\frac{3}{4} \times 4\frac{1}{4}$ inches. Pages, 228. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Śabdakhaṇḍa incomplete.

Same work as the above.

No. 4229. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $17 \times 1\frac{5}{8}$ inches. Pages, 126. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning in the Śabdakhaṇḍa.

Same work as the above.

No. 4230. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 154. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Wants beginning in Anumāna.

Same work as the above.

No. **4231**. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 20½ × 1⅝ inches. Pages, 176. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not old.

From Pratyakṣa to Upamāna complete; breaks off in Śabdaparicchēda.

Same work as the above.

No. **4232**. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16⅛ × 1¼ inches. Pages, 52. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Bhāṭṭadīpikā 27*a*, Bhāṭṭarahasya 31*a*.

Pratyakṣa complete, Anumāna incomplete.

Same work as the above.

No. **4233**. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Pages, 246. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4219.

Śabdakhaṇḍa almost complete.

Same work as the above.

No. 4234. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Substance, paper. Size, 13 × 5 inches. **Pages, 197. Lines, 15** on a page. Character, Telugu. Condition, good. **Appearance,** new.

Śabdakhaṇḍa complete.

Same work as the above.

No. 4235. न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशिका.
NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ : TARKAPRAKĀŚIKĀ.

Pages, 206. Lines, 13 on a page.

Begins on fol. 44*b* of the MS. described under No. 4215.

To the end of Anumāna.

Same work as the above

B.—TRACTS ON NYĀYA.

No. 4236. अवच्छेदकतानिरुक्तिपत्रम्.
AVACCHĒDAKATĀNIRUKTIPATRAM.

Substance, palm-leaf. Size, 18½ × 1½ inches. **Pages,** 14. **Lines, 11** on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 13*a*. The other works herein are Vyāptikrōḍa 1*a*, Pakṣatākrōḍa 20*a*, Siddhāntalakṣaṇakrōḍa 30*a*.

A criticism on the Avacchēdakatānirukti of Jagadīśa.

Author unknown.

Incomplete.

Beginning:

नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः ; संभवति लघौ धर्मे गुरौ तदभावादिति शिरोमणिः । साधनस[1]मानाधिकरण्या(णा)भावीय-

प्रतियोगित्वीयस्वरूपसम्बन्धरूपावच्छेदकत्वमेतल्लक्षणघटकत्वाभाववत् व्यभिचारिवृत्तित्वात् । व्यभिचारिवृत्तित्वं तु सम्पादकतासम्बन्धेन हेतुरिति ।

End:

तन्न सङ्गच्छते; वह्निमान् धूमादित्यादिप्रसिद्धस्थले विशेषणतासंयोगादिघटितसामानाधिकरण्यसम्बन्धेन तत्तद्रूपान्यत्वविशिष्टाभावमादायाव्याप्तिसंभवादिति चेन्न.

No. **4237.** क्रोडपत्रम्.

KRŌḌAPATRAM.

Substance, palm-leaf. Size, $15\frac{1}{4} \times 1\frac{3}{4}$ inches. Pages, 36. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 16*a*. The other work herein is Śabdakhaṇḍasāramañjarī 1*a*.

A criticism on the Sāmānyanirukti of Gadādhara.

Two separate leaves in the end contain certain portions omitted in the body of the manuscript.

Complete.

Beginning:

यद्रूपावच्छिन्नविषयकत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति, तद्रूपावच्छिन्नत्वमित्यत्र यद्रूपपदं दोषतावच्छेदकपरम्; तच्च यदि वह्न्यभाववद्ध्रदत्वोभयं, तदैकत्र द्वयमिति रीत्या जायमाने वह्न्यभाववान् ह्रदश्चेति ज्ञानेऽपि वह्न्यभावह्रदत्वोभयावच्छिन्नविषयतासत्त्वात् तादृशज्ञानस्य च ह्रदपक्षकवह्न्यनुमित्यप्रतिबन्धकत्वादसम्भवः ।

End:

यदि च तादृशधर्मितावच्छेदकतापन्नं यद्वह्न्यभाववद्ध्रदत्वं, तदै(दे)व यद्रूपपदेनोच्यते तदा न कोऽपि दोषः ॥

Colophon:

क्रोडपत्रं समाप्तम् ॥

No. 4238. गदाधरीयक्रोडपत्रम्.

GADĀDHARĪYAKRŌḌAPATRAM.

Pages, 199. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4073.

A critical tract on Gadādhara's Sāmānyanirukti, Pakṣatā, Satpratipakṣa and Bādha.

Author not known.

Complete.

Beginning:

गादाधर्यां सामान्यनिरुक्तौ मूलोक्तलक्षणानां दुष्टलक्षणत्वे दोषेष्वतिव्याप्तिः । अथ च प्रथमलक्षणे समूहालम्बनानुमितिविषयोदासीनघटवारणाय यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वनिवेशावश्यकतया बाधादिप्रतिबन्धकतायां प्रायशो हेतुविषयताया अनवच्छेदकत्वेन बाधितहेतावव्याप्तिरपि ।

End:

तेन वह्न्यभाववद्ध्रदात्मकबाधादौ विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकीभूतवह्न्यभावत्वावच्छिन्नविषयत्वावच्छिन्नत्वस्य प्रतिबन्धकतायां सत्त्वेऽपि नासम्भवः ॥

Colophon:

इति बाधक्रोडनिष्कर्षः ॥

No. 4239. गदाधरीयक्रोडपत्रम्.

GADĀDHARĪYAKRŌḌAPATRAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 69. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Deals with Satpratipakṣa, Pakṣatā, and Caturdaśalakṣaṇī.

Same work as the above.

No 4240. चतुर्दशलक्षणीक्रोडम्.

CATURDAŚALAKṢAṆĪKRODAM.

Pages, 101. Lines, 11 on a page.

Begins on fol. 76*a* of the MS. described under No. 4062.

Incomplete.

A critical supplement to the Caturdaśalakṣaṇī of Gadādhara.

Beginning:

यत्समानाधिकरणा इत्यादि । तत्र प्रतियोगितायां व्यधिकरणधर्माव-च्छिन्नत्वनिवेशेनैवोपपत्तौ यत्समानाधिकरणा इति स्वविशिष्टेति च व्यर्था तथाहि—

यत्समानाधिकरणसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियो-गिताका व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका यावन्तोऽभावा यदधि-करणावच्छेदेन प्रतियोगिसमानाधिकरणाः तत्त्वं व्याप्तिः . . . . .

समनियताभावैक्यपक्षे—

अत्र लक्षणे बहुतरदोषप्रसक्तचैव नन्वित्यादिना भट्टाचायण द्वि-तीयलक्षणस्यावतारयिष्यमाणतया प्रथमलक्षणस्य समनियताभावभेदाभि-प्रायकत्वावगतेः, भवानन्देन द्वितीयलक्षणावतरणग्रन्थे प्रथमलक्षणस्य समनियताभावभेदाभिप्रायकतायाः कण्ठत एव कथितत्वाच्च । अथैतल्ल-क्षणस्य समनियताभावभेदाभिप्रायकत्वे जलादिवृत्तित्वविशिष्टगोत्वाद्यभाव-स्याभाववत्तु जलत्वाद्यभाव इत्यादिदीधितिग्रन्थविरोधः ।

End:

हेतुतावच्छेदकसम्बन्धानुयोगिवृत्त्यभावीयत्वस्य लक्षणघटकीभूतप्रति-योगितायामेव निवेशनीयतया तत्र वृत्तितायां यथोक्तसम्बन्धावच्छिन्नत्व-योरप्युक्तरीत्या आवश्यकतया मदीयपूर्वपक्षस्याप्यसङ्गत्यभावादिति ॥

No. 4241. चन्द्रनारायणीयपत्रम्.

CANDRANĀRĀYAṆĪYAPATRAM.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 34. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sāmānyaniruktipatra 18*a*.

A criticism of Niṣkṛṣṭakalpa as in Gadādhara's Sāmānyanirukti. By Candranārāyaṇa.

Complete.

Beginning :

यद्रूपावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये विरोधिविषयताप्रयुक्तं प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्वोभयाभावाधिकरणत्वं तद्रूपावच्छिन्नत्वं भट्टाचार्यैरभिहितम् । तत्र निर्वह्निः पर्वतो वह्निमान् धूमादित्यत्र पाषाणमयत्वविशिष्टपर्वतविषयकनिश्चयोत्तरानुमितिसामान्ये प्रकृतपक्षे प्रकृतसाध्यवैशिष्ट्यावगाहित्वसाध्यव्याप्यहेतुवैशिष्ट्यावगाहित्व उभयाभावसत्त्वात् ।

End :

वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयतायां ह्रदत्वविशिष्टवह्निव्याप्यवैशिष्ट्यावगाहिताया निश्चयवृत्तित्वे वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकनिश्चयोत्तरानुमितिसामान्ये ह्रदत्वविशिष्टे वह्निव्याप्यवैशिष्ट्यावगाहित्वाभा[वगाहित्वाभाव]वसत्त्वात्तत्रातिव्याप्त्यसम्भवात् ।

श्रीमान् दशाङ्गी मघवान् बभूव प्रकृष्टवेदान्तविनोदनज्ञः ।
श्रीरङ्गनाथो विरराज लक्ष्मीनारायणाख्ये नगरे कलाज्ञः ॥
यं विप्रवेदान्तगुरुं सुधीरं पतिं यतीनां कलकण्ठधीरम् ।
पाराशरं वाक्पतिमित्थमित्थं नाथं शठारिं प्रवदन्ति सन्तः ॥
बभूव सामान्यनिरुक्तिपत्रं प्रवादिसंपाटिततर्कपातम् ।
सल्लेखिता(तं) तस्य कुमारभूतश्रीश्रीनिवासाख्यविचक्षणेन ॥

No. 4242. चन्द्रनारायणीयम्.

CANDRANĀRĀYAṆĪYAM.

Pages, 37. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 332.

Deals with Tṛtīyanacānugama and Svarūpasambandharūpāvacchēdakatvavicāra.

Same work as the above.

No. 4243. तर्कपत्रम्.

TARKAPATRAM.

Pages, 132. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. described under No. 4137.

Critical essays on Śaktivāda, Yōgarūdhivāda, Apabhraṁśavāda, Sādhutvavāda, Lakṣaṇāvāda, Prāmāṇyavāda and Mōkṣakāraṇatāvāda.

Wants beginning and end.

Beginning:

स्वातन्त्र्येणैव तद्धेतुत्वम्; निर्व्यापारस्यापि करणत्वमिति अभ्युपगन्तारं प्रति तदापादनात्। वस्तुतो जातिशक्त्यैव तद्बोधसम्भवे जातेः कारणत्वे कल्प(नागौरवात्)। यत एव जातिशक्तादेवान्वयबोधः।

End:

अन्यथा तदानीं दुःखे द्वेषासम्भवात् उदासीने दुःखे तददर्शनात्। न च दुःखं केवलसुखस्य न सम्भवति; अन्तःकरणसमवेतज्ञानाज्जायमाना(नो)न प्रेमास्पदमित्यानन्द आत्मा.

No. 4244. तर्कवादः.
TARKAVÂDAḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 90. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

A discussion regarding the nature of speculation and true knowledge: by Gadādhara.

Complete.

Beginning:

अत्रोच्यते—

व्यभिचारज्ञानविरहसहकृतसहचारज्ञानं व्याप्तिग्राहकम्; ज्ञानं निश्चयः शङ्का च। सा च कचिदुपाधिसन्देहात् कचिद्विशेषादर्शनसहितसाधारणधर्मदर्शनात्; तद्विरहश्च कचित् पक्षबाधकतर्कात्, कचित् स्वतः सिद्ध एव; तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थेति चेन्न।

End:

तथा च व्यापकाभावनिश्चयस्य तदभावव्याप्यवत्ताज्ञानमुद्रयैव तद्वत्ताग्रहे विरोधित्वमिति भावः। अनुमानमात्रोच्छेदकताज्ञानं पक्षेतरत्वपक्षकसाध्यव्यापकत्वापादकतर्करूपम्। परमतेनेति। नैयायिकनये शक्तेरप्रसिद्ध्या तदतिरिक्तत्वघटितसाध्याप्रसिद्धिरिति भावः। तत् अप्रयोजकत्वम्॥

Colophon:

गदाधरीयतर्कवादः समाप्तः॥

No. 4245. त्र्यम्बकशास्त्रिपत्रम्.
TRYAMBAKAŚĀSTRIPATRAM.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 9. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Viśiṣṭāntarāghaṭitatvavicāra 6*a*.

Anumāna incomplete.

A criticism of the Sāmānyanirukti of Gadādhara: by Tryambakaśāstrin.

Beginning:

भवकोदण्डविदितबाहुदण्डैकचण्डिमा ।
भव्याय भूयादव्याजकरुणः कोऽपि भूपतिः ॥
वीरराघवपादाब्जसंसक्तस्वान्तषट्पदः ।
तीर्णस्सारस्वतः पूर्णो हनूमान् स तु भूतये ॥
योऽसौ शङ्करपद्मजाक्षचरणैरुत्पादितो लीलया
न्यायाचार्यनिबन्धकारमणिकृन्मिश्रादिभिर्वर्धितः ।
दीधित्या फलितो गदाधरगुरुव्याकारविस्तारितः
तस्य न्यायसुरद्रुमस्य भवतुच्छाया सतां प्रीतये ॥

टीकायां लिङ्गांशनिवेशस्य निष्प्रयोजनकतयेति । लिङ्गात् ज्ञानमिति व्युत्पत्त्या लिङ्गज्ञानजन्यज्ञानं लभ्यते । तच्चानुमितिरेवेति संशयाहार्यज्ञानयोर्व्युदासः फलमिति तु न युक्तम् ।

For the end, see under the next number.

No. **4246.** त्र्यम्बकशास्त्रिपत्रम्.

TRYAMBAKAŚĀSTRIPATRAM.

Pages, 35. Lines, 12 on a page.

Begins on fol. 86*a* of the MS. described under No. 4081.

Incomplete.

Same work as the above.

For the beginning, see under the previous number.

End:

अत्र वदन्ति—

यद्रूपावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितयद्रूपावच्छिन्नावच्छेदकताक-निरूपकतात्वं तद्रूपावच्छिन्नप्रकारतानिरूपिताविशेष्यतानिरूपिततद्रूपावच्छि-

त्रावच्छेदकताकनिरूपकत्वाभावस्यापि उक्तवाक्येन विवक्षणीयम्(तया) अवच्छेदकत्वात्.

No. 4247. दीधितिटिप्पणी.

DĪDHITIṬIPPAṆĪ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 9. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 10*a*. The other works herein are :—Vyutpattivādavyākhyā 1*a* , Śitikaṇṭhīyaṭippaṇī 27*a*, Mīmāṁsāviṣaya 40*a*, Aṁśatrayīvicāra 63*a*.

Wants beginning and end in the Pañcalakṣaṇī.

Brief notes on the Dīdhiti of Raghunātha-Śirōmaṇi.

Incomplete.

Beginning:

दीधितौ समारब्धेति । परम्परया प्रकृतोपपादकत्वरूपोपोद्घातसङ्गति-घटकप्रकृतत्वलाभायेदम् । प्रकृतत्वं च पूर्वप्रक्रान्तत्वम् । प्रश्नस्थमिति । नञा नामार्थस्यान्योन्याभावबोधने प्रथमान्तानुयोगिवाचकपदसमभि-व्याहारस्य, नामार्थस्यात्यन्ताभावबोधने सप्तम्यन्तानुयोगिवाचकपदसमभि-व्याहारस्य नियामकत्वात् अनुयोगिवाचक . . . . भावे तात्पर्यनिश्च-यासम्भवेनाव्यभिचरितत्वमित्यतः शाब्दबोधानुपपत्तिरिति भावः ।

End:

एवञ्च घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्वादित्यादौ साध्याभावस्यान्यतररूपत्वेऽपि घटाकाशसंयोगस्य साध्यवत्त्वान्न क्षतिः.

No. 4248. दोषलक्षणविचारः.

DŌṢALAKṢAṆAVICĀRAḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 124. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

A discussion regarding the characteristic faults of an untrue proposition.

Incomplete.

Beginning:

प्रणम्य पुण्डरीकाक्षं जानकीप्राणवल्लभम् ।
दोषलक्षणमादाय विदुषां कलयेऽद्भुतम् ॥

अथ हेत्वाभाससामान्यलक्षणे ह्रदपक्षकवह्निसाध्यकस्थले वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणाय विशिष्टद्वयाघटितत्वनिवेशे सत्प्रतिपक्षेऽव्याप्तिं परिचिन्त्य विशिष्टद्वयविषयतायां सत्प्रतिपक्षघटकदलद्वयविषयताभिन्नत्वं [विशिष्टद्वयविषयतायां] निवेश्य तद्वारणं भट्टाचार्यैः कृतम् । तन्न सङ्गच्छते; स्वरूपासिद्धिव्याप्याद्यावव्याप्तेर्दुर्वारत्वात् ।

End:

वह्न्यभावत्वावच्छिन्नविषयताविशिष्टाभावत्वावच्छिन्नविषयतायास्तादृशविशिष्टदोषविषयकत्वव्यापकतया अव्यापकीभूतविषयतान्तरजन्यत्वस्याभावत्वेन ह्रदत्वावगाहि अभाववान् [अभाववान्] वह्न्यभाववान् इत्याकारकज्ञानेऽपि सत्त्वात् तत्र प्रकृतानुमितिप्रतिबन्धकताया असत्त्वात्.

No. 4249. द्रव्यनाशरहस्यम्.
DRAVYANĀŚARAHASYAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 29*a* of the MS. described under No. 3922.

Complete.

Wants beginning.

An examination of the various causes which bring about the destruction of substances.

Author unknown.

Beginning:

समवेतनाशत्वस्य जन्यतावच्छेदकत्वेन कपालनिष्ठतद्व्यक्तित्वं तत्कपालस्वरूपं तदीयरसादिरूपं वेति विनिगमनाविरहेण रूपरसादिभेदेन कारणताबाहुल्येन तद्रूपनाशत्वादिना तन्नाशनिष्ठतद्व्यक्तित्वादीनामेव कार्यतावच्छेदक(त्व)मिति वाच्यम् ।

End:

तादृशजातेर्नानात्वे संयोगनाशहेतुतायां व्यभिचारप्रसङ्गात् कार्यतावच्छेदकजातेश्च नानात्वव्यभिचा(रा)भावादिति कृतं पल्लवितेनेति दिक् ॥

Colophon:

इति द्रव्यनाशरहस्यम् ॥

No. **4250.** धर्मितावच्छेदकवादः.

DHARMITĀVACCHĒDAKAVĀDAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 34. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 64*a*. The other work herein is Vyutpattivāda 1*a*.

A discussion bearing on an aspect of logical inference.

Complete.

By Harirāma.

Beginning:

अनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः सामानाधिकरण्यम् । तेन एकपुरुषीयपरामर्शदशायां तज्जन्यपुरुषान्तरस्य नानुमितिः; तस्य समवायरूपकारणतावच्छेदकसंबन्धेन परामर्शानधिकरणत्वात् । अत्र नवीनाः—

समानधर्मितावच्छेदकत्वमनुमितिपरामर्शयोः कार्यकारणभावघटकप्रत्यासत्तिः; सामानाधिकरण्यप्रत्यासत्तिकत्वे एकधर्मावच्छिन्नविशेष्यकपरामर्शदशायामन्यधर्मावच्छिन्नविशेष्यकानुमित्यापत्तिवारणाय धर्मितावच्छेदकानां विशिष्य निवेशनीयतया धर्मितावच्छेदकभेदेन कार्यकारणभावबाहुल्यप्रसङ्गात् ।

End:

समवायप्रत्यासत्तिकल्पे विषयभेदेन लिङ्गभेदेन च भिन्नासु परामर्शहेतुतासु पूर्वोपदर्शितविनिगमनाविरहेण अनन्तकारणताधिक्यात्तदपेक्षया आत्मव्यक्तिभेदेनैव उपदर्शितकारणताकल्पनस्यैवोचितत्वादित्याहुः ॥

Colophon:

इति श्रीहरिरामविरचिते धर्मितावच्छेदकवादस्समाप्तः ॥
श्रीमोक्षकुण्डान्वयसुधाम्बुधिजैवातृकेण वरदराजसूरिणा विलिखितं समाप्तम् ॥

No. **4251.** धर्मितावच्छेदकवादः.

DHARMITĀVACCHĒDAKAVĀDAḤ.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 34. Lines, 12 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above. The slight difference in the colophon is worth noticing.

Colophon:

इति श्रीभट्टाचार्यहरिरामतर्कवागीशकृतौ धर्मितावच्छेदकप्रत्यासत्तिविचारस्समाप्तः ॥

No. **4252.** नञ्वादशिरोमणिः.

NAÑVĀDAŚIRŌMAṆIḤ.

Substance, palm-leaf. Size, 15×1 inches. Pages, 6. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 67*a*. The other works herein are **Padārthatattvanirūpaṇa** 1*a*, Padārthatattvanirūpaṇavyākhyā 10*a*, Nañvādaśirōmaṇivyākhyā 70*a*.

By Śirōmaṇi-bhaṭṭācārya.

A discussion of the various meanings of the negative particle known as Nañ in Sanskrit.

Complete.

Beginning:

संसर्गाभावश्चान्योन्याभावश्च नञर्थः । तत्रान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबलसिद्धम्; नीलघटवति न घटः, नीलघटो न घट इत्यव्यवहारात्, इह पीतघटवति न नीलघटः, पीतघटो न नीलघट इति व्यवहाराच्च । प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमौ । तेन यत्पदोपस्थापितस्य प्रतियोगिनोऽनुयोगिन्याधाराधेयभावसम्बन्धेनान्वयः, तत्र संसर्गाभावस्यापि तथा । यथा—पचति चैत्रः, न पचति चैत्रः; चैत्रस्येदं, नेदं चैत्रस्य–इत्यादि ।

End:

अन्योन्याभावबोधने नञो न सामर्थ्यम् । तेन न पचति, न राज्ञ इत्यादौ कृत्यादेरन्योन्याभावः, भूतलं(ले) न घट इत्यादौ घटादेस्संसर्गाभावो न प्रतीयत इत्याहुः ॥

Colophon:

इति श्रीमद्विद्वत्कुलतिलकश्रीमदद्वैतविद्याचार्यश्रीमच्छिरोमणिभट्टाचार्यप्रणीतश्रीमत्समस्तपण्डितकुलतिलकश्लाघनीययुक्तिमुक्ताफलगुम्फितो नञ्शिरोमणिः ॥

No. **4253.** नञ्वादशिरोमणिः (नञ्विवेकः).

NAÑVĀDAŚIRŌMAṆIḤ (NAÑVIVĒKAḤ).

Pages, 6. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 3916.

Same work as the above with a difference in the colophon only.

Colophon:

श्रीतार्किकशिरोमणिभट्टाचार्यकृतौ नञ्विवेकस्समाप्तः ॥

No. 4254. नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्.

NAÑVĀDAŚIRŌMAṆIVYĀKHYĀNAM : NAÑVIVĒCANAM.

Pages, 46. Lines, 7 on a page.

Begins on fol. 70 of the MS. described under No. 4252.

A commentary on the Nañvāda of Śirōmaṇi-bhaṭṭācārya.

By Raghudēva-Nyāyālaṅkāra.

Incomplete.

Beginning:

शिवं प्रणम्य तत्पश्चात् तर्कवागीश्वरं गुरुम् ।
क्रियते रघुदेवेन नञ्वादे सुविवेचनम् ॥

प्रसङ्गसङ्गत्या नञ्शक्यतावच्छेदकं व्यवस्थापयति—संसर्गाभावश्चे-त्यादि । संसर्गाभावत्वमन्योन्याभावत्वं (च) नञ्शक्यतावच्छेदकमित्यर्थः । संसर्गाभावत्वं ध्वंसप्रागभावादौ संसर्गाभाव इति प्रतीतिसाक्षिकोऽखण्डो-पाधिः । केचित्तु संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वम् । न चाभावबुद्धौ प्रतियोगिसंसर्गारोपस्य हेतुत्वे मानाभावान्नैवमिति वाच्यम् ।

For the end, see under the next number.

No. 4255. नञ्वादशिरोमणिव्याख्यानम्—नञ्विवेचनम्.

NAÑVĀDAŚIRŌMAṆIVYĀKHYĀNAM : NAÑVIVĒCANAM.

Pages, 16. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4005.

A commentary on the Nañvādaśirōmaṇi of Raghunātha-śirōmaṇi.

By Raghudēvanyāyālaṅkāra.

The first leaf is wanting. There are 2 pages of the original text also in this manuscript.

Same work as the above.

See under the previous number for the beginning.

End:

न च दुग्धं न दधि इत्यादौ दधिपदोत्तरलुप्तविभक्तेरनुसन्धानं विनापि शाब्दबोधस्यानुभवसिद्धस्यापि लाभो बोध्यः ॥

अत्रानुक्तं दुरुक्तं वा यत्किञ्चिज्जल्पितं मया ।
तत्सर्वं जगदीशस्य प्रीत्यर्थं स्यादनिन्दितम् ॥

रघुदेवकृतग्रन्थालोकनेन मनीषिणः ।
अध्यापयन्तु सन्तोषैर्नञ्वादमविवादतः ॥

Colophon:

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता नञ्वादव्याख्या समाप्ता ॥

यडवेल्लिकुलोद्भूततिम्मनाख्यबुधो मुदा ।
रघुदेवकृतां टीकां व्यलिखन्नञ्शिरोमणेः ॥

No. 4256. नञ्वादार्थप्रदीपः.

NAÑVĀDĀRTHAPRADĪPAḤ.

Pages, 27. Lines, 6 on a page

Begins on fol. 7*b* of the MS. described under No. 3916.

Complete.

By Bhavānanda.

This is another commentary on the Nañvāda of Raghunātha-Śirōmaṇi.

Beginning:

संसर्गाभाव इति । शक्यतावच्छेदकभेदेन शक्तिभेदसूचनायोक्तिभेदः । तथा च संसर्गाभावत्वमन्योन्याभावत्वं च नञर्थशक्यतावच्छेदकमित्यर्थः । न च लाघवात्सर्वसाधारणमभावत्वमेव शक्यतावच्छेदकमस्तु, तत्तत्समभिव्याहारवशात् समवायावच्छिन्नायास्तादात्म्यावच्छिन्नायाः प्रतियोगितायास्संसर्गतया भानेनैव वैलक्षण्यमिति वाच्यम् ।

End:

तावतापि भूतले न घट इत्यादौ घटपदोत्तरसप्तम्या(:) प्रतियोगित्वादौ लक्षणया भूतले घटप्रतियोगिकः संसर्गाभाव इति बोधस्य वारणासम्भवात् । कृतिसम्बन्धादेरिति । न पचतीत्यत्र कृति(तेः), न राज्ञ इत्यत्र सम्बन्धस्य नान्योन्याभावबोधनमित्यर्थः ॥

श्रीभवानन्दसिद्धान्तवागीशेन विनिर्मितः ।
नञ्वादार्थप्रदीपोऽयं निहन्तु सुधियां तमः ॥

No. **4257.** नित्यसुखवादः.

NITYASUKHAVADAH.

Pages, 7. Lines, 7 on a page.

Begins on fol. 57*b* of the MS. described under No. 3922.

This is a discussion as to whether the Supreme Being is characterised by blissfulness.

Incomplete.

Beginning:

ईश्वरस्सुखवान् न वेति विप्रतिपत्तिः ।

अत्र प्राञ्चः—

ईश्वरो न सुखवान् सुखसामग्र्यभावादिति । तथाहि—धर्मात्सुखमधर्माद्दुःखमिति दर्शनात् धर्मत्वेन सुखत्वेनैव लाघवात्कार्यकारणभाव इति धर्माभावादीश्वरे न सुखमिति ।

End:

यथात्रैकत्र विशेषणत्वोपस्थापितस्यापि तादृशस्यापरत्रान्वयो निराबाधः, तथा शब्दमण्यालोकविस्तरे विवेचयिष्याम इत्याहुः । एवञ्च आनन्दं ब्रह्मणो रूपमित्यत्रानन्दश.

No. 4258. निपातवादार्थः.
NIPĀTAVĀDĀRTHAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 105*a* of the MS. described under No. 4073.

A discussion of the various meanings of indeclinable particles.

Complete.

Beginning:

प्रणम्य दक्षिणामूर्तिमक्षीणगुणलक्षणम् ।
निपातानां वाचकत्वं सम्यगत्र विचार्यते ॥

अत्र निपातानां वाचकत्वं द्योतकत्वं वेति विप्रतिपत्तिः । द्योतकत्वं वैयाकरणाः ।

तथाहि—

साक्षात्क्रियते घट इत्यत्र साक्षात्पदस्य प्रत्यक्षार्थकत्वे कृञ्धातोश्च यत्नार्थकत्वेऽन्वयानुपपत्तिः ।

End:

मन्मते तु घटकर्मणो(को)मत्कर्तृकसाक्षात्कार इति कर्तृकर्माख्यातयोरविशेष एवान्वयबोध इति नञो द्योतकतैव ॥

Colophon:

निपातवादार्थः ॥

No. 4259. पक्षताक्रोडः.
PAKṢATĀKRŌḌAḤ.

Pages, 19. Lines, 11 on a page.

Begins on fol. 20*a* of the MS. described under No. 4236.

By Candranārāyaṇa.

A discussion relating to the nature of a proposition.

Incomplete.

Beginning:

ननु यद्धर्मिकयत्सम्बन्धावच्छिन्नयत्प्रकारकनिश्चयत्वेन यत्संशयं प्रति निवर्तकत्वं स संशयः तद्धर्मिकतत्सम्बन्धसंसर्गकतत्साध्यकानुमितौ हेतु-भूता पक्षता इति । अस्य साध्यतावच्छेदकसम्बन्धावच्छिन्ने साध्यताव-च्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनि-श्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयः पक्षतेति— निष्कर्षः ।

अत्रेयमापत्तिः—

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्नवि-शेष्यत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यताशालिसंशयत्वनिवेशेनैवो-क्तानुगमसम्भवे निश्चयपर्यन्तानुधावनं व्यर्थम् ।

End:

तथा चोक्तबाधघटकजलवद्ध्रदत्वावच्छिन्नविषयताया अपि सत्प्रति-पक्षज्ञानप्रतिबन्धकतावच्छेदकतया प्रकृतानुमित्यवृत्तितया तन्निरूपकताव-च्छेदकजलवद्ध्रदत्वावच्छिन्नविषयकप्रतीतिविषयतावच्छेदकत्वस्योक्तबाधत्वा-दावभावात् । अतः प्रतिबन्धकतानतिरिक्तवृत्तिविषयतानिवेश इत्याहुः ॥

No. **4260.** पक्षताक्रोडः.

PAKṢATĀKRŌḌAḤ.

Substance, palm-leaf. Size. $14\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages. 28. **Lines. 10** on a page. Character. Grantha. Condition, injured. Appearance, old.

Begins on fol. 39*a*. The other work herein is **Śatakōṭi-khaṇḍanamaṇḍana** 1*a*.

Incomplete.

Similar to the above.

Author unknown.

Beginning :

सत्यपि परामर्शादौ पक्षे साध्यनिर्णयदशायां विनानुमित्सामनुमित्य-नुदयात् अनुमितिं प्रति पक्षताया हेतुत्वं कल्प्यते . . . . अथैवमपि पर्वतो वह्निमानित्येतादृशसिद्धिकाले अधिकविषयिण्या अपि नीलपर्वतो वह्निमान् पर्वतस्सुन्दरवह्निमानित्याकारकानुमितेरनुदयापत्तिः । पर्वतत्वादिपर्याप्तोद्देश्यतावच्छेदकताकत्वस्य वह्नित्वपर्याप्तविधेयतावच्छेदक-त्वस्य च निवेशेऽप्यनिस्तारः ।

End :

वह्निमान् पर्वतो घटवानित्याद्यनुमितिं प्रति सिध्यादिप्रतिबन्धकता-यामपि पर्वतो वह्न्यभाववानित्येतादृशबाधाभावादिनिवेश(शे)न बाधकाले तादृशानुमितिवारणसंभवात् । एवमभावस्य तत्तद्व्यक्तित्वेन हेतुतायामेक-प्रतिबध्यप्रतिबन्धकभावपरिशेषापत्तिरिति दिक् । अथानुमितिं प्रति साध्य-निर्णयत्वेन प्रतिबन्धकत्वकल्पनापेक्षया.

No. 4261. पञ्चमविषयताविचारः.

PAÑCAMAVIṢAYATĀVICĀRAḤ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 35*a*. The other works herein are Śatakōṭi 1*a*, Samānabalavicāra 14*a*, Bādhakrōḍapatra 27*a*, Sādhāraṇavicāra 41*a*, Sāmānyaniruktipatra 51*a*.

A critical discussion of Pañcamaviṣayatā which forms a part of Gadhādhara's discussion of the five limbs of a syllogism.

Incomplete.

Beginning :

पञ्चमविषयतांशे विशेषणविधयानुमितिजनकतावच्छेदकतापर्याप्त्य-धिकरणीभूतो यो धर्मः . . . .

लिङ्गत्वाविषयकत्वं प्रतिज्ञालक्षणे गदाधरभट्टाचार्यैः परिष्कृतम् । अथात्र तादृशधर्मावच्छिन्नविषयत्वावच्छिन्नत्वं प्रतिबन्धकतायां निविष्टं तादृशधर्मावच्छिन्नविषयतानिष्ठावच्छेदकताकत्वं, तादृशधर्मावच्छिन्नाश्रयविषयतानिष्ठावच्छेदकताकत्वं वा; उभयमपि न सम्भवति ।

End:

उक्तस्थले अधिकरणविषयतायास्साध्यनिष्ठप्रकारतानिरूपितत्वेऽपि तन्निष्ठधर्मितावच्छेदकत्वाभावादिति वाच्यम्; साध्याभावव्यापकतावच्छेदकहेत्वभाववत्प्रतियोगिहेतुमान्.

No. 4262. पदार्थतत्त्वनिरूपणम्.

PADĀRTHATATTVANIRŪPAṆAM.

Pages, 17. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4252.

By Bhaṭṭācāryaśirōmaṇi.

An examination of the nature of the various categories.

Complete.

Beginning:

(ओं नमस्सर्वभूतानि विष्टभ्य प)रिवर्तते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥

अथ पदार्थतत्त्वं निरूप्यते — तत्र दिक्कालौ नेश्वरादति(रिच्येते मानाभावात्)तत्तन्निमित्तविशेषसमवधानवशात् ईश्वरादेव तत्तत्कार्यविशेषाणामुपपत्तेः । परेषामे(कैकस्माद्दिगादेरिव)विलक्षणानां प्राच्यादिव्यवहाराणां शब्दनिमित्तकारणत्वेन क्लृप्तस्येश्वरस्यैव शब्दसमवायिका(रणत्वम्) ।

End:

कारणत्वप्रतियोगित्वमेव कार्यत्वमिति चेत् कार्यत्वप्रतियोगित्वमेव कारणत्वमपि किन्न रोचते? तस्मात् कारणत्वञ्चोभयभिन्नमेवेति कृतं पल्लवेन ॥

अर्थानां युक्तिसिद्धानां मदुक्तानां प्रयत्नतः ।
सर्वदर्शनसिद्धान्तविरोधो नैव दूषणम् ॥
अर्थानां युक्तिसिद्धान्ताविरोधैर्नैव पण्डिताः ।
विना विचारं न त्याज्या तद्विचाराय(विचारयत)यत्नतः ॥
सर्वशास्त्रानु(र्थ)तत्त्वज्ञान् नत्वा नत्वा भवादृशान् ।
इदं प्रोचे मदुक्तानि विचारयत सादरम् ॥
नातिरेषो(रीतिरेषा) न दोषाय सेविता पूर्वपण्डितैः ।
यन्निजोक्तिविचाराय याचते विदुषो(षः) परान् ॥

Colophon:

इति श्रीमहोपाध्यायश्रीमद्भट्टाचार्यशिरोमणिविरचितं पदार्थतत्त्वनिरूपणं समाप्तम् ॥

No. **4263.** पदार्थतत्त्वनिरूपणम्.

PADĀRTHATATTVANIRŪPAṆAM.

Pages, 11. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3918.

Complete.

Same work as the above.

No. **4264.** पदार्थतत्त्वनिरूपणव्याख्या.

PADĀRTHATATTVANIRŪPAṆAVYĀKHYĀ.

Pages, 113. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 4252.

A commentary on the Padārthatattvanirūpaṇa of Raghunāthaśirōmaṇi: by Raghudēvanyāyālaṅkāra.

Complete.

Beginning:

नन्दनन्दनपदद्व(द्वन्द्व)न्द्वं निधाय हृदि चिन्तय(न्) ।
तनोति कुत्र(तु)कं किञ्चिद्रघुदेवस्समासतः ॥
कामहस्तधृतसास्त्रकार्मुकं पौष्पमद्भुतमुदीक्ष्य कुप्यतः ।
धूर्जटेर्नयनकोणशोणता हन्तु सर्वजगतामुपद्रवम् ॥
पदार्थतत्त्वं यदिदं शिरोमणिर्निर्णीतवान् जीर्णमतस्य दूषणैः ।
तदेव तर्केण विचारयामस्सदर्थकेनेतरखण्डनेन ॥

प्रसङ्गात् पदार्थतत्त्वं निर्वक्तुं शिष्यावधानाय प्रतिजानीते—अथेत्यादि । नञ्पदादेः संसर्गाभावत्वान्योन्याभावत्वादौ शक्यतावच्छेदकत्वव्यवस्थापनानन्तरं प्राचीनाभ्युपेतपदार्थानां कस्यचिदनतिरिक्तत्वं, कस्यचित्खण्डनं, कस्यचिदतिरिक्तत्वं तर्केण व्यवस्थाप्यत इत्यर्थः । तत्रेति । प्राचीनाभिमतपदार्थेषु मध्य इत्यर्थः । दिक्कालावित्यादि । दिक्कालयोरतिरिक्तत्वं यत्प्राचीनैस्स्वीकृतम्; तन्न युक्तिसिद्धम् । तयोरतिरिक्तत्वे मानाभावादित्यर्थः ।

End:

नन्वप्रयोजका एव त्वदर्था इत्यत आह—

युक्तिसिद्धानामिति । मदुक्तानां नान्येनोक्तानां दर्शनं शास्त्रं भवादृशान् पण्डितान् एषा पूर्वश्लोकोक्ता पूर्वपण्डितैः वाचस्पतिमिश्रादिभिः । परानिति । पण्डितानामि(नि)त्यर्थः ॥

पदार्थखण्डनाक्रात(न्त)पुरुहूतपुरोहितम् ।
शिरोमणिमहं वन्दे शिरोमणिमिवाद्भुतम् ॥
श्रीमद्दीधिति(कार)कल्पितमहाकोलाहलव्याकुले
मार्गे सञ्चरणाय यानि(यन्नि)गदितं सिद्धान्तसिद्धेतरत् ।

दैवात्तेन भवेद्यदीह सहसा प्रौढापराधो मम

क्षन्तव्यः कृतिभिः श्रुतो यदि भवेद्यक्ता(क्षा)नुरूपाद्याव(पो ब)लिः ॥

Colophon :

इति श्रीरघुदेवन्यायालङ्कारभट्टाचार्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ॥

No. 4265. पदार्थखण्डनशिरोमणिव्याख्या.

PADĀRTHKHAṆḌANAŚIRŌMAṆIVYĀKHYĀ.

Pages, 54. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 3918.

A commentary on the Padārthatattvanirūpaṇa of Śirōmaṇi : by Jayarāma. The change in the name of the original work is worth noticing.

Complete.

Beginning :

तातस्य तर्कसरसीरुहकाननेषु चूडामणेर्दिनमणेश्चरणौ प्रणम्य ।

श्रीरामभद्रसुकृती कृतिनां हिताय लीलावशात्किमपि कौतुकमातनोति ॥

तत्र तेषु पदार्थेषु । दिक्कालाविति । पूर्वस्यां घट इत्यादिप्रतीतिविषयविभुत्वमिह दिक्त्वं, कालत्वञ्च इदानीं घट इत्यादिप्रतीतिविषयविभुत्वमिह कालत्वम्; अतो न सिध्यसिद्धि(भ्यां) व्याघातः; न वा घटादावंशतो बाधः । पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायामतिरिक्तदिगादेर्निराकरणानुपपत्तेः ।

End :

अनन्नर्थे तादृशबोधस्य फलस्य प्रामाणिकत्वे तद्बोधाय प्रकारतातिरिक्तसंबन्धस्यैव कार्यतावच्छेदकत्वात् अन्यथानुपपत्तेर्दुर्वारत्वादिति परमरहस्यमत्रानुसन्धेयम् ॥

Colophon:

इति श्रीन्यायवाचस्पतिभट्टाचार्यजयरामेण विरचिता पदार्थखण्डन-शिरोमणिव्याख्या समाप्ता ॥

No. **4266.** पदार्थतत्त्वविवेकः.

PADĀRTHATATTVAVIVĒKAḤ.

Substance, palm-leaf. Size, 17 × 1 inches. Pages, 176. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Breaks off in Śabda-paricchēda.

A work on the categories: by a pupil of Lakṣmaṇaguru.

The subject matter of the work is similar to that of what is described under No. 4264.

Beginning:

(आलम्बे) जगदालम्बं लम्बोदरपदाम्बुजम् ।
शुष्यन्ति यद्रजस्स्पर्शात्सद्यः प्रत्यूहवार्द्धयः ॥

नत्वा विश्वेश्वरं साम्बं गुरुं श्रीलक्ष्मणाभिधम् ।
द्रव्यादीनां पदार्थानां विवेकः क्रि(यतेऽधुना) ॥

(स्वाभि)मतकर्मारम्भसमये सर्वे शिष्टा मङ्गलमाचरन्ति । तस्य न समाप्तिः फलम्; कृतेऽपि मङ्गले असमाप्तेः, अकृतेऽपि मङ्गले समाप्तेश्च ।

* * * *

विभागे स्वतन्त्रेच्छाया नियामकत्वादिति दिक् ॥

Colophon:

इति प्रत्यक्षपरिच्छेदः समाप्तः ॥

End:

अनादिप्रयोगानुसारिणी लक्षणा निरूढलक्षणा; यथा—नीलपदस्य नीलवति । यत्र मानान्तरात् रूढ्यर्थसंबन्धिनि तात्पर्यमवधार्यते, तत्र रूढिपूर्विका लक्षणा; यथा—मण्डपपदस्य गृहसम्बन्धिनि पुरुषे.

No. **4267.** पदार्थमाला.

PADĀRTHAMĀLĀ.

Substance, palm-leaf. Size, 15⅛ × 1⅝ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, new.

Contains Dravyanirūpaṇa complete.

Breaks off in Guṇanirūpaṇa.

By Jayarāma.

A work similar to the one described under 4264.

Beginning:

स्वीकृतकुपितयशोदाश्रमहरगोदामबन्धनव्यसनम् ।
नलिनीदलसुकुमारं नन्दकुमारं नमस्यामः ॥

श्रीमता जयरामेण युक्तिमौक्तिकगुम्भिता ।
पदार्थमाला विदुषां प्रमोदाय वितन्यते ॥

साधर्म्यवैधर्म्याभ्यां निखिलपदार्थतत्त्वज्ञानं निःश्रेयसोपयोगीति पदार्थास्तद्धर्माश्च निरूप्यन्ते—

तत्र पदार्था द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः । अत्र पदार्थमात्रमुद्दिश्य द्रव्याद्यन्यतमत्वेन विधानात् द्रव्याद्यन्यतमत्वेन पदार्थव्यापकत्वं लभ्यते ।

End:

प्रकृते साधकम्; किन्तु बाधकमेव प्रभाग्रहे तु तमोधीस्तु . . . . प्रत्यक्षाभाव एव तमः;

एकत्र आलोकप्रत्यक्षेऽप्यन्यत्र तम(स): प्रत्यक्षत्वात् तमसश्चाक्षुषत्वानाप- . . . . तम इत्यपि न युक्तम्; गाढान्धकार इति प्रतीतेरपि भ्रमत्वापत्तेः । तमो नीलं न तु नीलिमा इति प्रत्यय. . . . .

Colophon:

इति द्रव्यनिरूपणम् ॥

* * * *

(अनु)गतीकृत्य त (त्त)ज्जनकत्वानां यथाकथञ्चिद्रूपेणानुगतानां जनकत्वानां वा अवच्छेदकत्वेन जातिकल्पने रूप . . . . ताया रूपान्यवृत्तितादृशजनकताया वा अवच्छेदकतया रूपावृत्तित्रयोविंशतिगुणवृत्तिजातेः.

No. 4268. परामर्शवादः.

PARĀMARŚAVĀDAḤ.

Pages, 63. Lines, 5 on a page.

Begins on fol. 71*a* of the MS. described under No. 3916.

A discussion bearing on the nature of a ratiocination leading to an inference. Author unknown.

Incomplete.

Beginning:

परामर्शं विनानुमितेरनुदयादनुमितिं प्रति परामर्शो हेतुरिति सिद्धान्तः । तत्र धूमपरामर्शसत्त्वे घटानुमित्यनुदयात्पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति पर्वतादिविशेष्यकवह्निव्याप्यधूमादिप्रकारकनिश्चयो हेतुरिति कार्यकारणभावो विशिष्य कल्पनीयः । अथ वह्निव्याप्यालोकवान् पर्वत इति परामर्शादपि पर्वतो वह्निमान् इत्यनुमितेरुदयात्तत्र धूमपरामर्शहेतुतायां व्यभिचार इति चेन्न; तादृशव्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटौ धूमलिङ्गकत्वनिवेशात् ।

End:

एवञ्चाप्यतीर(त)वह्न्याद्यनुमितिसामग्रीप्रतिबन्धकता . . . . परज्ञाननिवेशनप्रयुक्तमुपदर्शितगौरवं मीमांसकमते । नैयायिकमते तु तत्स्थलीयतादृशानुमितिसामग्रीनियतोपद.

No. 4269. परामर्शवादः.

PARĀMARŚAVĀDAḤ.

Pages, 10. Lines, 8 on a page.

Begins on fol. 48*a* of the MS. described under No. 4005.

Incomplete.

Same work as the above.

No. 4270. प्रागभावविचारः.

PRĀGABHĀVAVICĀRAḤ.

Pages, 18. Lines, 7 on a page.

Begins on fol. 35*a* of the MS. described under No. 3918.

A discussion on what is called the antecedent non-existence of things.

Beginning:

अथ प्रागभावे किं मानम्? न तावदध्यक्षम्; इहेदानीं घटप्रागभाव इति प्रत्यक्षासिद्धेः । घटो भविष्यतीति प्रत्यक्षस्य च वर्तमानकालोत्तरकालोत्पत्तिकत्वावलम्बनत्वेनैवोपपत्तेः प्रागभावासाधकत्वात् । न चाभावत्वं विनाशिवृत्ति पदार्थविभाजकोपाधित्वात् भावत्व(व)दित्याद्यनुमानात्तत्सिद्धिरिति वाच्यम्; तादृशानुमानस्याप्रयोजकत्वात् ।

End:

तदसत्; स्वसामानाधिकरण्यावच्छिन्नकालिकविशेषणतासम्बन्धेन दुःखवदन्यत्वस्य ध्वंसत्वे निवेशादेवेदानीन्तनदुःखध्वंसे ऽव्यभिचारवारणसम्भवात् तद्वारणाय दुःखे चरमत्वनिवेशस्य वैफल्यादिति ॥

Colophon:

इति प्रागभावविचारः ॥

No. 4271. प्रागभावोज्जीवनम्.

PRĀGABHĀVŌJJĪVANAM.

Pages, 27. Lines, 7 on a page.

Begins on fol. 44*a* of the MS. described under No. 3918.

Complete.

By Vajraṭaṅka.

A work to uphold the theory that there is such a thing as an antecedent non-existence of things.

Beginning:

इदानीं चैत्रो नास्तीति प्रतीत्यैव प्रागभावस्समर्थयिष्यते—

प्रथमं सामान्यतो नञुल्लेखाभावप्रतीतौ धर्मिण्यभावप्रकारतानियामकसम्बन्धं विचारयन् भूमिकामारचयति—नास्तीत्यादिना । नास्तीति नञुल्लिखिताभावप्रतीतौ दैशिकविशेषणतैवाभावस्य धर्मिविषयतानियामिका अन्यथा समवायावच्छिन्नघटत्वाभावस्य घटादौ कालिकसम्बन्धेन सत्त्वात् घटे घटत्वं नास्तीति प्रतीत्यापत्तेश्च ।

End:

एवं कालिकसम्बन्धावच्छिन्नाभावस्य धर्मिणि दैशिकसम्बन्धेन भानोपगमे ज्ञानदशायां . . . . नास्तीत्यादिप्रतीतीनामदैशिकसम्बन्धावच्छिन्नाभावविषयकत्वस्योक्तत्वात्समवायावच्छिन्नघट . . . . . नवच्छेदक्षणेष्ववच्छेदकतया वृत्तिरिति न सुधियां सम्भाव्यमिति दिक् ॥

Colophon:

भा(प्रा)गभावोज्जीवनं वज्रटङ्कीयं (समाप्तम्) ॥

No. 4272. प्रामाण्यवादः.

PRĀMĀṆYAVĀDAḤ.

Substance, palm-leaf. Size, 18½ × 1¼ inches. Pages, 78. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

A treatise on the criteria of truth as known to the Nyāya philosophy.

By Agnihōtrabhaṭṭa.

Beginning:

ननु मुनिपदेन तत्त्वार्थचिन्तनपरेण तत्प्रणीतविद्यायाः प्रामाण्यं प्रतिपाद्यते—

तदयुक्तम्; अष्टादशानामपि विद्यानां तत्तन्मुनिप्रणीतानां विरोधार्थतया प्रामाण्यायोगादिति चेन्न । तत्तद्विद्यानां प्राधान्ये(न) प्रतिपाद्यांशे प्रामाण्यात् । तथा हि—न्यायविद्यायाः प्रमाणप्रमेयादितत्त्वं स्वतः प्रतिपाद्यम्; अस्त्येव तत्र प्रामाण्यम्; जीवेशभेदादिकं तु स्थूलारुन्धतीन्यायेन सूक्ष्माद्वैतमतारोपयोग्यतया । प्रमाणचतुष्ट्वादिसङ्ख्याविशेषोपवर्णनमपि न्यायविशेषप्रदर्शनेन बुद्धिसौक्ष्म्यार्थमिति ।

End:

अस्तु पूर्वकोटिस्मृतेः संशयोपयोगः भवता वा पूर्वमप्रामाण्यास्मरणम् । तथापि संशयो दुरुपपाद इत्याह किञ्चेति । तथा चेति । तस्य च दोषान्तरसापेक्षत्वात् न स्वातन्त्र्येण दोषत्वमिति भावः । यत्तु संशयानुरोधेनैव असंसर्गाग्रहप्रयोज.

No. **4273.** बाधक्रोडपत्रम्.

BĀDHAKRŌḌAPATRAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 27*a* of the MS. described under No. 4261.

Incomplete.

A controversial pamphlet on the logical fallacy called Bādha, which means ' contradiction.'

By Śōkattūr-Vijayarāghavācārya.

Beginning :

नत्वा नन्दतनूजं स्मृत्वा गुरुवर्यचरणपाथोजम् ।
लक्ष्मणि बाधस्यैतत् सभ्यजनाह्लादकारणं क्रियते ॥

उद्देश्यतावच्छेदकताविधेयतावच्छेदकतातिरिक्ता प्रकृतपक्षतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकताकप्रकारताशालिबोधविषयतान्तःपातिनी या प्रकारता तदवच्छिन्नप्रतिबध्यतानिरूपिता सती स्वनिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदकविषयत्वानवच्छिन्ना . . . . तद्रूपावच्छिन्नत्वं बाधसामान्यलक्षणं भट्टाचार्यैरुक्तम् । . . . .

अथात्र लक्षणेऽसम्भवः ; वह्न्यभावव्याप्यवह्न्यभाववान् ह्रद इति ज्ञानस्य ह्रदो वह्न्यभाववानित्यनुमितिजनकतया बाधप्रतिबन्धकतायां तादृशजनकतावच्छेदकविषयत्वानवच्छिन्नत्वाभावात् ।

End:

निरुक्तोभयाभाववत्कालीनघटपक्षकस्थले तादृशविशिष्टसाध्याभावाभाव-वदवृत्तिमत्पक्षात्मकसत्प्रतिपक्षातिव्याप्तेः । मैवम्.

No. **4274.** बाधरहस्यम्.

BĀDHARAHASYAM.

Pages, 39. Lines, 9 on a page.

Begins on fol. 41*a* of the MS. described under No. 1388.

This also deals with the nature of the fallacy known as Bādha: different from the previous work.

Author unknown.

Complete.

Beginning:

अथ बाधबुद्धिप्रतिबध्यता वर्ण्यते—

तत्र तद्धर्मावच्छिन्नविशेष्यताकतदभाववत्तानिर्णयकाले तद्धर्मावच्छिन्न विशेष्यताकतद्विशिष्टबुद्धेरनुदयात् पर्वतत्वावच्छिन्नविशेष्यताकसंयोगादि-संसर्गकवह्नित्वाद्यवच्छिन्नप्रकारताशाल्यलौकिकज्ञानत्वावच्छिन्नं प्रति पर्वत-त्वाद्यवच्छिन्नविशेष्यताकदैशिकविशेषणतासंसर्गसंयोगादिसंसर्गावच्छिन्नवह्नि-त्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रकारकानाहार्याप्रामाण्यज्ञानानास्कन्दितानि-र्णयत्वेन प्रतिबन्धकत्वं कल्प्यते ।

End:

कायव्यूहस्थले च अन्यशरीरावच्छेदेन तदात्मनि बाधादिसत्त्वे अन्यशरीरावच्छेदेनापि नतद्विशिष्टबाधबुद्धिरुपेयेति तदुत्पादे प्रमाणविरहा-त्तादृशफलस्य प्रामाणिकत्वे तु अनायत्या चैत्रादिशरीरावच्छिन्नत्वं बाधादौ विशिष्टबुद्धौ च विशेषणं देयम् ॥

Colophon:

इति बाधरहस्यं सम्पूर्णम् ॥

No. **4275.** मातरिश्वप्रत्यक्षवादः.
MĀTARIŚVAPRATYAKṢAVĀDAḤ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 20*b* of the MS. described under No. 3922.

A pamphlet on the direct perceptibility or otherwise of air, which is one of the five 'elements' of the Nyāya and Vaiśēṣika schools of philosophy.

Complete.

Beginning:

वायुश्चैत्रज्ञानजन्य[चैत्र]प्रत्यक्षविषयो न वेति विप्रतिपत्तिः ; विधिकोटिर्मीमांसकानाम् ; निषेधकोटिर्नैयायिकानाम् । चैत्रीयोपनीतभानात्मकप्रत्यक्षविषयत्वस्य वायोस्सत्त्वात् तदभावसाधने बाध इत्यतः चैत्रीयज्ञानजन्यत्वं प्रत्यक्षविशेषणम् । चैत्रीयोपनीतभानस्य चैत्रीयोपनायकज्ञानजन्यत्वाददोषः ।

End:

परमाण्वादिस्पर्शस्पार्शनवारणाय सामानाधिकरण्यसम्बन्धेन महत्त्वस्य हेतुतायाः, तादात्म्यसम्बन्धेनानुद्भूतस्पर्शप्रतिबन्धकतायाश्च कल्पनाविरहात्तादृशकतिपयकार्यकारणभावस्याधिक्येऽपि भवन्मते अनन्तसन्निकर्षहेतुत्वाधिक्येन साम्याभावादिति परास्तम् ॥

Colophon:

इति मातरिश्वप्रत्यक्षवादार्थः ॥

No. **4276.** मुक्तिवादः.
MUKTIVĀDAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 4\frac{1}{2}$ inches. Pages, 22. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

By Gadādhara : on the meaning of Mōkṣa or final deliverence.
Complete.

Beginning:

प्रयोजनमुद्दिश्यैव पुमांसस्तदुपाये प्रवर्तन्ते । अतः शास्त्रस्य प्रयोजनं प्रथमतः प्रदर्शयन्ति शास्त्रकृतः । तत्र स्वतः प्रयोजनं सुखं तद्भोगो दुःखाभावश्च । तत्त्वं चान्येच्छाधीनेच्छाविषयत्वम्; न तु प्रयोजनान्तरजनकत्वे सति प्रयोजनकत्वम् । स्वसाक्षात्काररूपभोगं प्रति विषयतया जनके सुखे अव्याप्तेः ।

End:

व्रीहिभिर्यजेत यवैर्वा इत्यादावपि व्रीह्यादौ यवसाहित्यबोधस्य व्युत्पत्तिसिद्धत्वादित्यन्यत्र विस्तरः ॥

Colophon:

इति श्रीगदाधरभट्टाचार्यविरचितोऽसौ मुक्तिवादः ॥

No. 4277. योगरूढिवादः.

YŌGARŪḌHIVĀDAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 75*a* of the MS. described under No. 4214.

Incomplete.

A discussion relating to the etymological and current significations of words.

Beginning:

पद्मशक्ति(म)त्त्वं पङ्कजपदवृत्ति न वा, पदवृत्तिप्रयोज्यपदार्थोपस्थितित्वमन्वयबोधजनकतावच्छेदकं न वा? इति विप्रतिपत्तिं सूचयितुं मतभेदमुपन्यस्यति—पङ्कजेति । पङ्कजमानय जात(:)पुत्र इत्यादिषु पङ्कपदजनिधातुसं(क्त)प्रत्ययानां पङ्कजाद्यर्थेषु शक्तेः क्लृप्तत्वात् केवलरूढिवादिमतं(ते)पूर्वपक्षम(क्षोऽ)पि न सम्भवतीति तदुपेक्ष्य केवलयोगवादिमतमनुवदति—तत्रेति ।

End:

अत एव प्रकारान्तरेण परिहरति—गङ्गापदेति । न च गङ्गापदवैयर्थ्यम् । . . . . प्रतिपादकत्वरूपैकवाक्यत्वस्य रक्षणार्थं लक्षणाभ्युपगमात् । एकवाक्यतानभ्युपगमे चान्य.

No. 4278. लक्षणावलिः.

LAKṢAṆĀVALIḤ.

Pages, 84. Lines, 5 on a page.

Begins on fol. 44*a* of the MS. described under No. 4177.

Complete.

A treatise on Nyāya giving clear and comprehensive definitions of the seven categories; by Tippābhaṭṭavipaścit, son and pupil of Vādīndracittibhaṭṭavipaścit.

Beginning:

गिरिजामोदकं विघ्ननोदकं करमोदकम् ।
स्तौमीष्टदायकं लम्बकायकं गणनायकम् ॥
भक्तानुरक्तां नित्यापदूषणां मणिभूषणाम् ।
वाणीविलसितां वाणीमेणीदृशमहं भजे ॥
सर्वदा सर्वदात्रे सद्वर्त्मने परमात्मने ।
असत्तृष्णाय कृष्णाय विष्णवे जिष्णवे नमः ॥
सर्वतन्त्रनिपुणस्य वादिसच्चिट्टभाटि(भट्टि)विदुषस्सुतेन च ।
तिप्पयाख्यविदुषार्थसिद्धये कथ्यते कलितलक्षणावलिः ॥

लक्षणस्य तावत् पञ्च दोषाः—अव्याप्त्यतिव्याप्त्यसंभवात्माश्रयव्यर्थविशेषणभेदात् । तत्र तावल्लक्ष्यतावच्छेदकाव्याप्य(पक)त्वे सति लक्ष्यतावच्छेदकसामानाधिकरण्यमव्याप्तिः . . . . साक्षात्कारविषयत्वं पदार्थसमान्यलक्षणम् । विषयत्वमित्युक्ते शशविषाणमिति शब्द-

जन्यज्ञानविषये शशविषाणे अतिव्याप्तिः तदर्थं साक्षात्कारपदम् । न च शशविषाणस्यासदर्थत्वेन ज्ञानाविषयत्वान्नातिप्रसङ्ग इति वाच्यम्; "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि" इति वचनात् तत्रापि ज्ञानविषयत्वस्य सत्त्वात् ।

End:

भावनावृत्तिगुणत्वसाक्षाद्व्याप्यजातिः संस्कारत्वम् । एवमुक्तजात्यवान्तरजातिनिरुक्तिरप्यूह्या । अनित्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिः कर्मत्वम् । एवं तदवान्तरजातिनिरुक्तिरपि ज्ञेया ॥

मीमांसाद्वयतर्कपन्नगगिरो व्याख्यानशिक्षापटो-
र्वादीन्द्राभिधचिट्टिभट्टि(ट्ट)विदुषश्शिष्येण पुत्रेण च ।
तिप्पाभट्टविपश्चिता विरचिता ह्यानवद्यायिता
युक्त्या लक्षणराजिरप्रतिहता न्याय्या बुधानां मता ॥

No. 4279. विधिवादः.
VIDHIVĀDAḤ.

Pages, 56. Lines, 7 on a page.

Begins on fol. 61*a* of the MS. described under No. 3922.

A discussion bearing upon what constitutes a commandment.

Wants beginning and end.

Beginning:

ज्ञानत्वेन कृतिसाध्यत्वप्रकारतानिरूपिताविशेष्यतावच्छेदकतासंन्धेन इच्छां प्रति तादृशसंबन्धेन ज्ञानत्वेनैव वा हेतुतायाः कल्पयितुमुचितत्वात् । चिकीर्षासामग्री यत्र प्रतिबन्धिका तत्र पाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानविशिष्टतादृशकृतिसाध्यताज्ञानत्वेन प्रतिबन्धकताकल्पनापेक्षया कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानत्वेन प्रतिबन्धकत्वकल्पनेन लाघवात् । विशिष्टधर्मितावच्छेदककेष्टसाधनताज्ञानस्य चिकीर्षाहेतुत्वकल्पनमेवोचितमित्यपि न (सु)साधम् ।

End:

एवञ्च कृतिसाध्यत्वे विधिशक्तिर्नापेयते ; अपि तु इष्टसाधनतायामेव । तस्याश्चाख्यातसामान्यशक्तिलभ्यायां कृतौ विशेषणतयान्वयः । कृतिवर्तमानत्वयोरिव एकपदार्थयोरपि कृतीष्टसाधनत्वयोः परस्परान्वयो बाधकाभावात् । अष्ट(थ) पाकादिगोचरप्रवृत्तिं प्रति पाकादिसाधनत्वप्रकारकत्व(कृति)विशेष्यकेच्छात्वेन कृतिसाध्यत्वप्रकारकपाकादिविशे.

No. 4280. विधिवादः.

VIDHIVĀDAḤ.

Substance, palm-leaf. Size, 15⅝ × 1⅝ inches. Pages, 52. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning and end.

Similar to the above.

Beginning:

श्येनेनेति । श्येनेनाभिचरन् यजेतेत्यत्र कथं विधिप्रवृत्तिः ? हिंसाया बलवदनिष्टसाधनत्वादिति चेत् तत्र कृतिसाध्यत्वे सतीष्टसाधन(त्व)मेव योग्यतयान्वेति ; न तु बलवदनिष्टा(न)नुबन्धित्वम् अयोग्यत्वात् ; निन्दार्थवादेन प्रायश्चित्तोपदेशेन च हिंसाया बलवदनिष्टसाधनत्वावगमात् । अत एव विहितेऽपि श्येने विगानान्न तान्त्रिकप्रवृत्तिः ; अभिचारस्य हिंसात्वेन न हिंस्यात्सर्वा भूतानीत्यनेन निषिद्धत्वादित्यर्थः ।

End:

विधेरप्रामाण्यमपाकरोति—मुक्त इति । विघ्नेहेत्विति । प्रतिब(न्धकापादकेत्य)र्थः । उपसंहरति तस्मादिति । जातेष्ट्यादिवद्यागस्यापि कृतिव्यधिकरणो व्यापारोऽस्त्वित्यर्थः । यस्य कर्मणो बहुपुरुषगतस्वर्गमपि फलं श्रूयते.

No. 4281. विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वविचारः.
VIŚIṢṬADVAYĀGHAṬITATVAVIŚIṢṬĀNTARĀGHAṬITATVAVICĀRAḤ.

Pages, 11. Lines, 8 on a page.

Begins on fol. 21*a* of the MS. described under No. 3919.

A discussion bearing upon the necessity or otherwise of two of the specified conditions in the definition of the fallacy known as Satpratipakṣa.

Incomplete.

Beginning:

अथ विशिष्टद्वयाघटितत्वविशिष्टान्तराघटितत्वरूपविशेषणद्वयनिवेशापेक्षया लाघवाद्यद्रूपावच्छिन्नविषयकनिश्चयविशिष्टप्रथमयद्रूपावच्छिन्नाविषयकयद्रूपावच्छिन्नविषयकनिश्चयत्वं (प्रकृतानुमिति)प्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयाघटितत्वमेव निवेश्यते। ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभाववज्जलावच्छिन्नविषयकनिश्चयविशिष्टवह्न्यभाववज्जलावच्छिन्नाविषयकजलवद्ध्रदविषयकनिश्चयत्वस्य प्रकृतानुमितिप्रतिबन्धकतानातिरिक्तवृत्तितया तादृशविशिष्टद्वयघटितत्वस्यैव वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदे सत्त्वान्नातिव्याप्तिः। वह्न्यभावत्वविशिष्टविषयकनिश्चयाविशिष्टवह्न्यभावत्वाविशिष्टाविषयकवह्न्यभाववद्ध्रदविषयकनिश्चयाप्रसिद्ध्या नासंभवावकाशः।

End:

भट्टाचार्यमते धर्मविशिष्टधर्मवत्त्वमित्यनुगमकरणात् नोक्तदोषः। धर्मे धर्मवैशिष्ट्यञ्च स्वावच्छिन्नप्रकृतानुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावृत्तित्वस्वविशिष्टप्रतीतिविषयतावच्छेदकत्वउभयसम्बन्धेन। प्रतिबन्धकतावृत्तित्वञ्च स्वसमानाधिकरणेत्यादिभेदवत्त्वसम्बन्धेन। स्वाधिकरणत्वञ्च स्वावच्छिन्नविषयताशाल्यनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयत्वसम्बन्धेन। भेदप्रतियोगितावच्छेदकत्वञ्च स्वाभाववत्त्वाविशिष्टपक्षधर्मताज्ञानकालीनत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदवत्त्वसम्बन्धेन। प्रतीतौ स्ववैशिष्ट्यञ्च स्वविशिष्टविषयतानिरूपक.

No. 4282. विशिष्टवैशिष्ट्यबोधविचारः.

VIŚIṢṬAVAIŚIṢṬYABŌDHAVICĀRAḤ.

Pages, 22. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3922.

Two leaves are wanting in the beginning

Complete.

A discussion relating to the power of attributes—as to whether they are or are not independently significant.

Beginning:

(प्र)तियोगित्वावच्छिन्नसंसर्गताकबुद्धित्वमेव तद्धर्मप्रकारकज्ञानजन्यतावच्छेदकं वाच्यमिति लोहितवह्निमानित्यत्र लौहित्यविशिष्टवह्न्य(भाव)स्यापि तदवच्छिन्नप्रतियोगिताकत्वेन वह्निसंयोगा . . . . . वच्छिन्नत्वात् लौहित्यावच्छिन्नप्रतियोगिताकत्वावच्छिन्नसंसर्गताकबुद्धित्वरूपस्य लौहित्यप्रकारकज्ञानजन्यतावच्छेदकाक्रान्ते(न्तते)ति न किञ्चिदनुपपन्नम् ।

End:

भूतलं घटवदित्यादिबुद्धेः भूतलत्वाद्यवच्छिन्नानुयोगिकवैशिष्ट्यावगाहितया तत्रानुयोगितावच्छेदकप्रकारकज्ञानमुद्रयास्मन्मते भूतलत्वादिप्रकारकज्ञानस्यापेक्षितत्वाद्विशिष्टप्रतियोगिकवैशिष्ट्यबोधे साधारणतद्धर्मावच्छिन्नविषयताकबुद्धित्वस्य तत्प्रकारकज्ञानहेतुतावच्छेदकत्वसम्भवेऽपि विशेषणतावच्छेदकज्ञानेहेतुतयोरैक्यादेकयुक्तेरुभयमतहेतुतेति विभावनीयम् ॥

Colophon:

इति विशिष्टवैशिष्ट्यबोधविचारस्समाप्तः ॥

No. 4283. विशिष्टान्तराघटितत्वविचारः.

VIŚIṢṬĀNTARĀGHAṬITATVAVICĀRAḤ.

Pages, 15. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3913.

A discussion as to the necessity or otherwise of the expression Viśiṣṭāntarāghaṭita in the definition of the fallacy known as Satpratipakṣa.

Complete.

Beginning:

नमामि शिरसा श्रीमच्छठारातियतीशितुः ।
शरणागतराजं सच्चरणाम्भोरुहद्वयम् ॥

मेयत्वविशिष्टव्यभिचारादावतिप्रसङ्गवारणाय भट्टाचार्यैर्विशिष्टान्तराघटितत्वं निविष्ट(वेशित)म् ।

अथैवमपि ह्रदो वह्निमानित्यादौ वह्न्यभावावच्छेदकत्वेन गृहीतजलवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयताक(महा)विशिष्टवारणाय विशिष्टान्तराघटितत्वपदस्य विशिष्टद्वयाघटितत्वघटितताद्दशार्थबोधकत्वेन वक्ष्यमाणतया मेयत्वं धूमाभाववद्वृत्तिवह्नित्वं च विशिष्टद्वयपदेनोपादायातिप्रसङ्गवारणसम्भवे निष्फलमेवेदं विशिष्टान्तराघटितत्वम् ।

End:

एकविशिष्टविषयतायामेव निवेशनीयतया ताद्दशविशिष्टविषयकप्रतीतेः निरुक्तविषयताशून्यत्वविरहादिति सर्वं समञ्जसम् ॥

नत्वा लोकगुरुं प्राप्य वेदान्तार्यशिरोमणिम् ।
शास्त्रोज्ज्वलधियं मुख्यं श्रीमता धीमता सदा ॥
दशाङ्गिश्रीनिवासेन भारद्वाजकुलेन्दुना ।
लिखितं पत्रमिदं लक्ष्मीनारायणपुरीस्थितेः ॥
तर्कवेदान्तवाकृतत्रबुद्धिकीर्तियुतस्य च ।
रङ्गाचार्यस्य पुत्रेण मखिना मोक्षतः पतेः(?) ॥

No. 4284. विशिष्टान्तराघटितत्वविचारः.

VIŚIṢṬĀNTARĀGHAṬITATVAVICĀRAḤ.

Pages, 20. Lines, 8 on a page.

Begins on fol. 6*a* of the MS. described under No. 4245.

Incomplete.

Same work as the above.

Beginning:

रघुवीरजगच्चक्षुःप्रभायिततनुश्रिया ।
सीतयालोकितस्सोऽयं विजयिष्येऽद्य वादिनः ॥

स्वसजातीयविशिष्टान्तराघटितत्वं मेयत्वविशिष्टव्य(भि)चारादावतिव्याप्तिवारणाय भट्टाचार्येण निवेशितम् । स्वसजातीयविशिष्टान्तराघटितत्वं च स्ववृत्तिहेत्वाभासविभाजकरूपविशिष्टं यत् स्वाविषयकप्रतीतिविषयीभूतं तदविषयकप्रतीतिविषयत्वम् ।

End:

उत्तरत्रापि सामान्यपदनिवेशे पर्वतो वह्निमान् धूमादित्यत्र पाषाणमयत्वविशिष्टपर्वते अतिव्याप्तिः; अत एकत्र व्यापकत्वं निवेशनीयम् ; उत्तरत्र केवलं निवेशे पूर्वोक्तासम्भवः; प्रथमतो निवेश्य उत्तरत्रानिवेशे अवच्छेदककोटिप्रविष्ट.

No. 4285. विशेषवादार्थः.

VIŚĒṢAVĀDĀRTHAḤ.

Pages, 30. Lines, 8 on a page.

Begins on fol. 3*a* of the MS. described under No. 3935.

Copied by Vēṅkaṭācārya of Śrīvatsagōtra.

Complete.

Herein a certain Kriṣṇasudhī criticises unfavourably the definition of Viśēṣa or particularity as given by Mahādēva, and gives his own definition, which he maintains to be the correct one.

Beginning:

रघुकुलजलधौ जातं संभृतसन्तानमाश्रये कश्चित् ।
अधिकोन्नतेरपि यतः विनतैरग्र्यः फलोत्करो ग्राह्यः ॥

महादेवप्रोक्ते सहृदयबुधानां सुरुचिरे
विशेषाणां लक्ष्मण्यभिदधुरसाङ्गत्यमिह ये ।
वचोभङ्गीं तेषां दृढघटितदोषां प्रकटयन्
सुधीः कृष्णाभिख्यो रचयति मुदं सर्वविदुषाम् ॥

स्वत एव व्यावृत्तत्वञ्च स्वभिन्नलिङ्गजन्यस्वविशेष्यकस्वसमानजातीयभेदानुमित्यविषयत्वम् ।

End:

अत्र च घटो गुणभिन्न इत्याद्यनुमितिमादाय स्वपदेन घटं संगृह्य गुणादावतिप्रसङ्गपरिहाराय स्वविशेष्यकत्वपदफलितस्ववृत्तित्वोपादानमिति दिक् ॥

Colophon:

विशेषवादस्सम्पूर्णः ॥

श्रीवत्सान्वयजातस्य वेङ्कटाचार्यस्य पुस्तकमिदं स्वहस्तलिखित[मिद]म ॥

No. 4286. विषयतावादः.

VIṢAYATĀVĀDAḤ.

Pages, 33. Lines, 15 on a page.

Begins on fol. 20*b* of the MS. described under No. 3925.

By Gadādhara.

A discussion bearing on the nature and relation of the contents of perceptive knowledge.

Complete.

Beginning :

बुद्धिर्नाम कश्चिदात्मविशेषगुणः, तद्व्यवस्थितिर्घटमहं जानामीत्याकारकापामरसाधारणानुभवबलादेव ; सा च सविषयिका उक्तधर्मिग्राहकप्रतीत्या घटादिविषयकत्वेनैव तदवगाहनात् । घटादिनिष्ठं तद्विषयत्वं च तत्प्रतियोगिकसम्बन्धविशेषः ; स च प्रतियोगित्वादिवत् स्वरूपादनतिरिक्त एव ।

End :

विरोधिज्ञानाप्रतिबन्धकत्वप्रसङ्गश्चेति प्रकारतादीनामेव तादृशप्रतिबन्धकभावावच्छेदकत्वादिति दिक् ॥

Colophon :

इति श्रीगदाधरभट्टाचार्यकृतौ विषयतावादस्समाप्तः ॥

No. **4287.** विषयतावादः.

VIṢAYATĀVĀDAḤ.

Pages, 160. Lines, 7 on a page.

Begins on fol. 12*a* of the MS. described under No. 3922.

Up to Śuddhaviṣayatāvādārtha.

Same work as the above.

Beginning :

विषयता च स्वरूपसम्बन्धविशेषः ज्ञानादीनां विषये, न त्वतिरिक्ता मानाभावादिति प्राञ्चः । तदसत् तथाहि—

विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञानानन्तरं घटप्रकारकज्ञानवानहमित्यादिप्रतीतिवत् भूतलप्रकारकज्ञानवानहमिति प्रत्ययप्रसङ्गः ।

End:

न च सुरभि चन्दनमित्येतादृशचाक्षुषप्रतीतेः चन्दनलौकिकसन्नि-कर्षजन्यतया तदुत्तरं सौरभं साक्षात्करोमि इत्यनुव्यवसायाविषयताविचारः ॥

Colophon:

इति शुद्धविषयतावादार्थस्समाप्तिमगमत् ॥ नलसंवत्सरे आश्विजमासे शुक्लपक्षे प्रतिपदि विषयतावादार्थस्समाप्तिमगमत् ॥

No. 4288. वृत्तिचन्द्रिका.

VṚTTICANDRIKĀ.

Substance, paper. Size, 12 × 4⅞ inches. Pages, 42. Lines, 13 on a page. Character, Dēvanāgarī. Condition, injured. Appearance, old.

Deals with the various kinds of the significatory function of words: by Ghāsīrāma, son of Rāmabala pupil of Gauḍajñātīya-mahāmahōpādhyāyaparamānanda.

Complete.

Beginning:

या योगिभिर्योगसमाधिगम्या नागं हरन्ती विदुषां हृदिस्था ।
शक्त्यादिरूपत्रयमादधाना सा भारती मे हृदिगा सदास्तु ॥

ध्यात्वा गुरुपदाम्भोजं स्मृत्वा तातपदद्वयम् ।
पूर्वयुक्त्यनुसारेण कुर्वेऽहं वृत्तिचन्द्रिकाम् ॥

तत्राज्ञातवृत्तिकस्य शाब्दबोधानुदयात् न हि गुड इत्युक्ते मधुरत्वस्य प्रकारतासंबन्धेनागम्यत्वात्तद्धर्मावच्छिन्नविषयकशाब्दत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं(नस्य) हेतुता वाच्या इत्यभियुक्तोक्त्या वृत्तिज्ञानस्य शाब्दबोधे कारणत्वं कल्प्यम् । सा च शक्ति-

लक्षणाव्यञ्जनान्यतर(म)संबन्ध इति केचित् । केचित्तु पदजन्यपदार्थोपस्थितिहेतुः पदस्य पदार्थेन सह संबन्धो वृत्तिः । सा च त्रिधा ।

End:

जहत्स्वार्थो अजहत्स्वार्थो चेति तन्मूलौ द्वौ ध्वनेः प्रभेदौ । तयोर्जहत्स्वार्थामूलो यथा—

कृतं त्वयोन्नतं कृत्यमार्जितं चामलं यशः ।
यावज्जीवं सखे तुभ्यं दास्यामो विपुलाशिषः ॥

इयं कस्यचिदपकारिणं प्रत्युक्तिः । त्वया कृतेऽप्यपकारे परमखेदहेतौ मधुरमेव यो भाषे न (प)रुषम्; तस्मिन्नेवज्ञातीयके पापमाचर, तव पापिष्ठत्वं कथं शक्यते वक्तुम्?

अपरामूलो यथा—

बधान प्रागेव द्रढिमरमणीयं परिकरं
किरीटे बालेन्दुं नियमय पुनः पन्नगगणैः ।
न कुर्यास्त्वं हेलामितरजनसाधारणतया
जगन्नाथस्यायं सुरधुनिसमुद्धारसमयः ॥

अत्र जगन्नाथस्येत्यनेन शक्य एवानेकविशिष्टत्वेन लक्ष्यते पापानां पदान्तरेणानिर्वाच्यत्वं व्यङ्ग्यमिति वोद्धव्यमिति सर्वं शिवम् ॥

Colophon:

इति श्रीगौडज्ञातीयमहामहोपाध्यायपरमानन्दशिष्यरामबलात्मजघासीरामकृतवृत्तिचन्द्रिकायां लक्षणावृत्तिनिरूपणं सम्पूर्णतामगमत् ॥

No. **4289.** व्याप्तिक्रोडपत्रम्.

VYĀPTĪKRŌḌAPATRAM.

Pages, 24. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 4236.

This is a short pamphlet on the universality of the association of the middle term with the major.

Incomplete.

Beginning :

(अ)धिकरणतानिरूपिता यथाधेयता, तथाधेयताधिकरणनिरूपितापि भवति । अत एव हेतुतावच्छेदकसम्बन्धावच्छिन्नहेतुतावच्छेदकावच्छि॰ न्नाधिकरणतानिरूपिताधे(य)त्वीयरूपसम्बन्धेन साध्याभावाधिकरणनिरूपित- वृत्तित्वाभाववत्त्वं निवेश्य सत्तावान् जातेरित्यादावव्याप्तिवारणं कृतं मथुरा॰ नाथभट्टाचार्येण । एवञ्च वह्निमान् धूमादित्यादौ वह्न्यभावस्याधिकरणं धूमाधिकरणतापि भवति । तन्निरूपितवृत्तित्वमेव धूमे वर्तत इति वह्नि- मान् धूमादित्यादावव्याप्तिरिति चेन्न ।

End :

तथा च घटाभावान्यो घटाभावान्यत्वाभावीयप्रतियोगित्वावच्छिन्ना- भाववानिति बुद्ध्यनुदयेन घटाभावान्यत्वाभावीयप्रतियोगित्वावच्छिन्नाभाव- त्वस्य घटाभावान्यत्वरूपसाध्यवद्वृत्तितानवच्छेदकत्वेन साध्यवद्वृत्तिताव- च्छेदकीभूतानुयोगितानिरूपितप्रतियोगितान.

No. **4290.** व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Substance, paper. Size, $11\frac{5}{8} \times 4\frac{3}{4}$ inches. Pages, 170. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

An explanatory treatise on the meaning of the case-endings and other suffixes : by Gadādhara.

Beginning :

शाब्दबोधे चैकपदार्थे अपरपदार्थस्य संसर्गस्संसर्गमर्यादया भासते । स च क्वचिदभेदः, क्वचिच्च तदतिरिक्त एव आधाराधेयप्रतियोग्यनुयो- गिविषयविषयीभावादिः । अभेदश्च प्रातिपदकार्थे स्वसमानविभक्ति- केन स्वाव्यवहितपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भा-

सते । यथा—घटः नीलः, नीलघटमानयेत्यादौ घटादौ नीलादेः; न तु विरुद्धविभक्तिमत्पदादेः नीलस्य घट इत्यादौ ।

End:

सुखाद्यसाधनत्वस्य विध्यर्थताविरहेण प्रमेयत्वादेस्सुखत्वादिसाधारण्यं नोक्तरूपस्येत्यस्यैव विनिगमकत्वात् । न च तात्पर्याभावात् सुखाद्यसाधनत्वाबाधकत्वोपपत्तौ विध्यर्थत्वेऽपि क्षतिविरह इति वाच्यम्; तस्य विध्यर्थत्वे तत्तात्पर्येणाधुनिकानां न भुञ्जीतेत्यादिप्रयोगापत्तेः ॥

Colophon:

इति श्रीगदाधरभट्टाचार्यविरचितः व्युत्पत्तिवादस्समाप्तः॥

No. 4291. व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 301. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

By Gadādhara.

Complete.

Same work as the above.

No. 4292. व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Pages, 153. Lines, 10 on a page.

Begins on fol. 135*a* of the MS. described under No. 4090.

Breaks off in Tṛtīyāvibhaktivicāra.

By Gadādhara.

Same work as the above.

No. 4293. व्युत्पत्तिवादः.
VYUTPATTIVĀDAḤ.

Pages, 126. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4250.

Upto the Tṛtīyāvibhakti.

By Gadādhara.

Same work as the above.

No. 4294. व्युत्पत्तिवादः.
VYUTPATTIVĀDAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Wants beginning and end.

Same work as the above.

No. 4295. व्युत्पत्तिवादः.
VYUTPATTIVĀDAḤ.

Substance, palm-leaf. Size, $18\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 47. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Śaktivāda 25*a*, Śaktivādavyākhyā 58*a*.

Incomplete.

Same work as the above.

No. 4296. व्युत्पत्तिवादः.
VYUTPATTIVĀDAḤ.

Substance, palm-leaf Size, $14 \times 1\frac{1}{4}$ inches. Pages, 133. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

No. 4297. व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Pages, 14. Lines, 10 on a page.

Begins on fol. 84*a* of the MS. described under No. 4006.

Incomplete.

Contains a portion of Jagadīśīya in the end.

Same work as the above.

No. 4298. व्युत्पत्तिवादः.

VYUTPATTIVĀDAḤ.

Substance, palm-leaf. Size, 17½ × 1⅜ inches. Pages, 220. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in Vidhivāda.

Same work as the above.

No. 4299. व्युत्पत्तिवादक्रोडपत्रम्.

VYUTPATTIVĀDAKRŌḌAPATRAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 46. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

A controversial pamphlet on the Vyutpattivāda of Gadādhara. Author unknown.

Beginning :

ननु शाब्दे पदानुपस्थितस्य विषयतावारणाय स्वीकृतस्य विषयतया शाब्दे तया वृत्त्यधीनपदजन्योपस्थितेः कारणत्वस्य संसर्गे व्यभिचारः ; संसर्गता न विषयता ; संसर्गतान्यविषयतासम्बन्धस्य कार्यतावच्छेदकत्वेऽपि स एव दोषः ; संसर्गस्यापि प्रकारतया विशेष्यतया वा शाब्देऽभानादित्याशङ्कां निरासितुमाह—शाब्देति । एकपदार्थानुयोगिकः तत्पदा-

सत्तिमदपरपदार्थप्रतियोगिकः संसर्गः शाब्दनिरूपितसांसर्गिकविषयत्वाभि-न्नविषयतावानेवेत्यर्थः ।

End:

शुक्लवह्न्याद्याविति । ज्ञायमानवह्न्याद्यावित्यर्थः । तथाच तादृश-वह्निविषयतायां न रक्तत्वप्रकारकत्वविशिष्टज्ञाननिरूपितत्वमिति भावः । साक्षात् विभक्त्यर्थमद्वारीकृत्य । तथा च [यथा] नीलत्वादिरूप(स्य)धात्वर्थे साक्षात् भेदेनान्वयः परि(र्य)वसितार्थः । कचिद्वानमिति । अहं सुखी स्यामितीच्छायामित्यर्थः.

No. 4300. व्युत्पत्तिवादव्याख्या–रामरुद्रभट्टीया.

VYUTPATTIVĀDAVYĀKHYĀ : RĀMARUDRA-BHAṬṬĪYĀ.

Substance, palm-leaf. Size, 18⅜ × 1⅜ inches. Pages, 80. Lines, 8 on a page. Character, Grantha. Condition, pretty good. Appearance, new.

A commentary on the Vyutpattivāda of Gadādhara: by Rāmarudrabhaṭṭa.

Incomplete.

Beginning:

शाब्दबोधे चेति । चोऽवधारणार्थः । स च संसर्गमर्यादयेत्यन-न्तरं योजनीयः । संसर्गमर्यादा च संसर्गतैव; सांसर्गिकविषयतेति या-वत् । प्रकृत्या सुन्दर इत्यादाविवाभेदार्थिका तृतीया । अभेदस्य च भासधात्वर्थे विषयत्वेऽन्वयः । शाब्दबोध इति। सप्तम्या निरूपितत्वमर्थः । तस्यापि तत्रैवान्वयः । एकपदार्थ इत्यत्र सप्तम्या अनुयोगित्वमर्थः । अपरपदार्थस्येति षष्ठ्याः प्रतियोगित्वमर्थः । तयोस्संसर्ग एवान्वयः ।

End:

तथा च नीलरूपविशिष्टस्य नीलपदार्थस्य भवत्यर्थे असाधारण-धर्मे आधेयतासंबन्धेन यथा(योग्यम)न्वय इति पर्यवसितार्थः । स च धर्मो नीलत्वादिकमेवेति भावः । क्वचिद्भानमिति । अहं सुखी स्यामितीच्छायामित्यर्थः.

No. 4301. व्युत्पत्तिवादव्याख्या.
VYUTPATTIVĀDAVYĀKHYĀ.

Pages, 51. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4247.

Wants beginning and end.

Author unknown.

Similar to the above.

Beginning:

द्वितीयोपस्थाप्योद्देश्यत्वनिष्ठप्रकारतानिरूपितविशेष्यतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तृतीयान्तपदसमभिव्याहृतानुमित्यर्थकधातुपदनिरूपितवृत्तिज्ञानजन्योपस्थितेर्विशेष्य[ष्य]तासम्बन्धेन हेतुत्वमित्युक्तम् ।

End:

वस्तुतस्तु पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयत्वादिकमेव पञ्चम्यर्थ इति नानुपपत्तिः । शक्त्यानन्त्यस्य समभिव्याहारविशेषस्य नियामकतयानतिप्रसङ्गस्य च पर्वतादिविशेष्यतानिरूपितविधेयतामात्रस्य पञ्चम्यर्थत्ववादिनां मतेऽपि तुल्यत्वादिति ध्येयम्.

No. 4302. शक्तिवादः.
ŚAKTIVĀDAḤ.

Pages, 68. Lines, 9 on a page.

Begins on fol. 25*a* of the MS. described under No. 4295.

A work on the power of words to convey meanings.

By Gadādharabhaṭṭācārya.

Complete.

Beginning:

सङ्केतो लक्षणा चार्थे पदवृत्तिः । वृत्त्या पदप्रतिपाद्य एवार्थ इत्य· भिधीयते । इदं पदमिममर्थं बोधयत्विति, अस्माच्छब्दादयमर्थो बोद्धव्य इति वा इच्छा सङ्केतरूपा वृत्तिः । तत्राधुनिकसङ्केतः परिभाषा; तया चार्थबोधकं पदं पारिभाषिकम् । यथा—शास्त्रकारादिसङ्केतितनदीवृद्ध्या- दिपदम् । ईश्वरसङ्केतश्शक्तिः; तयार्थबोधकं पदं वाचकम् । यथा— गोत्वादिविशिष्टबोधकं गवादिपदम् ।

End:

तथा च गवादिपदस्य समवायेन गोत्वादिप्रकारकज्ञान एव शक्ते- रुपगमात्ततो नाभ्रान्तानां संबन्धान्तरेण तत्प्रकारकधीः । तत्संबन्धेन तत्प्रकारकज्ञाने शक्तिग्रहस्यैतादृशशाब्दबोधहेतुत्वमिति बाच्यानन्तर्भावस्य समवायसाधारण्येन संबन्धान्तरभानप्रयोजनत्वासंभवादिति कृतं पल्लवि- तेन ॥

Colophon:

इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचितः शक्ति- विचारः ॥

No. **4303.** शक्तिवादव्याख्या.

ŚAKTIVĀDAVYĀKHYĀ.

Pages, 41. Lines, 9 on a page.

Begins on fol. 58*a* of the MS. described under No. 4295.

A commentary on the Śaktivāda of Gadādhara: by Jayarāma-śiṣya.

Incomplete.

Beginning:

नाभीसरोरुहोच्चैर्वदनसरोजासनोपरि स्थित्वा ।
भुवनमपूर्वमिव या प्रदर्शयति सा(स)रस्वती जयति ॥
शक्तिर्न शक्तिवादव्याख्यायामुत्कटासक्तौ ।
शरणं जयरामगुरोश्चरणस्मरणस्य सन्निधीकरणम् ॥

शाब्दबोधकारणीभूतपदार्थोपस्थितिनिदानोद्बुद्धसंस्कारविषयवृत्तिनिरूपणमारभते—सङ्केत इत्यादिना । सङ्केत इति सङ्केतसामान्यमित्यर्थः ।

End:

यादृशरूपाभ्यां कम्बुग्रीवात्वाद्यवच्छिन्नकम्बुग्रीवादिमत्त्वजातित्वावच्छिन्नभूतलत्वाभ्यां धर्मिणोर्घटभूतलयोस्तादृशैकधर्मप्रकारकज्ञानात् कम्बुग्रीवात्वाद्यवच्छिन्नकम्बुग्रीवादिमत्त्वादिप्रकारकज्ञानात् न त्वन्यरूपावच्छिन्नकम्बुग्रीवादिप्रकारकज्ञानादित्येवकारव्यवच्छेद्यम् । एवमन्यत्रापि बोध्यम् । तादृशापरधर्मप्रकारेणैव जातित्वावच्छिन्नभूतलत्वेनैव । इत्यपीति । अनुभव इति । प्राक्तनमत्रानुषज्यते.

No. **4304.** शक्तिवादार्थदीपिका.

ŚAKTIVĀDĀRTHADĪPIKĀ.

Pages, 109. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 1491.

A commentary on the Śaktivāda of Gadādhara: by **Kṛṣṇabhaṭṭa**, son of Śrī Raṅganātha and brother of Nārāyaṇa.

The transcription was completed at 12–30 A.M. on Monday the 31st of Āvaṇī, a new-moon day in the year Paritāpi.

Complete.

Beginning:

श्रीकृष्णचरणौ नत्वा शक्तिवादार्थदीपिकाम् ।
करोति संप्रदायेन कृष्णभट्टो मुदे सताम् ॥

सङ्केतोऽभिधारूपवृत्तिग्राहक इति मीमांसकमतम्; लक्षणा च शक्तिविशेष इति वैयाकरणमतम्; तदुभयं कटाक्षयन्नाह—सङ्केत इति। अत्र तीरं गङ्गापद(दार्थ)संबन्धि, न गङ्गापदार्थ इति ज्ञानेऽपि गङ्गायां घोष इत्यादितः शाब्दबोधानुदयात् सङ्केतमात्रेण ना(नोप)पत्तिरतो लक्षणा अतिरिक्तवृत्तिः स्वीकार्येत्याशयवानाह—लक्षणा चेति। अर्थे इति पदव्यावृत्त्यर्थम्। एवं च गौणीव्यञ्जनयोः पृथग्वृत्तित्वमयुक्तम्; तयोर्लक्षणायामन्तर्भावसम्भवादिति बोध्यम्।

End:

पशुपदं लोमत्वशक्तमित्याकारकतया लोममुख्य[विशेष्य]विशेष्यकशाब्दबोधे बाधकाभावादिति ॥

Colophon:

इति श्रीरङ्गनाथसूरिसू नु[ना]नारायणा[नुजा]नुजकृष्णभट्टविरचितं शक्तिवादविवरणं सम्पूर्णम् ॥

श्रीकृष्णचरणौ नत्वा शक्तिवादार्थ उद्धृतः।
कृष्णभट्टेन तेनात्र प्रीयतां गिरिजापतिः॥

No. 4305. शतकोटिः.

ŚATAKŌṬIḤ.

Pages, 26. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4261.

This is a work which contains one hundred different objections relating to the significance of the expression Viśiṣṭāntarāghaṭitatva occurring in the Satpratipakṣalakṣaṇa as found in the Tattvacintāmaṇidīdhitiprakāśikā of Gadādhara: by Mysore Rāmaśāstrin.

Breaks off in the 83rd Kōṭi.

Beginning:

पक्षतावच्छेदकविशिष्टपक्षविषयकत्वाव्यापकसाध्यतावच्छेदकविशिष्ट-साध्यविषयकत्वाव्यापकपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यता-वच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकयद्धर्मावच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकतावच्छेदिका सती तद्धर्मावच्छिन्नप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकविषयित्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकता-वच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वमित्यस्यानुगमः क्रि-यते—

प्रतिबध्यताविशिष्टधर्मवत्त्वमिति ।

* * * *

अथ ह्रदो वह्निमानित्यादौ वह्न्यभाववह्न्यभावव्याप्यव्याप्य उभ-यवद्ध्रदेऽतिव्याप्तिः; तद्विषयतायां निरुक्तप्रतिबन्धकत्वजनकतावच्छेदक-त्वउभयसत्त्वात् ।

End:

न च जनकतामात्रघटिततादृशत्वस्य विशिष्टान्तरे निवेशे पूर्वोक्त-सत्प्रतिपक्षघटितसत्प्रतिपक्षे हेतुतावच्छेदकसम्बन्धावच्छिन्नत्ववृत्तित्वत्वाघटि-तांशमादायोक्तरीत्याऽव्याप्तिवारणाय संपूर्णसत्प्रतिपक्षलक्षणाक्रान्तत्वरूपता-दृशत्वस्य निवेशनीयतया अतिव्याप्तिर्दुर्वारैव । न च संपूर्णसत्प्रतिपक्ष-लक्षणाक्रान्तत्वनिवेशेऽपि सत्प्रतिपक्षघटितसत्प्रतिपक्षाव्याप्तिर्द(र्दुर्वारा).

No. **4306.** शतकोटिखण्डनम्.

ŚATAKŌṬIKHAṆḌANAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 115. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

A dissertation by Mysore Anantāḻvān criticising unfavourably the Śatakōṭi of Mysore Rāmaśāstrin.

Complete.

Beginning:

यस्य श्रीनखकान्तिनाकसरितश्चूडायतेऽङ्घ्रिद्वयं
सेवानम्रसुरेन्द्रवज्रमकुटीमाला मरालायते ।
पश्यन्निर्जरयोषिदम्बकततिर्मीनप्रपञ्चायते
क्षोणीशाञ्जलयः पयोजमुकुलन्त्यव्यात्स नारायणः ॥

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्नप्रकारताशाल्यनुमितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका सती पक्षतावच्छेदकविशिष्ट(पक्ष)ग्रहत्वाव्यापकसाध्यतावच्छेदकविशिष्ट(साध्य)ग्रहत्वाव्यापकपक्षसाध्यवैशिष्टचग्रहत्वव्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यादृशविशिष्टविषयता तादृशविशिष्टत्वं सत्प्रतिपक्षत्वमित्युक्तम् ।

एवञ्च वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्भ्रदेऽतिव्याप्तिरवतरत्येव ; उक्तान्यतरसम्बन्धेनप्रतिबन्धकत्वजनकत्वयोरुक्तोभयवद्भ्रदत्वावच्छिन्नविषयताव्यापकत्वात् । अत्र केचित्—विशिष्टान्तराघटितत्वविशेषणेनोभयवद्भ्रदवारणसंभवः । यत्तु विशिष्टान्तराघटितत्वं यदि स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकयद्रूपावच्छिन्नमनुमितिप्रतिबन्धकतानातिरिक्तवृत्ति तद्रूपावच्छिन्नाघटितत्वरूपं, तदा निरुक्तोभयवद्भ्रदवारणसम्भवेऽपि बाधघटितसत्प्रतिपक्षेऽव्याप्तिवारणाय प्रकृतानुमितिप्रतिबन्धकताननतिरिक्तवृत्तित्ववज्जनकताननतिरिक्तवृत्तित्वस्यापि निवेशनीयतया उक्तातिप्रसङ्गो दुर्वारः ।

End:

तथा च स्वविशिष्टरूपावच्छिन्नाविषयत्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकतावच्छेदिका यद्रूपावच्छिन्नविषयता तद्रूपावच्छिन्नत्वमिति लक्षणघटकदलद्वयपर्यन्तार्थः । रूपे स्ववैशिष्टयम्—स्वसमानाधिकरणेत्यादि-

संबन्धेन । स्वाधिकरणता—स्वनिष्ठावच्छेदकताकप्रतियोगिताकभेदविशिष्ट-पक्षसाध्यवैशिष्ट्यावगाहित्वाभावव्याप्याभावाधिकरणतात्वसम्बन्धेन

* * * *

स्वाधिकरणता—स्वावच्छिन्नविषयकानिश्चयाव्यवहितोत्तरानुमितित्वसं-बन्धेन । भेदप्रतियोगितावच्छेदकता विषयताप्रयुक्तत्वविशिष्टस्वरूपसंबन्धे-नेति ।

No. 4307. शतकोटिखण्डनम्.

ŚATAKŌṬIKHAṆḌANAM.

Substance, palm-leaf. Size, 16¾ × 1½ inches. Pages, 40. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

By Tirupputkuḻi Śrīkṛṣṇatatācārya.

Similar to the above.

Beginning:

शतकोट्युदितो योऽसौ निष्कर्षोऽन्यैरदूषितो विबुधैः ।
तत्र दुरुद्धरदोषं ब्रूते श्रीकृष्णतातयाचार्यः ॥

विशिष्टपक्षग्रहत्वाव्यापकविशिष्टसाध्यग्रहत्वाव्यापकपक्षसाध्यवैशिष्ट्यग्र-हत्वव्यापकतद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकविषय-त्वावच्छिन्नानुमितिनिष्ठजन्यतानिरूपितजनकत्व उभयं यद्रूपावच्छिन्ननिरू-पकताकविषयताव्यापकं तद्रूपावच्छिन्नत्वं सत्प्रतिपक्षत्वम्.

* * * *

अपितु तदन्यतरमात्रघटितमिति स्थिते किं प्रतिबन्धकताघटितम् अथवा जनकताघटितमिति विप्रतिपत्तौ प्रतिबन्धकताघटितमेवादरणीयम्;

न तु जनकताघटितं, जनकताघटितस्य तस्योपादाने वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ध्रदे अतिव्याप्तिप्रसङ्गस्य दुर्वारत्वात् ।

End:

अतो जनकतायामेव विशिष्टान्तरविषयत्वाव्यापकत्वस्य निवेश्यतया प्रतिबन्धकतायां तद्विशेषणनिवेशनं शतकोट्युक्तमयुक्तमेवेति दिक् ॥

No. **4308.** शतकोटिखण्डनमुण्डनम्.

ŚATAKŌṬIKHAṆḌANAMUṆḌANAM.

Pages, 76. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4260.

This is a refutation of the views contained in the **Śatakōṭi-khaṇḍana**, and supports the position of the Śatakōṭi.

By Śōkattūr Vijayarāghavācārya.

Beginning:

रघुवीरपदाम्भोजयुगलध्यानधारया ।
साधये वाञ्छितानर्थान् यद्गणोऽस्त्यभवच्छिला ॥

ग्रन्थेऽस्मिन् शतकोटिनामनि गुरूत्तंसैः कृते दोषदृक्
कश्चिद्येन निरस्ततामुपगतस्सद्यु(क्ति)भिस्सोऽधुना ।
अन्यं कञ्चन तत्र दोषघटनायासाहृतं वीक्ष्य त-
द्भङ्गार्थे विजयादिराघवपदाख्येयः प्रवृत्तः पुनः ॥

शतकोटिविदलनेच्छा पुण्यजनानां हि निष्फलाप्युचिता ।
उन्मूलनन्तथैषां लीलातो विजयराघवार्यस्य ॥

शिष्याणां वाथ वान्येषां कथौत्सुक्यवतां कृते ।
काचिद्विचित्ररचना विजयेन विरच्यते ॥

सत्प्रतिपक्षलक्षणे वह्न्यभाववह्न्यभावव्याप्यव्याप्योभयवद्ध्रदेऽति-व्याप्तेरावश्यकेन विशिष्टान्तराघटितत्वेनैव वारणं . . . . . निवेशनीयामाति न कश्चिद्दोष इति शतकोटिमध्ये गुरुचरणाः । अत्रा-

न्यः — एवं सति प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्ष-रूपसत्प्रतिपक्षाव्याप्तिः ; प्रतिहेतुव्यापकसाध्याभाववन्निरूपितवत्प्रतिहेतुमत्पक्षरूपाविशिष्टान्तरघटितत्वात्

* * * *

अत्रेदं चिन्त्यते—यत्तु एकरूपेण जनकतामभ्युपेत्य तत्र प्रतिबन्धकताव्याप्यत्वनिवेशेन जनकतायां विशिष्टान्तराघटितत्वनिवेशेऽपि न वह्न्यभावव्याप्यव्याप्यवह्न्यभाववद्ध्रदादावतिव्याप्तिरिति ।

End:

पूर्वोक्ताव्याप्तेश्च सम्भवन्तीत्यतः शतकोटिकृदुक्तमार्ग एव शरणीकरणीय इत्यलमसदावेशेन ॥

एतावच्छतकोटिदूषणपरास्तानञ्जसा खण्डय-
त्यम्भोजासनमुख्यदेवनिकरप्रस्तूयमानो हरिः ।
सत्यं ह्येतदसावुपेत्य हृदयं श्रीराघवो मेऽधुना
तद्विध्वंसनमारचय्य विबुधैस्साकं स्वयं मोदते ॥

No. 4309. शब्दखण्डसारमञ्जरी.
ŚABDAKHAṆḌASĀRAMAÑJARĪ.

Pages, 30. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4237.

Kārakavivēcana complete.

Contains a clear exposition of the various relations in a sentence that are given expression to by various declensional cases. It is perhaps a part of a larger collection dealing with the power and function of words.

By Bhavānanda-Vāgīśa.

Beginning:

नत्वा कृष्णपदद्वन्द्वं कारकार्थविनिर्णयः ।
श्रीभवानन्दसिद्धान्तवागीशेन वितन्यते ॥

तत्र क्रियानिमित्तं कारकमिति तु न सामान्यलक्षणम्; संप्रदानादेः अनुमितिप्रकाशनद्वारेव तण्डुलादिप्रदानद्वारा सम्बन्धिनोऽपि पाकादि-क्रियानिमित्तत्वेन चैत्रस्य तण्डुलं पचतीत्यादौ चैत्रादावतिव्याप्तेः; किन्तु विभक्त्यर्थद्वारा क्रियान्वयित्वं मुख्यभाक्तसाधारणं कारकत्वम्। क्रियानिमित्तत्वसहितं मुख्यमिति ।

End:

यस्य धर्मेण धर्मान्तरं निरुक्तस्वसामानाधिकरण्यं प्रतिपाद्यते, तत्र सप्तमीति सूत्रार्थः ॥ . . . . याजन . . . स्वक्रियान्तरं लक्ष्यत इति व्याख्यानन्तु शाब्द-(ब्दि)काभिप्रायकम् ॥

Colophon:

इति शब्दखण्डसारमञ्जर्यां भवानन्दवागीशविरचितं कारकाविवेचनं समाप्तम् ॥

No. 4310. शितिकण्ठीयटिप्पणी.

ŚITIKAṆṬHĪYAṬIPPAṆĪ.

Pages, 25. Lines, 10 on a page.

Begins on fol. 27*a* of the MS. described under No. 4247.

Wants beginning and end.

A gloss on Śrīkaṇṭha's Tarkaprakāśa (a commentary on the Nyāyasiddhāntamañjarī of Jānakīnātha).

Author unknown.

Beginning:

तच्च ज्ञातमिति । तच्च तात्पर्यं चेत्यर्थः । व्याप्तिवदिति । व्याप्तिर्हि ज्ञायमानकरणस्य परामृश्यमानलिङ्गस्य सहकारिणी; शक्तिस्तु ज्ञाय-मानपदस्य सहकारिणी । स्वात्मककूटालिङ्गकेत्यादि ।

End:

मुक्तोद्देशेन श्राद्धाकरणे इष्टापत्ति(रे)व । मुक्तत्वसं(श)यात्तु इदानीं तदुद्देशेन दानादिकमनुष्ठीयन इति ध्येयम् । आत्मविशेषगुणानां द्वितीयक्षणे अयोग्यत्वकल्पनादिति ॥

No. 4311. सत्प्रतिपक्षक्रोडपत्रम्.

ŚATPRATIPAKṢAKRŌḌAPATRAM.

Pages, 34. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 4043.

Incomplete.

A critical pamphlet on the Satpratipakṣalakṣaṇa of Gadādhara.

Beginning:

नमामि परमात्मानं जानकीप्राणवल्लभम् ।
निवृत्तये समस्तानां प्रत्यूहव्यूहरक्षसाम् ॥

प्रकृतपक्षतावच्छेदकविशिष्टे साध्यतावच्छेदकवैशिष्ट्यावगाहिग्रहाविरोधित्वे सति विशिष्टपक्षग्रहाविरोधिविशिष्टसाध्यग्रहाविरोधिपक्षसाध्यवैशिष्ट्यग्रहविरोध्युन्नायकत्वं सत्प्रतिपक्षत्वम् । प्रतिदलव्यावृत्तिस्स्पष्टैव । अथात्र वह्न्यभाववद्वह्न्यभावव्याप्यव्याप्यवत्कालीनो ह्रदो वह्निमान् धूमादित्यत्र वह्न्यभावव्याप्य(व्याप्य)वत्तादृशह्रदात्मकसत्प्रतिपक्षोन्नायकेऽतिव्याप्तिरहारा(र्या) ।

End:

विशिष्टान्तरविषयतानिष्ठप्रयोजकतायां प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणहेतुविषयिताविशिष्टान्यविषयितानिष्ठत्वम् । प्रतिहेतुव्यापकसाध्याभावनिश्चयविशिष्टप्रयोजकतानिरूपितत्वप्रयोज्यतानिरूपितत्वोभयाभाववत्त्वमिति न पूर्वोक्तातिव्याप्तिः । ह्रदो वह्न्यभावव्याप्यव्याप्यवह्न्यभाववजल.

No. 4312. सत्प्रतिपक्षक्रोडपत्रम्.

ŚATPRATIPAKṢAKRŌḌAPATRAM.

Substance, palm-leaf. Size, $12\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 20. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 6*a*. The other work herein is Savyabhicāra-sāmānyaniruktipatra 1*a*.

Wants beginning and end.

Incomplete.

Same work as the above.

No. 4313. समानबलविचारः.

SAMĀNABALAVICĀRAḤ.

Pages, 26. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 4261.

By Śōkatūr Vijayaraghava.

A discussion relating to the equality or inequality in value of the two possible but contrary inferences in a deductive process characterised by the fallacy of Satpratipakṣa.

Incomplete.

Beginning:

अप्रामाण्यज्ञानानास्कन्दितस्यैव परामर्शस्यानुमितिजनकतामते विरोधिपरामर्शप्रतिरुद्धकार्यकत्वनिवेशमन्तरेणैव गृहीताप्रामाण्यकविरोधिपरामर्शकालीनप्रकृतपरामर्शकाले सत्प्रतिपक्षव्यवहारापत्तेः ।

End:

एवं प्रतियोगितात्वसामानाधिकरण्येनाभावनिरूपितत्वसाधने तदवच्छेदेनाभावनिरूपितत्वाभावस्य बाधतया प्रकृतविरोधिपरामर्शयोस्सतोस्सत्प्रतिपक्षव्यवहारानुपपत्तेश्चैवं परिष्कारासंभवात् । एतेनाधेयतासंबन्धे स्वाधिकरणत्वं स्वविशिष्टनिश्चयत्वसम्बन्धेनैवा.

No. 4314. समासवादार्थः.

SAMĀSAVĀDĀRTHAḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 101*a* of the MS. described under No. 4073.

Incomplete.

A discussion bearing upon the power and function of the component elements making up the various kinds of compound words in Sanskrit.

Beginning :

उपकुम्भमित्यत्र पूर्वपदार्थप्रधानस्समासः । उपपदार्थस्य समीपस्यैव विशेष्यतया बोधात् । ननु उपशब्दस्य कथं समीपवाचकत्वम्? उपशब्दस्य प्रादिमध्ये पठितत्वेन उपसर्गत्वात् उपसर्गाणां च वाचकताया नैयायिकसिद्धान्तविरुद्धत्वात् ।

End :

अत्र प्रथमतत्कालीनत्वतत्पुरुषीयत्वविशेषणानुपादाने गामानयेति वाक्याद्यत्र गवानयनान्वयबोधो जातः तत्र वाक्येऽव्याप्तिः, तस्मिन् वाक्ये जननीये तद्वाक्यार्थज्ञानसमानाकारकप्रयोक्तृपुरुषीयज्ञानेन स्वोत्तरोत्पन्न.

No. 4315. सव्यभिचारसामान्यनिरुक्तिपत्रम्.

SAVYABHICĀRASĀMĀNYANIRUKTIPATRAM.

Pages, 28. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 4312

A critical pamphlet on the Savyabhicārasāmānyanirukti of Gadādhara.

Incomplete.

Beginning :

साध्यसन्देहेत्यादियथाश्रुतमूलतः पक्षधर्मताज्ञाने साध्यसन्देहजनकत्वं कोटिद्वयोपस्थापकत्वञ्च लभ्यते ; एवं सति अयं नित्यो ज्ञानादित्यादौ ज्ञानरूपसद्धेतावतिव्याप्तिः ; नित्यत्वतदभावविषयकज्ञानवानयं नित्यो न वेति संशयं प्रति धर्मितावच्छेदकविधया कारणीभूतं यन्नित्यत्वतदभावविषयकज्ञानप्रकारकं ज्ञानम् ।

End:

एतदुभयावच्छिन्नपर्याप्ततया तादृशोभयधर्मावच्छिन्नविशेष्यकनित्यत्व-तदभावप्रकारकज्ञानप्रकारकज्ञानत्वेन तादृशसंशयं प्रति हेतुत्वात्तज्ज्ञानेऽ-तिप्रसङ्ग इति परास्तम् । तादृशसंशयस्यापि ज्ञानत्वावच्छिन्नावच्छेदकताक-विशेष्यतानिरूपकत्वेन लक्षणघटकतया तादृशसंशयमादाय ज्ञानेऽति-व्याप्तिविरहात्.

No. **4316.** सव्यभिचारसामान्यनिरुक्तिटिप्पणम्.

SAVYABHICĀRASĀMĀNYANIRUKTIṬIPPAṆAM.

Pages, 20. Lines, 7 on a page

Begins on fol. 85*a* of the MS. described under No. 4010.

Wants beginning and end.

A gloss on the Savyabhicārasāmānyanirukti of Gadādhara.

Beginning:

साध्यसन्देहजनकत्वं कोटिद्वयोपस्थितिजनकत्वञ्च लभ्यते । तत्र च नित्यत्वादिसाध्य(क)ज्ञानादिहेतौ वक्ष्यमाणातिव्याप्तिर्वारयितुमशक्यैव; नित्य-त्वतदभावविषयकज्ञानवानयमिति ज्ञानस्य नित्यत्वतदभावोपस्थापकत्वा-द्धर्मितावच्छेदकप्रकारकज्ञानमुद्रया तादृशज्ञानवदिदन्त्वावच्छिन्नधर्मिक-नित्यत्वसंशयहेतुत्वाच्च ।

End:

बाधादिवारणाय विवक्षणीयस्य पक्षे साध्यवैशिष्ट्यग्रहाविरोधित्वस्य लाभाय पक्षपदं व्याचष्टे—पक्ष इति । सन्दिग्धसाध्यः सन्दिग्धसाध्यविशिष्टो धर्मी पक्ष.

No. 4317. सहचारवादः.
SAHACĀRAVĀDAḤ.

Substance, palm-leaf. Size, $19\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 130. Lines, 9 on a page. Character, Telugu. Condition, very much injured. Appearance, old.

A discussion on Sahacāra, or the invariable association of the Hētu (middle term) with the Sādhya (major term).

The first three leaves are wanting.

Beginning:

ननु द्व्यणुकत्वावच्छिन्नानधिकरणकालवृत्तित्वविशिष्टस्यैव द्व्यणुकद्रव्यस्य प्रतियोगितावच्छेदकं द्व्यणुकत्वम्; अवच्छेदकत्वञ्चेहा[न्यू]न(तिरिक्त)-वृत्तित्वमेवेत्यत आह—न हीति । तयोर्ध्वंसप्रागभावयोः । मतेऽपीति । वस्तुतो ध्वंसप्रागभावयोरत्यन्ताभावाविरोधित्वादत्यन्ताभावस्यैव सामान्याव-च्छिन्नप्रतियोगिताकत्वमिति भावः ।

End:

सर्वस्य सामान्यलक्षणया घटत्वप्रकारकज्ञानसम्भवेन घटत्वांशे अन्या-प्रकारकतादृशज्ञानसम्भवात् नात्मत्वे तादृशघटत्वप्रकारकज्ञानवत्त्वव्याप्यत्व-ज्ञानम्; अविशेषदर्शनाभावात्तादृशज्ञानसंशयो नानुपपन्न इति सिद्धान्त-तात्पर्यमिति वयं ब्रूमः ॥

Colophon:

सहचारवादस्समाप्तः ॥

No. 4318. साङ्कर्यस्य जातिबाधकत्वखण्डनम्.
SĀṄKARYASYA JĀTIBĀDHAKATVAKHAṆḌANAM.

Pages, 35. Lines, 6 on a page.

Begins on fol. 53*a* of the MS. described under No. 3916.

By Śiṅgarācārya, son of Jagannātha of Kāśyapagōtra.

Complete.

A criticism of the position that the mixing up of things of different genera unfavourably affects their generic classification.

Beginning:

लक्ष्मीकान्तं हयग्रीवं नत्वा कारुण्यसागरम् ।
जात्यबाधकतां जातेः सङ्करस्य प्रचक्ष्महे ॥
गृह्णात्येव बुधस्तोषान्मयापि रचितां कृतिम् ।
युक्तियुक्तं वचो ग्राह्यं बालादपि हि भाषितम् ॥

यदुक्तं जातिसङ्ग्रहकारेण सङ्करो जातित्वबाधक इति ; तदयुक्तम् ; तस्यैव दुर्निरूपत्वात्, निरूपणे वा बाधकत्वाच्च । तथाहि—किं परस्परात्यन्ताभावसमानाधिकरणयोः सामानाधिकरण्यं सङ्करः? आहोस्वित् ।

End:

तस्माद्भूतत्वेन्द्रियत्वादिजातीनामेकत्वे लाघवाज्जातिसङ्करे चोपाधिसङ्करव्यावृत्तबाधकताबीजाभावाच्चासति बाधके परस्परात्यन्ताभावसमानाधिकरणधर्माणां तेषां लाघवाज्जातित्वमेवार्हं ततो भूतत्वेन्द्रियत्वादिकं जातिरेवेति राद्धान्तः ॥

Colophon:

इति काश्यपान्वयसञ्जातेन जगन्नाथाचार्यसूनुना अनर्घशिङ्गराचार्येण विरचितः सङ्करस्य जातित्वबाधकखण्डनरूपो वादार्थः सम्पूर्णः ॥

No. 4319. साधारणविचारः.

SĀDHĀRAṆAVICĀRAḤ

Pages, 20. Lines, 7 on a page.

Begins on fol. 41*a* of the MS. described under No. 4261.

Deals with one of the three divisions of the logical fallacy known as Savyabhicāra or Anaikāntika.

Beginning:

प्रणम्य परमात्मानं जानकीरमणं हरिम् ।
कलये कुतुकादेतत् साधारणविचारणम् ॥

यादृशज्ञानान्तरविशिष्टत्वेन यादृशविशिष्टविषयकनिश्चयस्य प्रकृतानुमितिप्रतिबन्धकता . . . .

नित्यानित्यदोषसाधारणं हेत्वाभाससामान्यलक्षणं मिश्रमतमभिप्रेत्य भट्टाचार्यैः परिष्कृतम् । अत्र उदासीनघटपटादावतिव्याप्तिवारणाय विशेष्यदलम् । एकदेशेऽतिव्याप्तिवारणाय तत्रैव सामान्यपदम् ।

End:

तस्य लक्ष्यत्वोपगमे मेयत्वविशिष्टासाधारण्या(णा)द्य(ति)व्याप्तिवारणाय विशिष्टान्तरविषयतासामान्यानवच्छिन्नत्वस्य प्रतिबन्धकतायां निवेशनीयतया उक्तबाधाव्याप्तिवारणे ईश्वरस्याप्यनीशत्वेन एतल्लक्षणकर्तृमते तादृशविशिष्टस्यालक्ष्यतामङ्गीकृत्य शुद्धगगनाभाववद्घटस्यैव दोषतायास्स्वीकर्तव्यत्वात्.

No. 4320. सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 41. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sāmānyaniruktiṭippaṇī (Nakṣatramālikā) 22*a*.

Wants beginning and end.

A critical dissertation on Sāmānyanirukti which forms a portion of the Tattvacintāmaṇidīdhitiprakāśikā of Gadādhara.

Beginning:

सम्बन्धेन । स्वनिष्ठावच्छेदकता च स्वावच्छेदकविषयतावत्त्वस्वावच्छेदकनिश्चयनिष्ठावच्छेदकतावत्त्वोभयसम्बन्धेन । प्रतिबन्धकताशून्यत्वमित्यत्र प्रतियोगित्वं निरुक्तोभयसम्बन्धावच्छिन्नं ग्राह्यमिति तन्न ।

End:

तथापि बाधनिश्चयप्रतिबन्धकताकल्पनस्य क्वचित्सम्भवात् । न च प्रतिबन्धकतानिरूपितनिरुक्तसंसर्गावच्छिन्नसाक्षादवच्छेदकताया निरुक्तप्रतिबध्यताविशिष्टान्यस्या एव भेदप्रतियोगितावच्छेदक.

No. 4321. सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Substance, paper. Size, 12⅝ × 4¾ inches. Pages, 109 Lines, 16 on a page Character, Telugu Condition, good. Appearance, old.

Similar to the above.

Author unknown.

Beginning :

अत्र प्रकृतपक्ष(कप्रकृत)साध्यकप्रकृतलिङ्गकानुमितिनिष्ठकार्यतानिरूपकग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं दोषत्वमिति कल्पे पर्वतो वह्निमान् ह्रदश्च तथा इति समूहालम्बनानुमितिमादाय पर्वतपक्षकवह्निसाध्यकधूमहेतुकानुमितिस्थले वह्न्यभावद्ध्रदा(दा)व[्व्यति]-व्याप्तिः ।

End :

प्रकृते च तेनैव विशेषणेन तादृशसमूहालम्बनानुमितिवारणसंभवे सामान्यपदं व्यर्थमिति पूर्वपक्षः । अव्यापकविषयिताशून्यत्वमस्तीत्यभिप्रायेण तत्पाठस्तु प्रामादिकः.

No. 4322. सामान्यनिरुक्तिटिप्पणी—नक्षत्रमालिका.

SĀMĀNYANIRUKTIṬIPPAṆĪ : NAKṢATRAMĀLIKĀ.

Pages, 59. Lines, 8 on a page.

Begins on fol. 22*a* of the MS. described under No. 4320.

Brief notes on the portion dealing with Sāmānyanirukti in the Tattvacintāmaṇidīdhitiprakāśikā of Gadādhara.

By Kuricci Raṅgācārya.

Incomplete.

Wants beginning and end.

Beginning :

स्वावच्छिन्नाविषयकेत्यादि । नन्वत्र विशिष्टान्तराघटितत्वनिवेशापेक्षया लाघवात् स्वावच्छिन्नविषयताशून्यप्रतीत्यवृत्तित्वमेव प्रतिबन्धकत्वे निवेश्यते ; तत एव मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिवारणसंभवात् । मेयत्वविशिष्टव्यभिचाराविषयकशुद्धव्यभिचारप्रतीतौ प्रकृतप्रतिबन्धकत्वसत्त्वात् ।

* * * *

Colophon :

इति ज्येष्ठानक्षत्रवादः ॥

End :

प्रकृतानुमितिप्रतिबन्धकतावृत्तिनिष्ठयद्रूपावच्छिन्नविषयकत्वव्यापकत्व - सम्बन्धावच्छिन्नयद्रूपनिष्ठावच्छेदकताकाधेयतामादाय लक्षणसमन्वयो बोध्य इति.

No. **4323.** **सामान्यनिरुक्तिपत्रम्.**

SĀMĀNYANIRUKTIPATRAM.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 28. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

A short critical pamphlet on Sāmānyanirukti which forms a part of the Tattvacintāmaṇidīdhitiprakāśikā of Gadādhara.

Incomplete.

Beginning :

सामान्यनिरुक्तौ पक्षतावच्छेदकादिविरहविशिष्टः पक्षः, पक्षनिष्ठस्तद्विरहो वेति दीधितेराधेयतासंबन्धेन पक्षविशिष्टपक्षतावच्छेदकविरह इत्यर्थकरणात् उक्तविशिष्टस्यालक्ष(क्ष्य)ताया एव भट्टाचार्याभिप्रेतत्वावगमात् । यद्वा जन्यतावच्छेदकप्रकारतायां प्रतिबन्धकतावैशिष्ट्यम्—आधेयत्वस्व-

(वि)शिष्टत्वोभयसंबन्धेन । स्ववैशिष्ट्यम्—स्वविशिष्टाधिकरणताविशिष्टाधि-करणतावत्त्वसंबन्धेनेति विवक्षणेनोक्ताव्याप्तेः जलवद्ध्रदकालीनह्रदपक्षके उक्तातिव्याप्तेश्चानवकाशात् ।

End:

ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यविशिष्टविषयत्वाव्यापक-प्रकृतानुमितित्वव्यापकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूतस्वाव-च्छिन्नविषयताकधर्मावच्छिन्नविषयताकधर्मावच्छिन्नविषयताशून्यत्वसंबन्धा-वच्छिन्नस्वनिष्ठप्रतियोगिताकाभाववज्ज्ञानीयत्वेनैव यत्किञ्चिद्विषयता विशे-ष्यते । इत्थञ्च गगनाभाववद्भाववत्कालीनगगनाभाववद्घटत्वावच्छिन्न-विषयताकज्ञाने उक्तसंबन्धेन स्वाभावसत्त्वात् उदासीनज्ञाने च स्वस्यैव सत्त्वान्नाव्याप्तिः ॥

No. 4324. सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Substance, paper. Size, 13⅓ × 4¼ inches. Pages, 338. Lines, 8 on a page. Character, Grantha and Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

Similar to the above.

It is stated that this manuscript was transcribed by a Rāma-daivajña of Vēlāpura and presented to one Srīnivāsa Aiyaṅgār of Conjeeveram.

Beginning:

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्त इति । अस्यार्थः—

तत्त्वनिर्णयप्रयोजकत्वादित्यत्र पञ्चम्यर्थो ज्ञानज्ञाप्यत्वम् । निरूपणं प्रतिपत्त्यनुकूलीभूतो व्यापारः । तादृशव्यापारे ज्ञानज्ञाप्यत्वस्यान्वयः ।

End:

यदि च निरवच्छिन्नत्वमवच्छेदकताविशिष्टान्यत्वम् । वशिश्र ः स्वनिरूपकत्वस्वानिरूपकनिरूपकत्व उभयसंबन्धेनेत्युच्यते, तदा गौरवम्। एवं दण्डेन दण्डत्वावगाहि दण्डत्वेन दण्डावगाहि इदं दण्डवद्विशिष्टवानिति बुद्धेः प्रतिबन्धकत्वमापाद्यत इति.

No. 4325. सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Pages, 49. Lines, 13 on a page.

Begins on fol. 45*a* of the MS. described under No. 4081.

Complete.

Similar to the above.

This manuscript is said to have been completed by Aṣṭaputra-nārāyaṇāchāriar of Kāñcīkṣētra on Sunday, the 3rd of the dark half of the Āṣāḍhamonth in the year Tāraṇa.

Beginning:

प्रथमलक्षणे अनुमितिपदमनुमितिनिष्ठकार्यतानिरूप(क)सम्बन्धित्वेनानुमितितत्करणज्ञानान्यतरपरमिति शिरोमणिः ।

प्रकृतपक्षक (प्रकृत) साध्यक (प्रकृत) हेतुकानुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयत्वात्मकनिरूपकत्वस्य लाभाय सम्बन्धिपदमिति व्याख्याय . . . . भट्टाचार्येणोक्तम । अत्रेयमनुपपत्तिः—

प्रकृतपक्षकप्रकृतसाध्यकप्रकृतहेतुकानुमितिनिष्ठकार्यतासाक्षात्कारजनकसाक्षात्कारविषयग्रहे प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपित(त्वा)व्यापकविषयिताशून्यत्वविशेषणेनैव तादृशसमूहालम्बनानुमितिमादाय ह्रदनिष्ठवह्न्यभावादाव[ति]व्याप्तिवारणसम्भवात् ।

End :

साध्यसाधनग्रहत्वाव्यापकव्याप्तिग्रहत्वव्यापकप्रतिबध्यतानिरूपित - प्रतिबन्धकत्वमनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृत्तित्वविशिष्टयद्रूपा - वच्छिन्नविषयताव्यापकं तद्रूपवत्त्वस्यैव व्यभिचारत्वरूपतया प्रकृते धूमा- भाववद्वृत्तिवह्निरूपव्यभिचारेऽव्याप्त्यनवकाशादिति हृदयम् ॥

No. **4326.** सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under No. 4241.

Incomplete.

Similar to the above.

Beginning :

यद्रूप(पा)[त्वा]वच्छिन्नविषयतासामान्यं प्रकृतानुमितिप्रतिबन्धकताव- च्छेदकं तद्रूपावच्छिन्नत्वं दोषसामान्यलक्षणमित्युक्तौ पाषाणमयत्वविशिष्टे पर्वतेऽतिव्याप्तिः ; तद्वारणाय प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशे च असाधारणेऽव्याप्तिरिति भट्टाचार्यैरुक्तम् । अथेयं न सङ्गच्छते ; ज्ञानवै- शिष्ट्यावच्छिन्नत्व असाधारण्यविषयत्वानवच्छिन्नत्व उभयाभाववत्प्रतिबन्धक- तावच्छेदकत्वस्यैव यद्रूपावच्छिन्नविषयतासामान्ये निवेशेनोक्ताव्याप्तिवारण- सम्भवात् ।

End :

अत एव दूषणात् ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदक- त्वासाधारण्यविषयताभिन्नत्व एतदुभयाभावः यद्रूपावच्छिन्नविषयतासामान्ये

निवेश्यत इति स्वरूपसंबन्धावच्छेदकत्वकल्पोऽपि सम्भवतीति पूर्वपक्षोऽपि सुदूरमपसरणीयः अयमेकः पूर्वपक्षः.

No. **4327.** सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 52. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

By Jagannātha.

Prathamalakṣaṇa complete

Similar to the above.

Beginning :

चिन्तामणावथेति । अथशब्दार्थः सद्धेतुनिरूपणानन्तर्यम् ; तच्च निरूपणेऽन्वेति । हेत्वाभासा इत्यत्र हेतुवदाभासन्त इति व्युत्पत्तिः । अत्र हेतुपदं व्याप्तिपक्षधर्मताविशिष्टपरम् ; वत्यर्थः सादृश्यम् ; तच्च भेदविशिष्टवृत्तिधर्मवत्त्वम् ; हेतुपदार्थस्य वत्यर्थैकदेशे भेदे वृत्तित्वे चान्वयः । धात्वर्थो ज्ञानविषयिता ; तदेकदेशे ज्ञाने सादृश्यस्यान्वयः ; आश्रयत्वमाख्यातार्थः । तथाच व्याप्तिपक्षधर्मताविशिष्टविभिन्नत्वे सति तद्वृत्तिधर्मप्रकारकज्ञानविषयिताश्रय इत्यर्थः ।

End :

न चाप्रामाण्यज्ञानानास्कन्दित(त्व) संशयान्यत्वयोरेकविशिष्टापरस्यैव प्रतिबन्धकतावच्छेदकघटकत्वज्ञानमादाय दोषाणां प्रतिबन्धकत्वेऽपि नातिव्याप्तिरिति वाच्यम् ; एकधर्मावच्छिन्ने परस्यैव लाघवेन प्रतिबन्धकतावच्छेदकघटकत्वादिति ॥

Colophon:

इति श्रीजगन्नाथाख्यभट्टाचार्यकृतौ गदाधरीयसामान्यनिरुक्तिक्रोडपत्रे प्रथमलक्षणं समाप्तम् ॥

No. **4328.** सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 4261.

Author unknown.

Similar to the above.

Incomplete

Beginning:

अथ सामान्यनिरुक्तौ एतेनेत्यादिद्वितीयकल्पे व्यापकताघटितसत्प्रतिपक्षमात्रेऽव्याप्तिः । न च स्वावच्छिन्नविषयताव्यापकप्रकृतानुमितिविरोध्यनुमितिजनकतासम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताक . . . . विशिष्टान्तरविषयतायां निवेशान्नोक्तदोषः ।

End:

न चैवमपि निरुक्तपक्षसाध्यकाभाववद्धेदहेतुकस्थले निरुक्तबाधाव्याप्तिर्दुर्वारैवेति वाच्यम् ; विशिष्टान्तराविषयकत्वाव्यापकत्वस्य प्रतिबध्यतायामपि निवेशेन तद्दोषपरिहारात्.

No. **4329.** सामान्यनिरुक्तिपत्रम्.

SĀMĀNYANIRUKTIPATRAM.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 54. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old

Similar to the above

Incomplete.

Beginning :

अथ प्रतिबन्धकतायास्स्वरूपसंबन्धरूपावच्छेदकत्ववद्यद्रूपावच्छिन्न-विषयकत्वमनु(मितिप्रतिबन्धकता)वच्छेदकतावत्; तद्रूपावच्छिन्नत्वमित्युक्तौ यत् एकत्र द्वयमिति रीत्या ज्ञानं यच्च वह्न्यभावं(धर्मितावच्छेदकी)कृत्य हृदत्वावगाहि ज्ञानम्; तदादाय नासंभवः ।

End :

इत्थञ्च अन्यधर्मिकस्थले क्लृप्तप्रतिबन्धकत्वेनैवोपपत्तौ(वह्न्य)भाव-वद्धर्मिकस्थले ज्ञानवैशिष्ट्यानवच्छिन्नमपि प्रतिबन्धक(त्वा)न्तरं (न)कल्प्यते प्रयोजनाभावादिति हृदयम्.

No. **4330.** सामान्यनिरुक्तिप्रथमलक्षणविचारः.

SĀMĀNYANIRUKTIPRATHAMALAKṢAṆAVICĀRAḤ.

Pages, 32. Lines, 7 on a page.

Begins on fol. 70*a* of the MS. described under No. 4081.

Complete.

A discussion bearing on the first of the three definitions of Sāmānyanirukti given in the Tattvacintāmaṇi of Gaṅgēśōpādhyāya.

Beginning :

सर्वक्षत्रियवर्गगर्वमथनप्रोद्भूतकीर्तिं सदा
बिभ्राणं परशुं जिगाय भगवान् यो भार्गवं लीलया ।
तं वन्दे जगतामभीष्टफलदं श्रीरामचन्द्रप्रभुं
विद्वत्स्वान्तषडङ्घ्रिसेवितपदाम्भोजं जगन्नायकम् ॥
अशेषशिष्यस्वान्तस्या(स्था)ज्ञानध्वान्तदिवाकरम् ।
दुर्वादिद्वी(द्वि)पपञ्चास्यं श्रीनिवासगुरुं भजे ॥

गादाधर्यां तत्साक्षात्कारेति । अनुमितिपरामर्शयोरेकदा साक्षात्कारासम्भवात् कथमनुमितौ परामर्शकार्यतासाक्षात्कारः सम्भवतीति चे(द)त्र केचित्—

ज्ञानादिप्रत्यक्षे विषयस्य कार्यकालवृत्तितया हेतुत्वानभ्युपगमात् परामर्शानन्तरोत्पन्नानुमितिद्वितीयक्षणे परामर्शानुमित्योरुभयोरपि साक्षात्कारसम्भवात् द्वितीयक्षणे परामर्शांशे लौकिकः अनुमितौ परामर्शकार्यतासाक्षात्कारः सम्भवत्येवेति ।

End:

प्रतिबन्धकतावच्छेदककोटौ ज्ञानविशेषणविधया प्रतिबन्धकत्वात् न कालान्तरे प्रतिबध्यज्ञानानुपपत्तिप्रसङ्ग इत्यास्तां विस्तरः ॥

Colophon:

इति प्रथमलक्षणविचारः ॥

No. 4331. सामान्यनिरुक्तिवादार्थः.

SĀMĀNYANIRUKTIVĀDĀRTHAḤ.

Pages, 53. Lines, 12 on a page.

Begins on fol. 58*a* of the MS. described under No. 4006.

Incomplete.

A controversial treatise on Sāmānyanirukti or the general definition of fallacies in logic.

Beginning:

अत्र प्रकृतपक्षकप्रकृतसाध्यकप्रकृतलिङ्गकानुमितिनिष्ठकार्यतानिरूपकसंबन्धिग्रहनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वं हेतुदोषत्वमितिकल्पे पर्वतो वह्निमान् ह्रदश्च तथेति समूहालम्बनानुमितिमादाय पर्वतपक्षकवह्निसाध्यकधूमलिङ्गकस्थले वह्न्यभाववद्ध्रदा(दा)व[ति]व्याप्तिः ।

End:

यादृशविशिष्टविषयकानिश्चयविशिष्टयादृशविशिष्टविषयकानिश्चयत्वं तादृशविशिष्टद्वयाविषयकप्रतीतिविषयतानवच्छेदकं यद्यत्त्वं तदन्यत्वस्य विवक्षितत्वात् । उक्तबाधज्ञानप्रतिबन्धकता तु न तादृशसाध्याभावरूपविशिष्टविषयकत्वानतिरिक्तवृत्तिकेत्याहुः.

No. **4332.** सिद्धान्तचन्द्रिकाव्याख्या.

SIDDHĀNTACANDRIKĀVYĀKHYĀ.

Substance, palm-leaf. Size, $21\frac{1}{4} \times 1\frac{3}{4}$ inches. Pages, 102. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Commentary by Gaṅgādharasudhī.

The author of the original work on Nyāya logic not known.

Incomplete.

Beginning:

विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥

विष्णोः पदाम्बुजं नत्वा गङ्गाधरसुधीमणिः ।
सिद्धान्तचन्द्रिकाव्याख्यां तनोति विदुषां मुदे ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तये कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—नत्वेत्यादि । ननु मङ्गलं निष्प्रयोजनत्वान्नाचरणीयम् ; न च समाप्तिर्वा विघ्नध्वंसो वा मङ्गलस्य फलमस्त्विति वाच्यम् ; कादम्बर्यादौ कृतेऽपि मङ्गले समाप्त्यादेरदर्शनेन अकृतेऽपि मङ्गले नास्तिकादिग्रन्थे तद्दर्शनेनान्वयव्यतिरेकाभ्यां व्यभिचारात् ।

End:

अत एव [सं]सर्गोदावेव भगवदपेक्षाबुद्धिजन्यद्वित्वाद्युत्पत्तिः नान्यदा। न च सुखानाधिकरणकालादिकमादाय विनिगमनाविरहाद्बहुतरकार्ये . . . . ति वाच्यम् ; अनायत्या तस्येष्टत्वात्। न च सर्गादौ परमाणुद्व्यणुकयोर्द्वित्वत्रित्वोत्पाद एव मानाभावः ; कुतस्तज्जनकगवेषण ? कुतस्तरां च बहुतरकार्यकारणभावप्रस(ङ्गरू)पेष्टापत्तिरिति वाच्यम्.

No. 4333. सिद्धान्तलक्षणपत्रम्.

SIDDHĀNTALAKṢAṆAPATRAM.

Pages, 10. Lines, 11 on a page.

Begins on fol. 30*a* of the MS. described under No. 4236.

Incomplete.

A short critical pamphlet on Siddhāntalakṣaṇa in the Tattvacintāmaṇidīdhitivyākhyā of Jagadīśa. This deals with a new definition of Vyāpti or the invariable association of the Hētu with the Sādhya in a syllogism.

Beginning:

स्वावच्छिन्नविषयकत्वमुपेक्ष्य स्वाश्रयाविषयकत्वानिवेशे मेयत्वविशिष्टव्यभिचारादावतिव्याप्तिर्भट्टाचार्येणाभिहिता । सा न सङ्गच्छते ; व्यभिचारत्वेन घटावगाहिप्रतीतेरपि व्यभिचारत्वाश्रयाविषयकतया तदीयविषयतावच्छेदकत्वस्य व्यभिचारत्वादौ सुघटत्वादिति चेन्न, तदवच्छिन्नविषयकमहानसीयवह्निर्नास्तीतिप्रतीतिसिद्धाभावमादायाव्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वं जगदीशेन निवेशितम् ।

End:

तदनिरूपकत्वस्य महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावीयप्रतियोगितायामसत्त्वान्न तादृशाभावो वह्नित्ववद्धान्धूमादित्यत्र लक्षणघटको भवति.

No. **4334.** स्वप्रकाशवादार्थः.

SVAPRAKĀŚAVĀDĀRTHAḤ.

Pages, 28. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 3915.

This is a discussion on the self-luminousness of consciousness.

Complete.

Beginning :

प्राभाकरास्त्वेवमाहुः—

ज्ञानं नानुव्यवसायग्राह्यम् ; किन्तु स्वयमेव स्वं स्वाश्रयमात्मानञ्च गृह्णाति ; एवञ्च घट इत्याकारकव्यवसाय एव घटमहं जानामीत्याकारकः ; तस्य मितिमात्रंशे प्रत्यक्षरूपता, घटादिरूपमेयांशे च क्वचित्प्रत्यक्षरूपता क्वचिच्चानुमित्यादिरूपता । अथैवं प्रत्यक्षत्वादीनां जातित्वानुपपत्तिरिति चेत् इष्टमेवैतत्—गुणगतजातिमनङ्गीकुर्वतामस्माकम् । अथ तर्हि किमिदं तदंशे प्रत्यक्षत्वम्? न तावत्तद्वृत्तीन्द्रियसान्निकर्षजन्यत्वम् ; तन्मते ज्ञानेन्द्रियसन्निकर्षस्य ज्ञानग्रहाजनकत्वात् ।

End :

अतः पदार्थोपस्थितिहेतुतयैव निर्वाहेण तत्र योग्यताज्ञानस्य हेतुत्वान्तरकल्पनामित्येतदपि हेयमेव ; नैयायिकमते दर्शितबहुलाघवेनैतादृशाल्पगौरवस्याकिञ्चित्करत्वादिति ॥

Colophon :

इति स्वप्रकाशवादार्थः समाप्तः ॥

INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]

